XXII.

तच्छ्रुत्वा राजसिंहस्य वाक्यमद्भुतविस्तरं ।
हृष्टरोमा महातेजा विश्वामित्रोऽभ्यभाषत ॥ १ ॥
सदृशं राजशार्दूल त्वयैतद्वाक्यमीरितं ।
सौरे वंशेऽभिजातेन वशिष्ठवशवर्तिना ॥ २ ॥
यस्तु मेऽभिमतः कामस्त्वत्तः प्राप्तुमभीप्सितः ।
यदुद्दिश्यागतश्चास्मि कार्यं तच्छ्रूयतामिति ॥ ३ ॥
यज्ञसिद्धिकरं किञ्चिदास्थितोऽस्मि महद्व्रतं ।
न क्रोद्धव्यं मया तत्र कस्यचिद्भुवि भूपते ॥ ४ ॥
व्रते चाप्यसमाप्ते मे यज्ञघ्नौ राक्षसाधमौ ।
वेदीमभ्येत्य तरसा रुधिरेणाभ्यवर्षतां ॥ ५ ॥
अभिभूतोऽसकृत् ताभ्यामहं नियमयन्त्रितः ।
अपक्रम्याश्रमात् तस्माद्द्रष्टुं त्वामभ्युपागतः ॥ ६ ॥
न हि मे क्रोधमुत्स्रष्टुं क्षमं तत्र कथञ्चन ।
ईदृशी यज्ञदीक्षासौ मम तस्मिन् महाक्रतौ ॥ ७ ॥
त्वत्प्रसादादविघ्नेन प्रापयेयं क्रियाफलं ।
त्रातुमर्हसि मामार्तं शरणार्थिनमागतं ॥ ८ ॥
तयोस्त्वं प्रतिषेद्धारं रामं सत्यपराक्रमं ।
दातुमर्हसि मे तत्र रक्षार्थममितौजसं ॥ ९ ॥

शक्तो ह्येष मया गुप्तः सहजेन च तेजसा ।
निहन्तुं समरश्लाघी स्रष्टारमपि रक्षसां ॥ १० ॥
विद्ये चास्मै प्रयच्छामि तेजोबलसमन्विते ।
त्रयाणामपि लोकानां येनाजय्यो भविष्यति ॥ ११ ॥
न च तौ राममासाद्य शक्तौ स्थातुं नराशनौ ।
हन्तुं चेमौ न काकुत्स्थादन्य उत्सहते पुमान् ॥ २१ ॥
तौ तु वीर्यबलोन्मत्तौ कालकल्पौ दुरासदौ ।
रामास्त्रबलनिर्दग्धौ शयिष्येते हतौ युधि ॥ १३ ॥
भीर्न चैव त्वया कार्या रामं प्रति कथञ्चन ।
अहं ते प्रतिजानामि पतितौ विद्धि राक्षसौ ॥ १४ ॥
वेद्म्यमोघबलं राममहं सत्यपराक्रमं ।
वशिष्ठश्चापि वेदैनं योऽयं यद्बल एव च ॥ २५ ॥
यदि धर्मं यशोलाभमभिवाञ्छसि पार्थिव ।
ततो रामं प्रयच्छैकं यदिवा श्रद्दधासि मे ॥ १६ ॥
दशरात्रेण मे यज्ञो भविता यत्र राक्षसौ ।
हन्तव्यौ तव पुत्रेण रामेणाद्भुतकर्मणा ॥ १७ ॥
यदि मेऽप्यनुजानन्ति गुरवस्ते नराधिप ।
वशिष्ठप्रमुखाः सर्वे ततो रामं विसर्जय ॥ १८ ॥
नात्येति कालः कालज्ञ यथा यज्ञस्य मेऽनघ ।
तथा त्वं कुरु भद्रं ते शङ्किष्ठा मा च पार्थिव ॥ १६ ॥

इति हृदयविदारणं तदानीं
मुनिवचनं स तदाशु शुश्रुवान् ।
नरपतिरभवत् ततो महात्मा
व्यथितमनाः प्रचचाल चासनात् ॥२०॥

इत्यार्षे रामायणे आदिकाण्डे विश्वामित्रवाक्यं नाम
द्वाविंशः सर्गः ॥

XXIII.

तच्छ्रुत्वा व्यथितो राजा विश्वामित्रवचस्तदा ।
मुहूर्तमिव निश्चेष्टो ध्यात्वेदं वाक्यमब्रवीत् ॥ १ ॥
ऊनषोडशवर्षोऽयमकृतास्त्रश्च मे सुतः
न युद्धयोग्यतामस्य पश्यामि सह राक्षसैः ॥ २ ॥
इयं वक्षौहिणी पूर्णा बलस्य मम दुर्जया ।
अनयाहं वृतस्तत्र योत्स्यामि पिशिताशनैः ॥ ३ ॥
सन्ति शूराश्च मे योधाः कालान्तकयमोपमाः ।
रक्षसां प्रतियोद्धारस्ते मया सह यान्त्वपि ॥ ४ ॥
यावत् प्राणा धरिष्यन्ति युध्यतो मे निशाचरैः ।
अविघ्नं व्रतचर्यायास्तावत् तव भविष्यति ॥ ५ ॥
अहं स्वयं गमिष्यामि न रामो गन्तुमर्हति ।
बालोऽयमकृतास्त्रश्च न च वेत्ति बलाबलं ॥ ६ ॥
न चास्त्रशास्त्रकुशलो न च युद्धविशारदः ।
न च राक्षसयुद्धेषु योग्योऽयं कूटयोधिषु ॥ ७ ॥
रामेणाहं विहीनश्च मुहूर्तमपि नोत्सहे ।
जीवितुं मुनिशार्दूल न रामं नेतुमर्हसि ॥ ८ ॥
नववर्षसहस्राणि मम जातस्य साम्प्रतं ।
वृद्धेनोत्पादिताः पुत्रा मया चैते कथञ्चन ॥ ९ ॥

प्राणैः प्रियतरा ब्रह्मन् ममैते देवरूपिणः ।
एभिर्विना न जीवेयमिति मे निश्चिता मतिः ॥ १० ॥
त्यक्त्वा चान्यान् सुतान् रामे प्राणाः सम्प्रति मे स्थिताः ।
गुणाभिरामे लोकस्य सोमवत् प्रियदर्शने ॥ ११ ॥
उदारगुणसंपन्नं मनोहृदयनन्दनं ।
प्राणैः प्रियतरं पुत्रं न मे त्वं नेतुमर्हसि ॥ १२ ॥
प्रणिपत्याभियाचे त्वां कृपणः पुत्रलालसः ।
ज्येष्ठं पुत्रं न मे रामं भगवन् नेतुमर्हसि ॥ १३ ॥
अवश्यं यदि नेतव्यो राम एष त्वया मुने ।
चतुरङ्गबलोपेतस्ततो यातु मया सह ॥ १४ ॥
किंवीर्यौ राक्षसौ तौ च पुत्रौ कस्य कुतश्च तौ ।
किंप्रमाणौ च कावेतौ तद्ब्रूहि मुनिपुंगव ॥ १५ ॥
कथं च प्रतिकर्तव्यं तयो रामेण रक्षसोः ।
मामकैर्वा बलैर्ब्रह्मन् मया वा कूटयोधिनोः ॥ १६ ॥
सर्वं मे शंस भगवन् मया तत्र कथं तयोः ।
यज्ञे ते प्रतिकर्तव्यं नामतः कौ च तौ मुने ॥ १७ ॥
श्रूयते हि महावीर्यो रावणो नाम राक्षसः ।
पुत्रो विश्रवसः क्रूरो भ्राता वैश्रवणस्य च ॥ १८ ॥
स ते कश्चिन्नु यज्ञस्य विघ्नकृल्लोकरावणः ।
न शक्तास्तस्य संग्रामे वयं स्थातुं दुरात्मनः ॥ १९ ॥

स मे त्वं बालपुत्रस्य प्रसादं कर्तुमर्हसि ।
अनतिक्रमणीयो हि भवान् मे परमो गुरुः ॥ २० ॥
देवदानवगन्धर्वयक्षरक्षोगणेष्वपि ।
न विद्यते रावणस्य प्रतियोद्धा दुरात्मनः ॥ २१ ॥
स हि वीर्यवतां वीर्यमादत्त इति नः श्रुतं ।
तेन सार्धं न शक्तोऽसौ योद्धुं वीर्यविघातिना ॥ २२ ॥
अथवा लवणो नाम यज्ञहा ते मधोः सुतः ।
तथापि न विमोक्ष्यामि पुत्रं सोऽपि हि दुर्जयः ॥ २३ ॥
अथ कालान्तकप्रख्यौ पुत्रौ सुन्दोपसुन्दयोः ।
मारीचश्च सुबाहुश्च विघ्नं ते कुरुतः सह ॥ २४ ॥
तथापि न विमोक्ष्यामि पुत्रं रामं प्रसीद मे ।
तौ हि राक्षसकन्यायां जातौ मायाविनौ किल ॥ २५ ॥
एषामन्यतमं हित्वा प्रतियोत्स्यामि संयुगे ।
अन्यथा त्वनुनेष्यामि भवन्तं सह बान्धवैः ॥ २६ ॥

इत्यार्षे रामायणे आदिकाण्डे दशरथवाक्यं नाम
त्रयोविंशः सर्गः ॥

XXIV.

तच्छ्रुत्वा वचनं तस्य स्नेहव्याकुलिताक्षरं ।
समन्युः कौशिको वाक्यं प्रत्युवाच महीपतिं ॥ १ ॥
पूर्वं करिष्य इत्युक्त्वा प्रतिज्ञां हातुमिच्छसि ।
राघवाणामयुक्तोऽयं सत्यधर्मव्यतिक्रमः ॥ २ ॥
यद्येतत् ते क्षमं राजन् गमिष्यामि यथागतं ।
मिथ्याप्रतिज्ञां कृत्वेमां सुखी भव सुतैः सह ॥ ३ ॥
तस्माद्रोषपरीतात् तु विश्वामित्रान्महौजसः ।
चचाल पृथिवी भीता सुरांश्च भयमाविशत् ॥ ४ ॥
कौशिकं कुपितं दृष्ट्वा जगन्मैत्रो महामुनिः ।
वशिष्ठो भगवान् वाक्यं राजानमिदमब्रवीत् ॥ ५ ॥
इक्ष्वाकूणां कुले जातः साक्षाद्धर्म इव स्वयं ।
सत्यवाक् सततं भूत्वा नानृतं वक्तुमर्हसि ॥ ६ ॥
त्रिषु लोकेषु विख्यातः सत्यवागिति च प्रभो ।
नार्हस्यद्य मृषावादी भवितुं पुत्रहेतुना ॥ ७ ॥
कर्तास्मीति प्रतिज्ञाय न करिष्यसि चेन्नृप ।
विश्वामित्रवचः सत्याद्भ्रष्टः पापमवाप्स्यसि ॥ ८ ॥
अनृतं मा वचः कार्षीर्मा धर्म्यान् नीनशः पथः ।
सत्यप्रतिज्ञतां रक्ष रामं राजन् विसर्जय ॥ ९ ॥

कृतास्त्रमकृतास्त्रं वा नैनं शक्ष्यन्ति राक्षसाः ।
गुप्तं कुशिकपुत्रेण प्रधर्षयितुमाहवे ॥ १० ॥
एष विग्रहवान् धर्म एष वेदविदां वरः ।
एष वीर्यवतां श्रेष्ठो विद्याज्ञानतपोनिधिः ॥ ११ ॥
दिव्यान्यस्त्राण्यशेषेण वेदैष कुशिकात्मजः ।
देवाश्च न विदुर्यानि कुतोऽन्ये भुवि मानवाः ॥ १२ ॥
दत्तान्यस्मै कृशाश्वेन दिव्यान्यस्त्राण्यशेषतः ।
महीं पालयता पूर्वं प्रीतेनामिततेजसा ॥ १३ ॥
ते हि पुत्राः कृशाश्वस्य प्रजापतिसुतोपमाः ।
नैकरूपा महात्मानो दीप्तिमन्तो जयान्विताः ॥ १४ ॥
जया च विजया चैव दाक्षायण्यौ महाव्रते ।
ययोरस्त्राण्यशेषाणि जज्ञिरे विश्रुतेजसा ॥ १५ ॥
पञ्चाशतं तत्र सुतान् जनयामास वै जया ।
बधाय रिपुसैन्यानामजयान् कामरूपिणः ॥ १६ ॥
विजया जनयामास पुत्रान् पञ्चाशतं वरान् ।
अस्त्राणामप्रधृष्याणामजेयानां महौजसां ॥ १७ ॥
तानि सर्वाण्ययं वेद विश्वामित्रो महायशाः ।
सप्रयोगरहस्यानि ससंहाराणि राघव ॥ १८ ॥
तानि दास्यत्यशेषेण रामायैष महामुनिः ।
यैरस्त्रैस्तानि रक्षांसि रामो जेष्यत्यसंशयं ॥ १९ ॥

अनुग्रहार्थं रामस्य प्रजानामपि चात्मनः ।
न रामगमनं राजन् निवारयितुमर्हसि ॥ २० ॥

इत्यार्षे रामायणे आदिकाण्डे वशिष्ठवाक्यं
चतुर्विंशः सर्गः ॥

XXV.

एवमुक्तो वशिष्ठेन राजा दशरथः सुतं ।
संप्रहृष्टमना राममाजुहाव सलक्ष्मणं ॥ १ ॥
आदौ कृतस्वस्त्ययनं मातृभिः कृतमङ्गलं ।
स्वयं चैव वशिष्ठेन कृतस्वस्त्ययनक्रियं ॥ २ ॥
स्नेहान्मूर्धन्युपाघ्राय राजा दशरथः सुतं ।
ददौ कुशिकपुत्राय लक्ष्मणानुचरं तदा ॥ ३ ॥
ततो वायुरवात् पुण्यो नीरजस्कः शुभः शुचिः ।
विश्वामित्रगतं रामं दृष्ट्वा राजीवलोचनं ॥ ४ ॥
पपात पुष्पवृष्टिः खाद्गीतनादश्च शुश्रुवे ।
शङ्खदुन्दुभिनिर्घोषः प्रयाते रघुनन्दने ॥ ५ ॥
विश्वामित्रो ययावग्रे तं रामः पृष्ठतोऽन्वगात् ।
काकपक्षधरो धन्वी तं च सौमित्रिरन्वयात् ॥ ६ ॥
विश्वामित्रगतं रामं दृष्ट्वा देवाः सवासवाः ।
प्रहर्षमतुलं प्राप्ता दशग्रीववधैषिणः ॥ ७ ॥
विश्वामित्रं महात्मानं तावुभौ रामलक्ष्मणौ ।
तदानुजग्मतुर्वीरौ यथेन्द्रं देवमश्विनौ ॥ ८ ॥
बद्धगोधाङ्गुलित्राणौ खड्गतूणधनुर्धरौ ।
तदानुजग्मतुः स्थाणुं कुमाराविव पावकी ॥ ९ ॥

अध्यर्धं योजनं गत्वा सरय्वा दक्षिणे तटे ।
रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत ॥ १० ॥
वत्स राम जलं तावद्विधिवत् स्प्रष्टुमर्हसि ।
उपदेक्ष्यामि ते श्रेयो मा भूत् कालस्य पर्ययः ॥ ११ ॥
गृह्णाण द्वे इमे विद्ये बलामतिबलां तथा ।
न ते श्रमो जरा वाभ्यां भविता नाङ्गवैकृतं ॥ १२ ॥
न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैर्ऋताः ।
न च ते सदृशो राम वीर्येणान्यो भविष्यति ॥ १३ ॥
सदेवनरनागेषु लोकेष्विह पुमांस्त्रिषु ।
न सौभाग्ये न दाक्षिण्ये न बुद्धिश्रुतिपौरुषे ॥ १४ ॥
नोत्तरे प्रतिपत्तव्ये त्वत्तुल्यो वा भविष्यति ।
एतद्विद्याद्वयं प्राप्य यशश्चाव्ययमाप्स्यसि ॥ १५ ॥
बलामतिबलां चैव ज्ञानविज्ञानमातरौ ।
क्षुत्पिपासे च ते राम नात्यर्थं पीडयिष्यतः ॥ १६ ॥
जयश्च दुर्गकान्तारप्रदेशेष्वटवीषु च ।
सारतां त्रिषु लोकेषु गमिष्यसि च राघव ॥ १७ ॥
पितामहसुते ह्येते विद्ये चायुर्बलावहे ।
पात्रं त्वमसि काकुत्स्थ विद्ययोर्ग्रहणेऽनयोः ॥ १८ ॥
स्वभावजैर्गुणैर्दिव्यैः कामजैर्बहुलैर्वृतः ।
भूयस्तव गुणोत्कर्षमेते विद्ये करिष्यतः ॥ १९ ॥

ततो रामो जलं स्पृष्ट्वा प्राञ्जलिः प्रणतः स्थितः ।
प्रतिजग्राह ते विद्ये विश्वामित्रात् तपोधनात् ॥ २० ॥
गृहीतविद्योऽनुज्ञातस्ततो रामो महायशाः ।
तत्रोवास निशामेतां सरय्वां सहलक्ष्मणः ॥ २१ ॥

इत्यार्षे रामायणे आदिकाण्डे विद्याप्रदानं नाम
पञ्चविंशः सर्गः ॥

XXVI.

प्रभातायां तु शर्वर्यां विश्वामित्रो महामुनिः ।
अभ्यभाषत काकुत्स्थं शयानं पर्णसंस्तरे ॥ १ ॥
कौशल्यामातरुत्तिष्ठ पूर्वा संध्या उपास्यतां ।
पौर्वाह्णिकं विधिं कर्तुं तात कालोऽयमागतः ॥ २ ॥
तस्यर्षेः परमोदारं वचः श्रुत्वा तु राघवौ ।
स्नात्वा कृतोदकौ वीरौ जेपतुर्जाप्यमाह्निकं ॥ ३ ॥
कृताह्निकक्रियौ चापि विश्वामित्रं तपोनिधिं ।
अभिवादयितुं तत्र सहितावुपतस्थतुः ॥ ४ ॥
ततः प्रययतुश्चापि दिव्यां त्रिपथगां नदीं ।
गङ्गां देवनदीं द्रष्टुं सरय्वा अविदूरतः ॥ ५ ॥
तस्यास्तीराश्रमपदमृषीणां पुण्यकर्मणां ।
रम्यं ददृशतुः पुण्यं तप्यतामुत्तमं तपः ॥ ६ ॥
दृष्ट्वा तदाश्रमपदं जातकौतूहलौ मुनिं ।
पप्रच्छतुस्तदा तत्र तावुभौ रामलक्ष्मणौ ॥ ७ ॥
कस्यायमाश्रमो ब्रह्मन् कश्चास्मिन् कुशलो मुनिः ।
भगवन् श्रोतुमिच्छावः परं कौतूहलं हि नौ ॥ ८ ॥
तयोस्तद्वचनं श्रुत्वा प्रहसन् मुनिरब्रवीत् ।
उभाभ्यां श्रूयतां राम यस्यायं पूर्वमाश्रमः ॥ ९ ॥

कन्दर्पो मूर्तिमानासीत् काम इत्यभिविश्रुतः ।
स्थाणुं स इह तप्यन्तं पुरा किल महत् तपः ॥ १० ॥
आवेष्टुमभ्ययात् तूर्णं कृतोद्वाहमुमापतिं ।
बुद्ध्वा स तत्र रुद्रेण शप्तः किल महात्मना ॥ ११ ॥
अथ शप्तस्य रुद्रेण तस्यैव रघुनन्दन ।
रोषशापाग्निनिर्दग्धं तच्छरीरं व्यशीर्यत ॥ १२ ॥
तस्याङ्गान्यपतन् राम सद्यः सर्वाण्यशेषतः ।
अशरीरः कृतः काम एवं कोपान्महात्मना ॥ १३ ॥
अनङ्ग इति विख्यातस्ततःप्रभृति राघव ।
अनङ्ग इति देशोऽयं ख्यातः कामाङ्गनाशनात् ॥ १४ ॥
तस्यायमाश्रमः पुण्यः कामस्य रघुनन्दन ।
तस्यायतनमत्रेदं तस्येमे परमर्षयः ॥ १५ ॥
तपोदमरताः सर्वे पुराणा ब्रह्मवादिनः ।
निवसन्त्यत्र निरतास्तपोनिर्धूतकल्मषाः ॥ १६ ॥
इहाद्य रजनीमेकां वसामः शुभदर्शन ।
पुण्ययोः सरितोर्मध्ये तरिष्यामः परेऽहनि ॥ १७ ॥
अभिगच्छाम च स्नात्वा शुचयः पुण्यमाश्रमं ।
इह कामाश्रमे राम सुखं वत्स्यामहे निशां ॥ १८ ॥
तेषां संवदतामेवं तपोदीर्घेण चक्षुषा ।
विज्ञाय परमप्रीता मुनयो हर्षमागमन् ॥ १९ ॥

तेऽर्घ्यं पाद्यं च विधिवत् प्रयुज्य कुशिकात्मजे ।
रामलक्ष्मणयोरेवमकुर्वन्नतिथिक्रियां ॥ २० ॥
सत्कारं परमं प्राप्य कथाभिरभिरम्य च ।
न्यवसंस्ते महात्मानः कामाश्रमपदे सुखं ॥ २१ ॥

इत्यार्षे रामायणे आदिकाण्डे कामाश्रमनिवासो नाम
षड्विंशः सर्गः ॥

XXVII.

ततः प्रभाते विमले कृत्वाह्निकमरिंदमौ ।
विश्वामित्रं पुरस्कृत्य नद्यास्तीरमुपेयतुः ॥ १ ॥
ते तु सर्वे महात्मानो मुनयः सूर्यवर्चसः ।
उपस्थाप्य शुभां नावं विश्वामित्रमथाब्रुवन् ॥ २ ॥
आरोहतु भवान् नावं राजपुत्रपुरस्कृतः ।
अरिष्टं गच्छ पन्थानं मा ते कालात्ययो ऽभूत् ॥ ३ ॥
विश्वामित्रस्तथेत्युक्त्वा तानृषीन् प्रतिपूज्य च ।
ततार सरितं पुण्यां सरयूं विमलोदकां ॥ ४ ॥
तत्र रामः सरिन्मध्ये पप्रच्छ मुनिपुंगवं ।
वारिणो भिद्यत इव किंन्वयं बलवान् स्वनः ॥ ५ ॥
इति रामवचः श्रुत्वा कौतूहलसमन्वितं ।
कथयामास भगवांस्तस्य शब्दस्य विस्तरं ॥ ६ ॥
कैलासशिखरे राम मनसा निर्मितं सरः ।
ब्रह्मणा प्रागिदं यस्मात् तदभून्मानसं सरः ॥ ७ ॥
सरसो मानसात् तस्मादयोध्यामनुशोभना ।
नदी प्रसूता सरयूः पुण्या ब्रह्मसरश्च्युता ॥ ८ ॥
जाह्नवीमभिवर्तिन्यास्तस्याः शब्दो ऽयमीदृशः ।
वारिसंघर्षजो राम प्रणामं प्रयतः कुरु ॥ ९ ॥

चक्रतुस्तौ नमस्ताभ्यां नदीभ्यामथ राघवौ ।
तीरं दक्षिणमासाद्य जग्मतुर्लघुविक्रमौ ॥ १० ॥
अथानुपदमेवान्यद्वनं घोरमरिंदमौ ।
दृष्ट्वा पप्रच्छतुर्भूयो मुनिं दशरथात्मजौ ॥ ११ ॥
कस्येदं मेघसंकाशं वनं घोरं प्रकाशते ।
दुर्गं पक्षिगणाकीर्णं झिल्लिकागणनादितं ॥ १२ ॥
नानामृगगणैर्घोरैर्वाश्यमानैर्विनादितं ।
सिंहव्याघ्रवराहर्क्षखड्गिकुञ्जरसेवितं ॥ १३ ॥
धवाश्वकर्णकुटजपाटलाबिल्वतिन्दुकैः ।
द्रुमैः कण्टकिभिश्चैव कीर्णं किमिदमुच्यते ॥ १४ ॥
तावुवाच तयोर्वाक्यं श्रुत्वेदं भगवानृषिः ।
श्रूयतामित्युपामन्त्र्य भ्रातरौ रामलक्ष्मणौ ॥ १५ ॥
अयं जनपदः श्रीमान् पूर्वमासीन्महर्द्धिमान् ।
मलजाश्च करूषाश्च देवनिर्माणनिर्मिताः ॥ १६ ॥
सखायं नमुचिं हत्वा मलेन समभिप्लुतः ।
क्रोधाच्चैव सहस्राक्षो मित्रध्रुग्भगवान् किल ॥ १७ ॥
तमिह स्नापयामासुर्देवाः सर्षिगणाः पुरा ।
कलसैः पुण्यसलिलैः पूर्णैर्मलविशोधनैः ॥ १८ ॥
सोऽस्मिन् देशे मलं त्यक्त्वा देवः कालुष्यमेव च ।
मित्राभिद्रोहसंयुक्तं परं हर्षमवाप्तवान् ॥ १९ ॥

निर्मलो निष्करूषश्च शुचिरिन्द्रो यदा बभूत् ।
तदा देशस्य सुप्रीतो ददौ वरमरिंदमः ॥ २० ॥
इमौ जनपदौ स्फीतौ ख्यातिं लोके गमिष्यतः ।
मलजाश्च करूषाश्चेत्यङ्गजेन ममाङ्कितौ ॥ २१ ॥
एवमस्त्विति तं देवाः पाकशासनमब्रुवन् ।
देशस्य नामनिर्वृत्तिं श्रुत्वा तां वासवेरितां ॥ २२ ॥
एवमेतौ जनपदौ पूर्वमेव विशब्दितौ ।
मलजाश्च करूषाश्च मुदिता ऋद्धिसंपदा ॥ २३ ॥
अथ कालस्य महतो यक्षिणी कामरूपिणी ।
बलं नागसहस्रस्य धारयन्ती महाबला ॥ २४ ॥
ताडका नाम सुन्दस्य भार्या दैत्यपतेरभूत् ।
मारीचो राक्षसः पुत्रो यस्याः शक्रपराक्रमः ॥ २५ ॥
सेयं जनपदं राम समुत्साद्य सुदारुणा ।
अद्यापि साधिवसति ताडका दुष्टयक्षिणी ॥ २६ ॥
एतं पन्थानमाक्रम्य साध्यर्धाध्योजनादितः ।
अत एव च गन्तव्यं ताडकाभवनं प्रति ॥ २७ ॥
स्वबाहुबलमाश्रित्य जहि तां दुष्टचारिणीं ।
मन्नियोगादिमं देशं कुरु निष्कण्टकं पुनः ॥ २८ ॥
न हि कश्चिदिमं देशं शक्नोत्यागन्तुमीदृशं ।
यक्षिण्या घोररूपिण्या उत्सादितमनार्यया ॥ २९ ॥

इति ते सत्यमाख्यातं यथेदं दारुणं वनं ।
यक्षिण्योत्सादितं पूर्वमद्याप्युत्साद्यते तया ॥ ३० ॥

इत्यार्षे रामायणे आदिकाण्डे ताडकावनप्रवेशो नाम
सप्तविंशः सर्गः ॥

XXVIII.

इति तस्याप्रमेयस्य मुनेर्वचनमद्भुतं ।
श्रुत्वा रामस्ततो भूयः परिपप्रच्छ संशयं ॥ १ ॥
अल्पवीर्या यदा यक्षाः श्रूयन्ते मुनिपुंगव ।
कथं नागसहस्रस्य धारयत्यबला बलं ॥ २ ॥
विश्वामित्रस्ततो रामं श्रुत्वेति पुनरब्रवीत् ।
शृणु राम यथा चैषा धारयत्यबला बलं ॥ ३ ॥
पूर्वमासीन्महायक्षः सुकेतुरिति विश्रुतः ।
अनपत्यः प्रजाकामः स तेपे सुमहत् तपः ॥ ४ ॥
तस्मै साक्षात् स्वयं ब्रह्मा तपसा परितोषितः ।
कन्यारत्नं ददौ राम ताडकां नाम नामतः ॥ ५ ॥
बलं नागसहस्रस्य ददौ चास्याः पितामहः ।
काङ्क्षतोऽप्यस्य पुत्रं हि न यक्षाय ददौ प्रभुः ॥ ६ ॥
वर्धमानां च तां दृष्ट्वा रूपयौवनशालिनीं ।
धुन्धुपुत्राय सुन्दाय ददौ भार्यामनिन्दितां ॥ ७ ॥
कस्यचित् त्वथ कालस्य यक्षी पुत्रं व्यजायत ।
मारीचं नाम विख्यातं शापाद्राक्षसतां गतं ॥ ८ ॥
सुन्दे तु निहते तस्मिन्नगस्त्यमृषिसत्तमं ।
ताडका सह पुत्रेण प्रधर्षयितुमुद्यता ॥ ९ ॥

राक्षसस्त्वं भवेत्येवं मारीचं व्याजहार सः ।
अगस्त्यः परमक्रुद्धस्ताडकां चेदमब्रवीत् ॥ १० ॥
पुरुषादी घोररूपा यक्षि त्वं विकृतानना ।
इदं रूपं परित्यज्य विकृता त्वं भविष्यसि ॥ ११ ॥
सैषा शापसमाविष्टा ताडका दुष्टयक्षिणी ।
देशमुत्सादयत्येनमगस्त्याध्युषितं पुरा ॥ १२ ॥
एवं तां राम दुर्वृत्तां यक्षीं परमदारुणां ।
गोब्राह्मणहितार्थाय जहि घोरपराक्रमां ॥ १३ ॥
न हि वीर्यमदोन्मत्तामेतां परमदारुणां ।
निहन्ति त्रिषु लोकेषु त्वामृते रघुनन्दन ॥ १४ ॥
न च ते स्त्रीबधकृते घृणा कार्या कथञ्चन ।
प्रजानां हि हितं नित्यं कर्तव्यं राजसूनुभिः ॥ १५ ॥
नृशंसमनृशंसं वा प्रजारक्षणकारणात् ।
पावनं वा सदोषं वा कार्तव्यं नात्र संशयः ॥ १६ ॥
राजवंशेऽभिजातानामेष धर्मः सनातनः ।
अधर्मं जहि काकुत्स्थ कुरु धर्मं प्रजाहितं ॥ १७ ॥
श्रूयते हि पुराप्येवं विरोचनसुता किल ।
राक्षसी दीर्घजिह्वेति विख्याता कामरूपिणी ॥ १८ ॥
विकृतं सुमहद्वक्त्रं कृत्वा कालानलोपमं ।
ग्रसन्ती पृथिवीं कृत्स्नां शक्रेण विनिपातिता ॥ १९ ॥

विष्णुना च पुरा राम शक्रतुल्यपराक्रमा ।
अपीन्द्रलोकमिच्छन्ती काव्यमाता निषूदिता ॥ २० ॥
एवमन्यैरपि पुरा राजभिर्धर्मचारिभिः ।
अधर्मनिरता नार्यो हताः पुरुषसत्तम ॥ २१ ॥

इत्यार्षे रामायणे आदिकाण्डे ताडकोत्पत्तिर्नाम
अष्टाविंशः सर्गः ॥

XXIX.

मुनेर्वचनमक्लीवं श्रुत्वा नृपवरात्मजः ।
राघवः प्राञ्जलिर्भूत्वा प्रत्युवाच शुभव्रतं ॥ १ ॥
अहं पित्रा समादिष्टो मात्रा चैव महामुने ।
विश्वामित्रस्य वचनं त्वया कार्यमिति प्रभो ॥ २ ॥
सोऽहं पितृनियोगेन तव चानुपमद्युते ।
करिष्ये दुष्टचारिण्यास्ताडकाया बधं मुने ॥ ३ ॥
गोब्राह्मणहितार्थाय देशस्य च सुखावहं ।
तदेतदप्रतीपेन कर्तव्यं वचनं मुने ॥ ४ ॥
एवमुक्त्वा धनुः सज्यं कृत्वोद्यम्य च राघवः ।
ज्याशब्दमकरोत् तीव्रं दिशः शब्देन पूरयन् ॥ ५ ॥
तेन शब्देन वित्रस्ता मृगास्तद्वनचारिणः
ताडका चापि संभ्रान्ता ज्यास्वनप्रतिबोधिता ॥ ६ ॥
नर्दमाना भृशं क्रुद्धा विकृता विकृतानना ।
श्रुत्वा चाभ्यद्रवद्वेगाद्यतः शब्दोऽभिनिःसृतः ॥ ७ ॥
तां दृष्ट्वा घोरवपुषं विरूपां विकृताननां ।
अतिप्रमाणामायान्तीं रामो लक्ष्मणमब्रवीत् ॥ ८ ॥
पश्य लक्ष्मण राक्षस्या विकृतं दारुणं मुखं ।
अतिप्रमाणं क्रुद्धाया रूपं चातिभयावहं ॥ ९ ॥

एतां पश्य महाबाहो मद्बाणेन हृदि हतां ।
निहतां पतितां भूमौ रुधिरेण परिप्लुतां ॥ १० ॥
इयं हि राक्षसी घोरा महादुष्कृतकारिणी ।
मच्छराग्निविनिर्दग्धा धुतपापा भविष्यति ॥ ११ ॥
एवं तस्य ब्रुवाणस्य ताडका क्रोधमूर्छिता
उद्यम्य बाहू गर्जन्ती वेगेनाभ्यासमाययौ ॥ १२ ॥
तामापतन्तीं वेगेन विमुक्तामशनीमिव ।
ताडकां विकृताकारां जिघांसन्तीं सुदारुणां ॥ १३ ॥
महाभ्रचयसंकाशां समुच्छ्रितभुजद्वयां ।
विव्याधोरसि बाणेन चन्द्रार्धाकारवर्चसा ॥ १४ ॥
सा तेन वज्ररूपेण बाणेन भृशविक्षता ।
ववाम रुधिरं भूरि पपात च ममार च ॥ १५ ॥
तां हतां पतितां भूमौ दृष्ट्वा सुरपतिस्तदा ।
साधु साध्विति काकुत्स्थं सुराश्च समपूजयन् ॥ १६ ॥
उवाच च भृशं प्रीतः सहस्राक्षोऽम्बरे स्थितः ।
सह सर्वामरगणैर्विश्वामित्रमिदं वचः ॥ १७ ॥
मुने कौशिक पश्यास्मान् देवान् सेन्द्रानुपस्थितान् ।
तोषितान् कर्मणानेन रामस्यामिततेजसः ॥ १८ ॥
अस्मन्नियोगादद्यं ते स्नेहं दर्शय राघवे ।
तपोयोगबलेनैनमाप्याययितुमर्हसि ॥ १९ ॥

प्रजापतिसुतांश्चैव कृशाश्वाद्राजसत्तमात् ।
यान्यवाप्तानि तेऽस्त्राणि तान्यस्मै प्रतिपादय ॥ २० ॥
पात्रभूतो हि ते शिष्यो रामो दशरथात्मजः ।
कर्तव्यं च महत् कार्यमस्माकं राजसूनुना ॥ २१ ॥
एवमुक्त्वा सुरगणा विश्वामित्रं पुनर्ययुः ।
यथागतेनैव पथा ततः संध्याभ्यवर्तत ॥ २२ ॥
विश्वामित्रोऽपि भगवांस्ताडकाबधतोषितः ।
मूर्ध्नि राममुपाघ्राय वचनं चेदमब्रवीत् ॥ २३ ॥
इहाद्य रजनीं राम वसामः शुभदर्शन ।
श्वः प्रभाते गमिष्यामस्तदाश्रमपदं मम ॥ २४ ॥

इत्यार्षे रामायणे आदिकाण्डे ताडकाबधो नाम
एकोनत्रिंशः सर्गः ॥

XXX.

अथ तां रजनीं व्युष्टां विश्वामित्रो महामुनिः ।
प्रहसन् राममाभाष्य मधुरं वाक्यमब्रवीत् ॥ १ ॥
तुष्टोऽस्मि राम भद्रं ते कर्मणा त्वत्कृतेन वै ।
प्रीतिदायं च दास्यामि सर्वाण्यस्त्राण्यशेषतः ॥ २ ॥
यान्यहं वेद्मि काकुत्स्थ पात्रं ह्येषां मतोऽसि मे ।
ब्रह्मास्त्रं प्रथमं राम दिव्यमेतद्ददामि ते ॥ ३ ॥
त्रयाणामपि लोकानां पिण्डितानां भयावहं ।
तथैव दण्डमस्त्रं ते प्रजासंहारकारकं ॥ ४ ॥
ददामि राम शत्रूणां येनाधृष्यो भविष्यसि ।
धर्मास्त्रं च महाबाहो कालकल्पं ददामि ते ॥ ५ ॥
कालास्त्रमपि चासह्यं ददामि दयितं विभो ।
विष्णुचक्रं च ते दिव्यमिन्द्रचक्रं च दारुणं ॥ ६ ॥
वज्रमस्त्रं च दुर्धर्षं शैवं शूलवरं तथा ।
अस्त्रं ब्रह्मशिरश्चोग्रमैशिकं च ददामि ते ॥ ७ ॥
शङ्करास्त्रं च दीप्तास्यं गृहाणेदं मयोद्यतं ।
गदाद्वयं चाप्रतिमं गृहाणारिभयावहं ॥ ८ ॥
कौमोदकीं चाप्रतिमां तथेमां लोहितामुखीं ।
धर्मपाशं तथैवास्त्रं कालपाशं च दुर्जयं ॥ ९ ॥

वारुणं चापि ते पाशं ददामि परमाद्भुतं ।
शुष्कार्द्रे चाशनी राम गृह्णाणेमे मयोद्यते ॥ १० ॥
पैनाकमपि चैवास्त्रमस्त्रं नारायणं तथा ।
आग्नेयमपि चासव्यं वायव्यं च ददामि ते ॥ ११ ॥
प्रमर्दनं प्रमथनं तथैवारिविदारणं ।
अस्त्रं हयशिरश्चैव कूटास्त्रं चापराजितं ॥ १२ ॥
शक्ती च द्वे गृह्णाणेमे अमोघां विजयां तथा ।
तथैव कालमुषलं कङ्कालमथ किङ्किणीं ॥ १३ ॥
प्रस्वापनं प्रशमनं स्तम्भनं च ददामि ते ।
वर्षणं शोषणं चैव तथैवारिनिकृन्तनं ॥ १४ ॥
मदनोन्मादने चैव कन्दर्पदयिते विभो ।
गान्धर्वास्त्रं तथैवेदं मोहनं च ददामि ते ॥ १५ ॥
तेजोद्युतिहरं सौरं शत्रुपक्षप्रतापनं ।
रक्षामिषादं पैशाचं कौवेरं च ददामि ते ॥ १६ ॥
राक्षसं चापि शत्रूणां श्रीधृतिप्राणनाशनं ।
मूर्छनं ताडनं चास्त्रं कम्पनं चारिकर्षणं ॥ १७ ॥
संवर्तमपि चावर्तं मौषलं च ददामि ते ।
सत्यं चैवानृतं चास्त्रं महामायास्त्रमेव च ॥ १८ ॥
अमोघं तैजसं चैव परतेजोऽपकर्षणं ।
सोमास्त्रं शिशिरं नाम त्वाष्ट्रं चारिव्यथाकरं ॥ १९ ॥

मानवं चास्त्रमजितं दैत्यं दानवमेव च ।
एवमादीनि चास्त्राणि ददामि दयितोऽसि मे ॥ २० ॥
गृहाणैतानि मत्तस्त्वमस्त्राणि च नृपात्मज ।
अथासौ प्राङ्मुखो भूत्वा शुचिर्मुनिवरस्तदा ॥ २१ ॥
ददौ रामाय सुप्रीतो ह्यस्त्रग्राममनुत्तमं ।
जपतोऽथ मुनेस्तस्य मन्त्रग्राममशेषतः ॥ २२ ॥
उपतस्थुर्महास्त्राणि मूर्तिमन्ति नृपात्मजं ।
ऊचुश्चैनं ततोऽभ्येत्य तान्यस्त्राणि समन्ततः ॥ २३ ॥
प्राञ्जलीनि महाबाहो शाध्यस्मानिति राघवं ।
तान्यवेक्ष्य ततो रामः समालभ्य च पाणिना ॥ २४ ॥
मां भजध्वं स्मृतानीति सर्वाण्येवाभ्यभाषत ।
तान्यवाप्य ततो रामो विश्वामित्रं महामुनिं ।
प्रणिपत्य यथान्यायं गमनाय मनो दधे ॥ २५ ॥

इत्यार्षे रामायणे आदिकाण्डे अस्त्रग्रामप्रदानं नाम
त्रिंशः सर्गः ॥

XXXI.

प्रतिगृह्य ततोऽस्त्राणि दिव्यानि प्रीतमानसः ।
गच्छन्नेव ततो रामो विश्वामित्रमुवाच ह ॥ १ ॥
गृहीतास्त्रोऽस्मि भगवन्नजेयस्त्रिदशैरपि ।
अस्त्राणां तु ममैतेषां संहारं वक्तुमर्हसि ॥ २ ॥
इत्युक्तवति रामेऽथ विश्वामित्रो महामुनिः ।
आचख्यौ परमास्त्राणां सरहस्यनिवर्तनं ॥ ३ ॥
उक्त्वा संहारमस्त्राणां रामायामिततेजसे ।
ददौ मन्त्रं जृम्भकानां वशीकरणमुत्तमं ॥ ४ ॥
सत्यवाक् सत्यकीर्तिश्च धृष्टो रभस एव च ।
प्रणिपातरसो नाम अवाङ्मुखपराङ्मुखौ ॥ ५ ॥
वृषाख्यो वृषकर्मा च रेणुकः पुरुषादकः ।
दशाक्षो दशवक्त्रश्च शतशीर्षः शतोदरः ॥ ६ ॥
पद्मनाभो महानाभः सुनाभो दुन्दुभिस्वनः ।
ज्योतिर्भानुः क्रथः कुम्भो मकरः क्रकरोऽङ्गदी ॥ ७ ॥
युगंधरस्तथानिद्रो भेत्ता प्रमथनः स्थिरः ।
धरो धन्यः कुम्भधरो रतिर्भूरतिरेव च ॥ ८ ॥
कामरूपी कामगमः कामहा काममर्दनः ।
जृम्भकः स्वर्णलाभश्च स्यन्दनो धावनस्तथा ॥ ९ ॥

कृशाश्वतनया ह्येते जृम्भकाः कामरूपिणः ।
भास्वरा रिपुसैन्यानां तेजोद्युतिहरास्तथा ॥ १० ॥
विनायका विघ्नकराः प्रयोक्तुर्विजयावहाः ।
एतानपि गृहाण त्वं सप्रयोगनिवर्तनान् ॥ ११ ॥
इत्युक्तो बाढमित्युक्त्वा विश्वामित्रात् तपोधनात् ।
जग्राह तानपि तथा स्तम्भकान् रिपुजृम्भकान् ॥ १२ ॥
दिव्यमूर्तिधरास्ते हि दिव्याभरणभूषिताः ।
ऊचुः प्राञ्जलयो रामं तदा मधुरभाषिणः ॥ १३ ॥
इमे स्म वशगा राम शाधि नस्त्वमिह स्थितान् ।
गम्यतां स्वागतं वोऽस्तु कृत्यकाल उपैष्यथ ॥ १४ ॥
स्मृता मामुपतिष्ठध्वमिति रामोऽभ्युवाच तान् ।
इत्युक्ता राममामन्त्र्य कृत्वा चापि प्रदक्षिणं ॥ १५ ॥
एवमस्त्विति चैवोक्त्वा प्रतिजग्मुर्यथागतं ।
तान् विसृज्य ततो रामो विश्वामित्रं महामुनिं ॥ १६ ॥
गच्छन्नेव पुनर्वाक्यं मधुराक्षरमब्रवीत् ।
किमेतन्मेघसंकाशं पर्वतस्याविदूरतः ॥ १७ ॥
वनमाभाति सुमहत् कस्यैतदमरद्युते ।
आभाति रमणीयं हि वनमेतन्मनोहरं ॥ १८ ॥
विनादितं वल्गुवाग्भिर्नानामृगगणान्वितं ।
निःसृताः स्म मुनिश्रेष्ठ कान्ताराल्लोमहर्षणात् ॥ १९ ॥

अनेनैवावगच्छामि देशोऽयं सुसुखोदयः ।
सुव्यक्तं चापि भवतः सिद्धाश्रमपदं वयं ।
संप्राप्ता यत्र तौ पापौ यज्ञविघ्नकरौ तव ॥ २० ॥

इत्यार्षे रामायणे आदिकाण्डे जृम्भकप्रदानं नाम
एकत्रिंशः सर्गः ॥

XXXII.

अथ तस्याप्रमेयस्य तद्वनं परिपृच्छतः ।
विश्वामित्रो महातेजा आख्यातुमुपचक्रमे ॥ १ ॥
एष पूर्वाश्रमो राम वामनस्य महात्मनः ।
सिद्धाश्रम इति ख्यातः सिद्धो यत्र महायशाः ॥ २ ॥
विष्णुर्वामनरूपेण तप्यमानो महत् तपः ।
त्रैलोक्यराज्येऽपहृते बलिनेन्द्रस्य राघव ॥ ३ ॥
अभिभूय हि देवेन्द्रं पुरा वैरोचनिर्बलिः ।
त्रैलोक्यराज्यं बुभुजे बलोत्सेकमदान्वितः ॥ ४ ॥
ततो बलौ तदा यज्ञं यजमाने भयार्दिताः ।
इन्द्रादयः सुरगणा विष्णुमूचुरिहाश्रमे ॥ ५ ॥
बलिर्वैरोचनिर्विष्णो यजतेऽसौ महाबलः ।
कामदः सर्वभूतानां महर्द्धिरसुराधिपः ॥ ६ ॥
तं त्वं वामनरूपेण गत्वा भिक्षितुमर्हसि ।
विक्रमांस्त्रीन् महाबाहो दाता हि नियतं स ते ॥ ७ ॥
भिक्षितो विक्रमानेतांस्त्रीन् वीर्यबलदर्पितः ।
परिभूय जगन्नाथं तुभ्यं वामनरूपिणे ॥ ८ ॥
ये ह्येनमभियाचन्ते लिप्समानाः स्वमीप्सितं ।
तान् कामैरीप्सितैः सर्वान् योजयत्यसुरेश्वरः ॥ ९ ॥

स त्वं त्रैलोक्यराज्यं नो हृतं भूयो जगत्पते ।
दातुमर्हसि निर्जित्य विक्रमैर्भूरिभिस्त्रिभिः ॥ १० ॥
अयं सिद्धाश्रमो नाम सिद्धकर्मा भविष्यति ।
तस्मिन् कर्मणि संसिद्धे तव सत्यपराक्रम ॥ ११ ॥
एवमुक्तः सुरैर्विष्णुर्वामनं रूपमास्थितः ।
वैरोचनिमुपागम्य त्रीनयाचत विक्रमान् ॥ १२ ॥
लब्ध्वा च त्रीन् क्रमान् विष्णुः कृत्वा रूपमथाद्भुतं ।
त्रिभिः क्रमैस्तदा लोकानाजहार त्रिविक्रमः ॥ १३ ॥
एकेन हि पदा कृत्स्नां पृथिवीं सोऽध्यतिष्ठत ।
द्वितीयेनाव्ययं व्योम द्यां तृतीयेन राघव ॥ १४ ॥
तं चासुरं बलिं कृत्वा पातालतलवासिनं ।
त्रैलोक्यराज्यमिन्द्राय ददावुद्धृत्य कण्टकं ॥ १५ ॥
तेनैव पूर्वाध्युषित आश्रमः पुण्यकर्मणा ।
मयापि भक्त्या तस्यैव वामनस्य निषेव्यते ॥ १६ ॥
अत्र तौ राक्षसौ वीर यज्ञविघ्नकरौ मम ।
हन्तव्यौ स्वेन वीर्येण त्वया नरवरात्मज ॥ १७ ॥
एतदेवाभिगच्छामः सिद्धाश्रमपदं वयं ।
स्वमाश्रमपदं राम तवाप्येतद्यथा मम ॥ १८ ॥
तान् दृष्ट्वाभ्यागतान् दूरात् सिद्धाश्रमनिवासिनः ।
प्रत्युद्गम्य महात्मानं विश्वामित्रमपूजयन् ॥ १९ ॥

प्रविष्टाय ददुश्चास्मै पाद्यार्घ्यासनसत्क्रियां ।
रामलक्ष्मणयोश्चापि सत्क्रियां प्रददुर्द्विजाः ॥ २० ॥
मुहूर्तमथ विश्रान्तौ ततस्तौ रामलक्ष्मणौ ।
तमूचतुर्मुनिवरं विश्वामित्रं कृताञ्जली ॥ २१ ॥
अद्यैव दीक्षां प्रविश भद्रं ते मुनिपुंगव ।
सिद्धाश्रमोऽयं सिद्धोऽस्तु संसिद्धे तव कर्मणि ॥ २२ ॥
तयोरेतद्वचः श्रुत्वा विश्वामित्रो महामुनिः ।
आदिदेश तथेत्युक्त्वा दीक्षां तदहरेव तु ॥ २३ ॥
रामोऽपि तां तत्र निशामुषित्वा सहलक्ष्मणः ।
प्रभातकाले चोत्थाय विश्वामित्रमवन्दत ॥ २४ ॥

इत्यार्षे रामायणे आदिकाण्डे सिद्धाश्रमनिवासो नाम
द्वात्रिंशः सर्गः ॥

XXXIII.

अथार्थकालदेशज्ञो रामः सत्यपराक्रमः ।
कालयुक्तमिदं वाक्यं विश्वामित्रमुवाच ह ॥ १ ॥
भगवन् श्रोतुमिच्छामि कस्मिन् काले निशाचरौ ।
मया तौ प्रतिषेद्धव्यौ यज्ञविघ्नकरौ तव ॥ २ ॥
रामस्य तद्वचः श्रुत्वा विश्वामित्रादयस्तथा ।
सर्वे ते मुनयः प्रीताः प्रशशंसुरथाब्रुवन् ॥ ३ ॥
अद्यप्रभृति राम त्वं षड्रात्रं रक्ष तत्परः ।
दीक्षां गतो ह्येष मुनिर्मौनं संकल्पयिष्यति ॥ ४ ॥
तेषामेतद्वचः श्रुत्वा मुनीनां भावितात्मनां ।
उद्यम्य कार्मुकं तस्थौ रामस्तत्र सलक्ष्मणः ॥ ५ ॥
अनिद्र एव षड्रात्रं स संरक्षन् मुनेः क्रतुं ।
राक्षसागमनाकाङ्क्षी निश्चलः स्थाणुवत् स्थितः ॥ ६ ॥
कालेऽथाभ्यागते तस्मिन् षष्ठेऽहनि महात्मनः ।
स्थापयां चक्रिरे वेदीं मुनयः संशितव्रताः ॥ ७ ॥
मन्त्राज्यवांश्च विधिवत् स यज्ञः समवर्तत ।
प्रजज्वाल च सा वेदी सोपाध्यायसमाहिता ॥ ८ ॥
अथाकाशे समभवत् सहसैव महास्वनः ।
नीलाम्बुदस्य गगणे प्रावृषीवाभिगर्जतः ॥ ९ ॥

तथा मायां प्रकुर्वाणौ राक्षसावभ्यधावतां ।
मारीचश्च सुबाहुश्च तयोश्चानुचरास्तथा ॥ १० ॥
स तानापततो दृष्ट्वा रुधिरौघप्रवर्षिणः ।
उवाच लक्ष्मणं वाक्यं रामो राजीवलोचनः ॥ ११ ॥
पश्य लक्ष्मण मारीचं महाशनिसमस्वनं ।
सपदानुगमायान्तं सुबाहुं च निशाचरं ॥ १२ ॥
एतावद्य मया पश्य नीलाञ्जनचयोपमौ ।
अस्मिन् क्षणे समाधूतावनिलेनाम्बुदाविव ॥ १३ ॥
मानवास्त्रं ततो रामः प्रगृह्यास्त्रविशारदः ।
मारीचोरसि चिक्षेप नातिकोपसमन्वितः ॥ १४ ॥
स तेन शरवेगेन नीतः सागरमूर्धनि ।
पपाताचलसंकाशो भीवेपथुसमन्वितः ॥ १५ ॥
विचेतनं घूर्णमानं मानवास्त्रबलेरितं ।
मारिचं पतितं दृष्ट्वा रामो लक्ष्मणमब्रवीत् ॥ १६ ॥
पश्य लक्ष्मण मारीचं मानवेन समाहतं ।
मोहयित्वानयद्दूरं न च प्राणैर्व्ययोजयत् ॥ १७ ॥
इमांस्त्वन्यान् हनिष्यामि सुबाहुप्रभृतीन् रुषा ।
यज्ञघ्नान् राक्षसान् घोरान् रुधिरामिषभोजनान् ॥ १८ ॥
प्रगृह्यास्त्रमथो दिव्यमाग्नेयं रघुनन्दनः ।
सुबाहूरसि चिक्षेप स विद्धो न्यपतद्भुवि ॥ १९ ॥

अन्यान्यपि च वायव्यमस्त्रमादाय राघवः ।
निजघान स रक्षांसि मुनीनां वर्धयन् मुदं ॥ २० ॥
एवं कृत्वा स रक्षांसि तत्र रामो महायशाः ।
समेत्य मुनिभिः सर्वैर्विश्वामित्रादिभिस्तदा ॥ २१ ॥
पूजितोऽभिष्टुतश्चैव जयेन च स भाजितः ।
विस्मिताश्चाभवन् सर्वे मुनयो रामकर्मणा ॥ २२ ॥
तस्मिन् यज्ञे समाप्तेऽथ विश्वामित्रो महायशाः ।
दृष्ट्वाश्रमं कृतक्षेमं काकुत्स्थमिदमब्रवीत् ॥ २३ ॥
कृतार्थोऽस्मि महाबाहो कृतं गुरुवचस्त्वया ।
सिद्धाश्रमपदं चेदं भूयः सिद्धतरं कृतं ॥ २४ ॥

इत्यार्षे रामायणे आदिकाण्डे विश्वामित्रयज्ञो नाम
त्रयस्त्रिंशः सर्गः ॥

XXXIV.

अथ तौ रजनीं तत्र कृतार्थौ रामलक्ष्मणौ ।
ऊषतुर्मुदितौ वीरौ मुनिभिः प्रतिपूजितौ ॥ १ ॥
प्रभातायां च शर्वर्यां कृतपौर्वाह्णिकक्रियौ ।
विश्वामित्रमृषींश्चान्यान् राघवावभ्यवन्दतां ॥ २ ॥
अभिवाद्य मुनीन् सर्वांस्तांश्च तावमरद्युती ।
ऊचतुर्मधुरोदारभाषिणौ रघुनन्दनौ ॥ ३ ॥
इमौ द्वौ मुनिशार्दूल किङ्करौ समुपस्थितौ ।
आज्ञापय यथेष्टं नौ पुनः किं करवाव हे ॥ ४ ॥
एवमुक्तास्ततस्ताभ्यामृषयस्ते तपोधनाः ।
विश्वामित्रं पुरस्कृत्य रामं वचनमब्रुवन् ॥ ५ ॥
मैथिलस्य रघुश्रेष्ठ जनकस्य भविष्यति ।
यज्ञः परमधर्मिष्ठो यास्यामस्तत्र वै वयं ॥ ६ ॥
त्वं चापि नरशार्दूल सहास्माभिर्गमिष्यसि ।
रत्नं महाद्भुतं तत्र धनुस्तद्द्रष्टुमर्हसि ॥ ७ ॥
प्राग्दत्तं किल तत् तस्य न्यासभूतं महद्धनुः ।
देवासुरे तदा युद्धे वृत्ते देवैः सवासवैः ॥ ८ ॥
तन्न देवा न गन्धर्वा न यक्षोरगराक्षसाः ।
समापूरयितुं शक्ताः कुत एवेतरे जनाः ॥ ९ ॥

धनुषः सारतां तस्य जिज्ञासन्तो नराधिपाः ।
न शेकुरातोलयितुमपि पूरयितुं कुतः ॥ १० ॥
तद्धनुर्नरशार्दूल मैथिलस्य महात्मनः ।
यज्ञे द्रक्ष्यसि काकुत्स्थ सहास्माभिरितो गतः ॥ ११ ॥
तथेत्युक्त्वा ततो रामः प्रयातुमुपचक्रमे ।
विश्वामित्रपुरोगैस्तैर्महर्षिभिरुदारधीः ॥ १२ ॥
विश्वामित्रोऽथ भगवानामन्त्र्य वनदेवताः ।
उवाचेदं ततो वाक्यं यियासुर्मिथिलां प्रति ॥ १३ ॥
स्वस्ति वोऽस्तु गमिष्यामि सिद्धः सिद्धाश्रमादितः ।
उत्तरं जाह्नवीतीरं हिमवन्तं शिलोच्चयं ॥ १४ ॥
प्रदक्षिणमुपावृत्य ततः सिद्धाश्रमं मुनिः ।
उत्तरां दिशमास्थाय पन्थानमुपचक्रमे ॥ १५ ॥
युक्तं ब्रह्मरथानां तु शतमात्रं ततः क्षणात् ।
ययुर्मुनीनां भाण्डानि समारोप्यानुयायिनां ॥ १६ ॥
मृगपक्षिगणाश्चैव सिद्धाश्रमनिवासिनः ।
प्रयान्तमनुजग्मुस्तं विश्वामित्रं महामुनिं ॥ १७ ॥
ते गत्वा दूरमध्वानं लम्बमाने दिवाकरे ।
वासं चक्रुर्मुनिगणाः शोणातीरमुपाश्रिताः ॥ १८ ॥
गते त्वस्तं दिनकरे स्नाता हुतहुताशनाः ।
विश्वामित्रं पुरस्कृत्य निषेदुरमितौजसः ॥ १९ ॥

रामोऽपि सहसौमित्रिरभिवाद्य तपोधनं ।
निषसादाभितस्तस्य विश्वामित्रस्य धीमतः ॥ २० ॥
अथ रामोऽञ्जलिं कृत्वा विश्वामित्रमृषिं तदा ।
पप्रच्छ नरशार्दूलः कौतूहलसमन्वितः ॥ २१ ॥
भगवन् को न्वयं देशः समृद्धजनसेवितः ।
श्रोतुमिच्छामि तत्वेन वत्त एव महामुने ॥ २२ ॥
चोदितो रामवाक्येन तस्य देशस्य विस्तरं ।
विश्वामित्रो महातेजा व्याहर्तुमुपचक्रमे ॥ २३ ॥

इत्यार्षे रामायणे आदिकाण्डे शोणातीरनिवासो नाम
चतुस्त्रिंशः सर्गः ॥

XXXV.

ब्रह्मयोनिर्महानासीत् कुशो नाम नराधिपः ।
स सुतान् जनयामास चतुरः ख्यातविक्रमान् ॥ १ ॥
कुशाश्वं कुशनाभं च अमूर्तरजसं वसुं ।
महात्मनो दीप्तिमतः क्षत्रधर्मपरायणान् ॥ २ ॥
तानुवाच कुशः पुत्रान् विनीतान् श्रुतपारगान् ।
प्रजानां पालनं पुत्राः क्रियतामिति राघव ॥ ३ ॥
पितुस्ते वचनं श्रुत्वा लोकपालोपमाः सुताः ।
पुराण्यावासयामासुः पृथक् चत्वारि राघव ॥ ४ ॥
तेषां कुशाश्वः कौशाम्बीं पुरीमावासयच्छुभां ।
कुशनाभस्तु धर्मात्मा पुरं चक्रे महोदयं ॥ ५ ॥
तथामूर्तरजा वीरश्चक्रे प्राग्ज्योतिषं पुरं ।
धर्मारण्यसमीपस्थं वसुश्चक्रे गिरिव्रजं ॥ ६ ॥
देशोऽयं वसु नामासीद्वसोरमिततेजसः ।
एते शैलवराः पञ्च प्रकाशन्ते महोच्छ्रयाः ॥ ७ ॥
सुमागधी नदी चात्र मगधा विश्रुता यया ।
पञ्चानां शैलमुख्यानां मध्ये मालेव शोभते ॥ ८ ॥
एषा सा मागधी नाम वसो राम महात्मनः ।
पूर्वमध्यासिता तेन सुक्षेत्रा सस्यमालिनी ॥ ९ ॥

कुशनाभोऽथ राजर्षिः कन्याशतमनुत्तमं ।
जनयामास दुर्धर्षो घृताच्यां रघुनन्दन ॥ १० ॥
रूपयौवनशालिन्यस्ताः कदाचित् स्वलंकृताः ।
उद्यानभूमिमागम्य चिक्रीडुर्विद्युतो यथा ॥ ११ ॥
गायन्त्यो नृत्यमानाश्च वादयन्त्यश्च राघव ।
आमोदं परमं जग्मुर्गन्धमाल्यैरलंकृताः ॥ १२ ॥
अथ ताश्चारुसर्वाङ्गी रूपेणाप्रतिमा भुवि ।
दृष्ट्वा तु सर्वगो वायुरिदं वचनमब्रवीत् ॥ १३ ॥
अहं वः कामये सर्वा भार्या भवत मेऽबलाः ।
त्यक्त्वा मानुष्यकं भावममरत्वमवाप्स्यथ ॥ १४ ॥
तस्य तद्वचनं श्रुत्वा वायोः परममङ्गनाः ।
मुक्त्वा हासं ततः सर्वा वायुं वचनमब्रुवन् ॥ १५ ॥
अन्तश्चरसि भूतानां सर्वेषां किल मारुत ।
प्रभावज्ञाः स्म ते सर्वाः किमस्मानवमन्यसे ॥ १६ ॥
कुशनाभसुताः सर्वाः क्षमं ते न हि मारुत ।
स्थानाद्भ्रंशयितुं देव रक्षामः स्वकुलं वयं ॥ १७ ॥
मा भूत् स कालो यद्वायो पितरं सत्यवादिनं ।
कामतः समतिक्रम्य वरयेम स्वयंवरं ॥ १८ ॥
पितास्माकं प्रभवति दैवतं नः परं पिता ।
अस्मान् दास्यत्यसौ यस्मै स नो भर्ता भविष्यति ॥ १९ ॥

तासां तद्वचनं श्रुत्वा वायुः कोपसमन्वितः ।
बभञ्ज कन्या मध्ये ताः स प्रविश्यात्मतेजसा ॥ २० ॥
ताः कन्या वायुना भग्ना विविशुर्भवनं पितुः ।
प्रापतन् भुवि संभ्रान्ताः सलज्जाः साश्रुलोचनाः ॥ २१ ॥
स च ता दयिता दीनाः कन्याः परमशोभनाः ।
दृष्ट्वा भग्नास्तदा राजा संभ्रान्त इदमब्रवीत् ॥ २२ ॥
किमिदं कथ्यतां पुत्र्यः को धर्ममवमन्यते ।
कुब्जाः केन कृता यूयं समाविश्य दुरात्मना ॥ २३ ॥
तस्य तद्वचनं श्रुत्वा कुशनाभस्य धीमतः ।
शिरोभिश्चरणौ गत्वा कन्याशतमभाषत ॥ २४ ॥
वायुरस्मानुपागम्य बलवान् काममोहितः ।
उत्क्रम्य धर्ममर्यादां प्रधर्षयितुमुद्यतः ॥ २५ ॥
सोऽस्माभिरुक्तः सर्वाभिर्वायुः कामवशं गतः ।
पितृमत्यः स्म भगवन् न स्वच्छन्दचरा वयं ॥ २६ ॥
पितरं नोऽभियाच त्वं न्यायतो यदि मन्यसे ।
न वयं स्वैरचारिण्यः प्रसीद भगवन्निति ॥ २७ ॥
इत्युक्तः कुपितो वायुः प्रविश्याङ्गानि नः प्रभो ।
बभञ्ज बलवांस्तेन सर्वाः कुब्जीकृता वयं ॥ २८ ॥
इति तासां वचः श्रुत्वा कुशनाभो नराधिपः ।
प्रत्युवाच ततो राम कन्याशतमिदं वचः ॥ २९ ॥

यत् क्षान्तोऽतिक्रमो वायोः कृतं तन्मे महत् प्रियं ।
पुत्र्यो मे यच्च युष्माभिः कुलच्छायाभिरक्षिता ॥ ३० ॥
अलंकारो हि नारीणां क्षमा पुत्र्यो विशेषतः ।
देवानां च विशेषेण क्षन्तव्यमिति मे मतिः ॥ ३१ ॥
सुकृतं च कृतं मन्ये यद्वायोः क्षान्तमीदृशं ।
व्यभिचारकृतं यस्मात् प्रीतोऽहं तेन सुव्रताः ॥ ३२ ॥
प्रदानसमयं चैव मन्येऽहं वोऽद्य सर्वशः ।
गम्यतामिष्टतः पुत्र्यश्चिन्तयिष्यामि वो हितं ॥ ३३ ॥
विसृज्य चैव ताः कन्यास्ततः स नृपसत्तमः ।
तासां प्रदानं धर्मज्ञो मन्त्रयामास मन्त्रिभिः ॥ ३४ ॥
यद्वायुना च ताः कन्यास्तत्र कुब्जीकृताः पुरा ।
कन्यकुब्जमिति ख्यातं ततःप्रभृति तत् पुरं ॥ ३५ ॥
एतस्मिन्नेव काले तु चूली नाम महानृषिः ।
ऊर्ध्वरेता ब्रह्मचर्यं चचार किल दुश्चरं ॥ ३६ ॥
तं ब्रह्मचारिणं राम तप्यमानं महत् तपः ।
सोमदा नाम गन्धर्वी ऊर्णायुदुहिता तदा ॥ ३७ ॥
नियमं परमास्थाय सम्यक् परिचचार ह ।
पुत्रार्थिनी ततो राम महर्षेर्भावितात्मनः ॥ ३८ ॥
साभवत् प्रयता भूत्वा शुश्रूषणपरायणा ।
स तां कालस्य महतः प्रोवाच परितोषितः ॥ ३९ ॥

परितुष्टोऽस्म्यहं भद्रे ब्रूहि किं करवाणि ते ।
परितुष्टं मुनिं ज्ञात्वा गन्धर्वी मधुराक्षरं ॥ ४० ॥
उवाच प्राञ्जलिर्भूत्वा वाक्यमत्मविदं तदा ।
दीप्यसे परया लक्ष्म्या ब्राह्म्या त्वमनया यथा ॥ ४१ ॥
तथाहं पुत्रमिच्छामि त्वत्तो ब्राह्म्या श्रियावृतं ।
स्वयं च वरये त्वाहं भर्तारमपरिग्रहा ॥ ४२ ॥
अनन्यपूर्वां भज मां याचमानां दृढव्रत ।
तस्यै प्रसन्नो विप्रर्षिर्ददौ पुत्रं यथेप्सितं ॥ ४३ ॥
ब्रह्मदत्त इति ख्यातः सोऽभवद्बलिनः सुतः ।
ब्रह्मदत्तः स राजर्षिः पुरीमध्यावसत् तदा ॥ ४४ ॥
काम्पिल्यां नाम काकुत्स्थ देवराजसमद्युतिः ।
तं श्रुत्वा परया लक्ष्म्या कुशनाभोऽन्वितं नृपं ॥ ४५ ॥
ब्रह्मदत्ताय ताः कन्याः प्रदातुमुपचक्रमे ।
स तमाहूय धर्मज्ञो ब्रह्मदत्तं महीपतिं ॥ ४६ ॥
ददौ कन्याशतं तस्मै सुप्रीतेनान्तरात्मना ।
यथाक्रमं स सर्वासां तासामनुपमद्युतिः ॥ ४७ ॥
जग्राह विधिवत् पाणीन् ब्रह्मदत्तो नराधिपः ।
तेन च स्पृष्टमात्रेषु ताः पाणिषु गतव्यथाः ॥ ४८ ॥
बभूवुः सर्वशः कन्या रूपौदार्यगुणान्विताः ।
ता दृष्ट्वा वायुना मुक्ताः कुशनाभो महीपतिः ॥ ४९ ॥

विस्मयं परमं चक्रे मुमुदेऽभिननन्द च ।
कृतोद्वाहं तु राजानं ब्रह्मदत्तं रघूत्तम ॥५०॥
सदारं प्रेषयामास स्वपुरं परमार्चितं ।
तं तदा सदृशैर्दारैरन्वितं पुत्रमागतं ।
मुमुदे सोमदा प्रीता दृष्ट्वा साभिननन्द च ॥५१॥

इत्यार्षे रामायणे आदिकाण्डे ब्रह्मदत्तविवाहो नाम
पञ्चत्रिंशः सर्गः ॥

XXXVI.

कृतोद्वाहे गते तस्मिन् ब्रह्मदत्ते नराधिपे ।
अपुत्रः कुशनाभोऽथ पुत्रीयामिष्टिमाहरत् ॥ १ ॥
तस्यां च वर्तमानायां कुशनाभमुपागतः ।
कुशो ब्रह्मसुतः पुत्रमुवाच स तदा नृपं ॥ २ ॥
पुत्रस्ते सदृशः पुत्र भविता न चिरादिव ।
गाधिः प्राप्स्यसि तेन त्वं कीर्तिं लोकेषु शाश्वतीं ॥ ३ ॥
एवमुक्त्वा कुशो राम कुशनाभं महीपतिं ।
जगामाकाशमाविश्य पुनरेव यथागतं ॥ ४ ॥
कस्यचित् त्वथ कालस्य कुशनाभस्य धीमतः ।
अजायत सुतो राम गाधिर्नाम महायशाः ॥ ५ ॥
स पिता मम धर्मात्मा गाधिः सत्यपराक्रमः ।
कुशवंशेऽभवद्राजा गाधिजोऽहं रघूत्तम ॥ ६ ॥
अनुजा भगिनी चापि मम जज्ञे शुभव्रता ।
नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता ॥ ७ ॥
भर्तृव्रतत्वाद्भर्त्रैव सह गत्वा सुरालयं ।
कौशिकी परमोदारा सा प्रवृत्ता महानदी ॥ ८ ॥

स्वर्ग्या पुण्योदका रम्या हिमवन्तमुपाश्रिता ।
इयं पावयितुं लोकान् प्रवृत्ता भगिनी मम ॥ ९ ॥
अतोऽहं हिमवत्पार्श्वे वसामि निरतः सुखी ।
भगिन्याः स्नेहतो राम कौशिक्या नियतव्रतः ॥ १० ॥
सैषा सत्यवती पुण्या सत्यधर्मपरायणा ।
पतिव्रता महाभागा कौशिकी सरितां वरा ॥ ११ ॥
अहं च नियमं कञ्चिदास्थातुं रघुनन्दन ।
सिद्धाश्रममनुप्राप्तः सिद्धोऽस्मि तव तेजसा ॥ १२ ॥
एषा राम ममोत्पत्तिः स्वस्य वंशस्य कीर्तिता ।
देशस्य चास्य निर्वृत्तिर्यन्मां त्वं परिपृच्छसि ॥ १३ ॥
स्थितोऽर्धरात्रः काकुत्स्थ कथां कथयतो मम ।
निद्रां भजस्व भद्रं ते विघ्ननाशोऽध्वनोऽस्तु नः ॥ १४ ॥
निष्पन्दास्तरवः सर्वे संलीना मृगपक्षिणः ।
नैशेन तमसा व्याप्ता दिशश्च रघुनन्दन ॥ १५ ॥
सूक्ष्मेणाञ्जनचूर्णेन नभः कृत्स्नमिवाञ्जितं ।
ग्रहनक्षत्रताराभिः काञ्चनीभिरिवावृतं ॥ १६ ॥
उदेति चासौ शीतांशुर्लोककान्तो निशाकरः ।
अंशुभिः स्वैर्जगत् स्वच्छैर्घर्मार्तं ह्लादयन्निव ॥ १७ ॥
निशाचराणि सत्त्वानि धृष्टं परिचरन्ति च ।
यक्षरक्षोगणाश्चैव ये चान्ये पिशिताशनाः ॥ १८ ॥

एवमुक्का तु कौशिक्यो विरराम महामुनिः ।
साधु साधिति तं सर्वे मुनयः प्रशशंसिरे ।। ११ ।।

इत्यार्षे रामायणे आदिकाण्डे विश्वामित्रवंशवर्णनं नाम
षट्त्रिंशः सर्गः ।।

XXXVII.

ते रात्रिशेषं सुषुपुः शोणतीरे मकर्षयः ।
प्रभातायां च शर्वर्यां विश्वामित्रोऽभ्यभाषत ॥ १ ॥
कौशल्यामातरुत्तिष्ठ सुप्रभाता कि ते निशा ।
पूर्वां संध्यामुपास्यैनां गमनायाभिरोचय ॥ २ ॥
तच्छ्रुत्वोत्थाय रामोऽपि कृत्वा पौर्वाह्निकीं क्रियां ।
गमनं रोचयामास वचनं चेदमब्रवीत् ॥ ३ ॥
अयं शोणः शुचिजलोऽगाधः पुलिनमण्डितः ।
कतमेन पथा ब्रह्मंस्तरिष्याम इमं वयं ॥ ४ ॥
इत्युक्तः प्रत्युवाचाथ विश्वामित्र इदं वचः ।
रामं कमलपत्राक्षं तदा संकर्षयन्निव ॥ ५ ॥
गाध एष मकाबाको तरिष्यामो यथा सुखं ।
एष पन्था मयोद्दिष्टो येन यान्ति मकर्षयः ॥ ६ ॥
ते गत्वा दूरमध्वानं गते च दिवसे तदा ।
जाह्नवीं सरितां श्रेष्ठां ददृशुः परमर्षयः ॥ ७ ॥
तां ते शुचिजलां दृष्ट्वा कंससारससेवितां ।
बभूवुर्मुदिताः सर्वे मुनयः सकराघवाः ॥ ८ ॥
तस्यास्तीरे तदा चक्रुस्तत्रावासपरिग्रकं ।
ततः स्नात्वा यथाकालं संतर्प्य पितृदेवताः ॥ ९ ॥

हुत्वा चैवाग्निहोत्राणि प्राश्य चामृतवद्धविः ।
विविशुर्जाह्नवीतीरे शुचौ मुदितमानसाः ॥ १० ॥
विश्वामित्रं महात्मानं परिवार्य समन्ततः ।
अथ तत्र तदा रामो विश्वामित्रमभाषत ॥ ११ ॥
भगवन् श्रोतुमिच्छामि यथेयं सरितां वरा ।
त्रैलोक्यपावनी गङ्गा गता नदनदीपतिं ॥ १२ ॥
चोदितो रामवाक्येन विश्वामित्रो महामुनिः ।
जन्मप्रभृति गङ्गायाः प्रोवाच प्रभवागमं ॥ १३ ॥
शैलेन्द्रो हिमवान् राम रत्नाकरसमन्वितः ।
तस्य कन्याद्वयं जज्ञे रूपेणाप्रतिमं भुवि ॥ १४ ॥
मेरोस्तु दुहिता राम तयोर्माता सुमध्यमा ।
मेना मनोरमा देवी पत्नी हिमवतोऽभवत् ॥ १५ ॥
तस्यां गङ्गेयमभवज्ज्येष्ठा हिमवतः सुता ।
उमा नाम द्वितीयाभूत् कन्या तस्यैव राघव ॥ १६ ॥
अथ ज्येष्ठां हिमवतः सुतां गङ्गामनिन्दितां ।
वरयां चक्रिरे देवा आत्मकार्यचिकीर्षवः ॥ १७ ॥
ददौ चापि स धर्मेण तेभ्यस्त्रैलोक्यपावनीं ।
स्वच्छन्दपथगां देवीं सुतां गङ्गां महानदीं ॥ १८ ॥
प्रतिगृह्य च गङ्गां ते त्रैलोक्यपथचारिणीं ।
यथागतं ययुर्देवास्ततः पूर्णमनोरथाः ॥ १९ ॥

या तु शैलेन्द्रदुहिता द्वितीया रघुनन्दन ।
सोग्रं व्रतमुपाश्रित्य तपस्तेपे तपोधना ॥ २० ॥
तामप्युग्रतपःसिद्धां ददौ शैलवरः सुतां ।
रुद्राय याचमानाय उमां लोकनमस्कृतां ॥ २१ ॥
इत्येते शैलराजस्य सुते राम बभूवतुः ।
गङ्गा च सरितां ज्येष्ठा देवीनां चाप्युमा वरा ॥ २२ ॥
तत्र पावयितुं लोकानिमांस्त्रीन् स्वेन तेजसा ।
गङ्गा प्रवर्तते राम सर्वभूतहिते रता ॥ २३ ॥

इत्यार्षे रामायणे आदिकाण्डे गङ्गोत्पत्तिर्नाम
सप्तत्रिंशः सर्गः ॥

XXXVIII.

उक्तवाक्ये मुनौ तस्मिन् रामः पप्रच्छ तं पुनः ।
विश्वामित्रं सुखासीनं महात्मानं कृताञ्जलिः ॥ १ ॥
कथेयं कथिता ब्रह्मन् पुण्यश्रवणकीर्तना ।
या त्वया तां पुनः श्रोतुमिच्छामि बहुविस्तरां ॥ २ ॥
उमा केनाभवद्देवी कौमारव्रतचारिणी ।
अवाप देवप्रवरं पतिं भूतमहेश्वरं ॥ ३ ॥
हेतुना केन चैवेयं गङ्गा त्रिपथगाभवत् ।
कथं देवनदी चेयं मानुषान् समुपागता ॥ ४ ॥
त्रिषु लोकेषु धर्मज्ञ कैश्च धर्मैरधिष्ठिता ।
एवं ब्रुवति काकुत्स्थे विश्वामित्रो महातपाः ॥ ५ ॥
विस्तरेण कथामेतां व्याख्यातुमुपचक्रमे ।
पुरा राम कृतोद्वाहः शितिकण्ठो महातपाः ॥ ६ ॥
उमा च स्पर्धया देवी मैथुनायोपजग्मतुः ।
शितिकण्ठस्य देव्याश्च दिव्यं वर्षशतं गतं ॥ ७ ॥
न चैवैकतरस्यासीत् ततो राम पराजयः ।
ततो देवा ययुश्चिन्तां पितामहपुरोगमाः ॥ ८ ॥
यदत्रोत्पत्स्यते भूतं सोढा कोऽस्य भविष्यति ।
तेऽभिगम्य सुराः सर्वे प्रणिपत्य वृषध्वजं ॥ ९ ॥

शितिकण्ठं महात्मानमिदं वचनमब्रुवन् ।
देवदेव महाभाग सर्वभूतहिते रत ॥ १० ॥
सुराणां प्रणिपातेन प्रसादं कर्तुमर्हसि ।
न तेऽपत्यं धारयितुं शक्तेयं पृथिवी विभो ॥ ११ ॥
न लोकाः सर्वशश्चेमे सोढुं ते वीर्यसंभवं ।
आत्मनैवात्मनस्तेजस्त्वं धारयितुमर्हसि ॥ १२ ॥
महान्यैव देव्या त्वं ब्रह्मचारी भवेश्वर ।
अस्माकं च धरायाश्च लोकानां चानुकम्पया ॥ १३ ॥
धारयात्मभवं तेजः स्वयमेवोमया सह ।
मिश्रतां हि गतं तेजस्तवोमायाश्च शङ्कर ॥ १४ ॥
सादयेदपि लोकांस्त्रीन् सदेवर्षिनरोरगान् ।
तस्मात् त्वं धारयात्मानं त्रैलोक्यहितकाम्यया ॥ १५ ॥
रक्ष लोकानिमान् देव न लोकान् हन्तुमर्हसि ।
इति तेषां वचः श्रुत्वा देवानां भगवान् शिवः ॥ १६ ॥
शिवेन मनसा युक्तो देवान् वचनमब्रवीत् ।
धारयिष्याम्यहं तेजः समुद्भूतं सहोमया ॥ १७ ॥
निर्वृता भवतेत्येवं पुनश्चेदमुवाच ह ।
यदिदं क्षुभितं स्थानान्मम तेजो ह्यनुत्तमं ॥ १८ ॥
धारयिष्यति कस्तन्मे प्रोच्यतां सुरसत्तमाः ।
एवमुक्तास्ततो देवाः प्रत्यूचुर्वृषभध्वजं ॥ १९ ॥

यत् तव क्षुभितं तेजस्तद्धरा धारयिष्यति ।
एवमुक्तः सुरश्रेष्ठः प्रमुमोच महीतले ॥ २० ॥
तेजस्तत् पृथिवी येन व्याप्ता सगिरिकानना ।
ततो देवाः पुनरिदमूचुः सर्वे हुताशनं ॥ २१ ॥
प्रविश त्वं महातेजो रौद्रं वायुसमन्वितः ।
तदग्निना पुनर्व्याप्तं तज्जातः श्वेतपर्वतः ॥ २२ ॥
दिव्यं शरवणं चैव पावकादित्यसंनिभं ।
यत्र जातो महातेजाः कार्त्तिकेयोऽग्निसंभवः ॥ २३ ॥
ततो देवीं शिवं चैव देवाः सर्वेऽभ्यपूजयन् ।
प्रह्वा नतशिरःकायाः साधु साध्विति चाब्रुवन् ॥ २४ ॥
अथ शैलसुता राम त्रिदशानभिवीक्ष्य तान् ।
समन्युरशपत् सर्वान् क्रोधसंरक्तलोचना ॥ २५ ॥
यस्मादपत्यं सदृशममरा मम नेच्छथ ।
अपत्यं स्वेषु दारेषु यूयं नोत्पादयिष्यथ ॥ २६ ॥
उक्त्वा चैवं सुरान् सर्वान् शशाप पृथिवीमपि ।
त्वमप्यूषरसंकीर्णा भविष्यसि वसुंधरे ॥ २७ ॥
न चापत्यकृतां प्रीतिं मत्क्रोधकलुषीकृता ।
प्राप्स्यसि त्वमपीच्छन्ती न चापत्यमभीप्सितं ॥ २८ ॥
तां दृष्ट्वा व्यथितां देवीमुमां देवो महेश्वरः ।
गन्तुं समुपचक्राम दिशं वरुणपालितां ॥ २९ ॥

स गत्वा तप आतिष्ठदुत्तमं संशितव्रतः ।
हिमवत्प्रभवे शृङ्गे सह देव्या महेश्वरः ॥ ३० ॥
एष ते विस्तरो राम शैलपुत्र्या निवेदितः ।
गङ्गायाः शृणु कार्त्स्न्येन प्रभावं सहलक्ष्मणः ॥ ३१ ॥

इत्यार्षे रामायणे आदिकाण्डे उमामाहात्म्यं नाम
अष्टात्रिंशः सर्गः ॥

XXXIX.

तपस्तप्यति देवेशे त्र्यम्बके विबुधास्ततः ।
सेनापतिमभीप्सन्तः पितामहमुपागमन् ॥ १ ॥
अब्रुवंश्च सुराः सर्वे भगवन्तं पितामहं ।
प्रणिपत्याञ्जलिं बद्ध्वा सेन्द्रा वह्निपुरोगमाः ॥ २ ॥
यो नः सेनापतिर्देव दत्तो भगवता पुरा ।
स ब्रह्मचर्यमास्थाय तपस्तेपे सहोमया ॥ ३ ॥
यदत्रानन्तरं कार्यं सर्वलोकपितामह ।
तत् कुरुष्व भृशार्तानां त्वं हि नः परमा गतिः ॥ ४ ॥
देवानां वचनं श्रुत्वा सर्वलोकनमस्कृतः ।
ब्रह्मा मधुरया वाचा त्रिदशानिदमब्रवीत् ॥ ५ ॥
यथा हि यूयमुमया शप्ताः सासूयया पुरा ।
तथा तद्वचनं देवा न शक्यं कर्तुमन्यथा ॥ ६ ॥
इयं त्वाकाशगा गङ्गा शैलराजसुता परा ।
उमाया भगिनी ज्येष्ठा ततोऽपत्यं हुताशनः ॥ ७ ॥
जनयित्वात्मवीर्येण तेजसानुपमद्युतिः ।
भविष्यति स वः श्रीमान् सेनापतिरभीप्सितः ॥ ८ ॥
एतच्छ्रुत्वा वचो देवाः प्रणिपत्य पितामहं ।
प्रहृष्टमनसः सर्वे कृतार्थाः पुनराययुः ॥ ९ ॥

ततः कैलासशिखरमागत्य सहिताः सुराः ।
अग्निं विज्ञापयामासुर्गङ्गां च रघुनन्दन ॥ १० ॥
हितार्थमग्ने लोकानामपत्योत्पादनं कुरु ।
आकाशपथचारिण्या संभूय सह गङ्गया ॥ ११ ॥
तथेति च प्रतिज्ञाय वचस्तेषां हुताशनः ।
उवाच गङ्गां मत्तेजो धार्यतामिति राघव ॥ १२ ॥
तमुवाच ततो गङ्गा हुताशनमिदं वचः ।
अशक्ताहं धारयितुं त्वत्तेजो भगवन्निति ॥ १३ ॥
तामुवाच ततो गङ्गां हुतभुग्भगवान् पुनः ।
प्रगृह्य गङ्गे मत्तेजः शैलेऽस्मिंस्त्वं विसर्जय ॥ १४ ॥
तथेत्युक्त्वा ततो गङ्गा तत्तेजः प्रत्यपद्यत ।
प्रतिगृह्य च सद्योऽभूद्विह्वला मूर्छिता च सा ॥ १५ ॥
असहन्ती ततो गर्भं तं धारयितुमोजसा ।
कैलासशिखरे राम साग्निरेतः सुषाव तत् ॥ १६ ॥
अजातसारं प्रस्कन्नं सहसा भूरितेजसं ।
रम्ये शरवणोद्देशे समुत्सृज्य ततो ययौ ॥ १७ ॥
तदिदं निर्गतं तस्यास्तप्तजाम्बूनदप्रभं ।
काञ्चनं धरणीं प्राप्तं हिरण्यं चाभवत् तदा ॥ १८ ॥
ताम्रं कृष्णायसं चापि तैक्ष्ण्यादेवाभ्यजायत ।
मलं चाप्यभवत् तस्य त्रपु सीसकमेव च ॥ १९ ॥

निःक्षिप्तमात्रे गर्भे तु तेजसाभ्यानुरञ्जितं ।
सर्वं पर्वतसंबन्धं सौवर्णमभवत् तदा ॥ २० ॥
जातरूपमिति ख्यातं ततःप्रभृति राघव ।
सुवर्णं प्रादुरभवद्वह्नितेजोभवं शुचि ॥ २१ ॥
कुमारश्चाभवत् तत्र तरुणार्कसमद्युतिः ।
वह्नितेजोभवः श्रीमान् गङ्गाकुक्षिपरिच्युतः ॥ २२ ॥
तं कुमारं ततो जातं दृष्ट्वा सेन्द्रा मरुद्गणाः ।
तदा क्षीरप्रदानार्थं कृत्तिकाः संन्ययोजयन् ॥ २३ ॥
ताः क्षीरं तस्य देवस्य समयेन ददुस्तदा ।
स्यादस्माकमयं पुत्रः ख्यातो नाम्नेति राघव ॥ २४ ॥
ततस्ता देवता ऊचुः कार्त्तिकेय इति प्रभुः ।
पुत्रोऽयं जगति ख्यातो भविष्यति न संशयः ॥ २५ ॥
देवानां तद्वचः श्रुत्वा पूर्वं गर्भपरिस्रवे ।
कृत्तिकाः स्कन्दयामासुस्तमादित्यसमद्युतिं ॥ २६ ॥
स्कन्द इत्येव तं दृष्ट्वा प्रोचुरप्रतिमौजसं ।
कार्त्तिकेयं महाद्युतिं काकुत्स्थ ज्वलनोपमं ॥ २७ ॥
प्रस्नुतानां ततः क्षीरं षण्णां तासां षडाननः ।
भूत्वा स बालो ह्यपिवत् कृत्तिकानां परिस्रुतं ॥ २८ ॥
तत् पीत्वा क्षीरमेकाह्ना स कुमारोऽभ्यवर्धत ।
अजयत् स्वेन वीर्येण दैत्यसैन्यगणान् बहून् ॥ २९ ॥

सुरसेनागणपतिं ततस्तममरद्युतिं ।
अभ्यषिञ्चन् सुरगणाः समेत्याग्निपुरोगमाः ॥ ३० ॥
इति ते कथितो राम गङ्गोमासंभवो मया ।
देवस्य च कुमारस्य संभवः पुण्यकीर्तनः ॥ ३१ ॥

इत्यार्षे रामायणे आदिकाण्डे कुमारोत्पत्तिर्नाम
एकोनचत्वारिंशः सर्गः ॥

XL.

तां तथा कौशिको रामे निवेद्य मधुरां कथां ।
पुनरेव कथामेतां कथयामास कौशिकः ॥ १ ॥
अयोध्याधिपतिः श्रीमान् पूर्वमासीन्नराधिपः ।
सगरो नाम धर्मात्मा प्रजाकामः स चाप्रजः ॥ २ ॥
विदर्भराजदुहिता केशिनी नाम नामतः ।
ज्येष्ठा सगरपत्न्यासीद्धर्मिष्ठा सत्यवादिनी ॥ ३ ॥
अरिष्टनेमिदुहिता रूपेणाप्रतिमा भुवि ।
द्वितीया सगरस्यासीत् पत्नी परमधार्मिकी ॥ ४ ॥
ताभ्यां सह महेष्वासः पत्नीभ्यां तप्तवांस्तपः ।
अपत्यकामः काकुत्स्थ भृगुप्रस्रवणे गिरौ ॥ ५ ॥
तस्मै वर्षसहस्रान्ते तपसाराधितो मुनिः ।
सगराय वरं प्रादाद्भृगुः सत्यवतां वरः ॥ ६ ॥
अपत्यलाभः सुमहांस्तव राजन् भविष्यति ।
कीर्तिं चाप्रतिमां लोके संतानोत्थामवाप्स्यसि ॥ ७ ॥
एका जनयिता पुत्रं तव वंशविवर्धनं ।
षष्टिं पुत्रसहस्राणि द्वितीया जनयिष्यति ॥ ८ ॥
मुनिमेवं भाषमाणं सत्यधर्मतपोनिधिं ।
ते पत्न्यौ सगरस्येदं कृत्वाञ्जलिमभाषतां ॥ ९ ॥

एकं का तनयं ब्रह्मन् का बह्वन् जनयिष्यति ।
भगवन् श्रोतुमिच्छावः सत्यः सोऽस्तु वरो हि नौ ॥१०॥
तयोरेतद्वचः श्रुत्वा स मुनिप्रवरस्तदा ।
उवाच मधुरं वाक्यं स्वच्छन्देन ददामि वां ॥११॥
एका वंशधरं पुत्रमेका चावंशकान् बह्वन् ।
यथेष्टं मां वरयतां यस्या यदभिकाङ्क्षितं ॥१२॥
मुनेरेतद्वचः श्रुत्वा केशिनी रघुनन्दन ।
पुत्रं वंशधरं राम जग्राहैकमनिन्दिता ॥१३॥
षष्टिं पुत्रसहस्राणि सुपर्णभगिनी तथा ।
जग्राह कीर्तियुक्तानि सुमतिर्वरमीप्सितं ॥१४॥
प्रदक्षिणं ततः कृत्वा भृगुं धर्मभृतां वरं ।
जगाम स्वपुरं राजा सभार्यो रघुनन्दन ॥१५॥
अथ कालेन महता पुत्रं ज्येष्ठा व्यजायत ।
असमञ्जा इति ख्यातं काकुत्स्थ सगरात्मजं ॥१६॥
सुमत्यपि रघुश्रेष्ठ गर्भं तुम्बं व्यसूयत ।
षष्टिः पुत्रसहस्राणि भिन्ने तुम्बे विनिर्ययुः ॥१७॥
घृतपूर्णेषु कुम्भेषु धात्र्यस्तानभ्यवर्धयन् ।
ते च कालेन महता यौवनं प्रतिपेदिरे ॥१८॥
समानवयसः सर्वे तुल्यवीर्यपराक्रमाः ।
षष्टिः पुत्रसहस्राणां सगरस्य बभूव ह ॥१९॥

स च ज्येष्ठोऽभवत् तेषामसमञ्जाः परंतपः ।
पौराणामहिते रक्तः पित्रा निर्वासितः पुरात् ॥ २० ॥
तस्य पुत्रोऽंशुमान् नाम बभूव ह्यसमञ्जसः ।
संमतः सर्वलोकस्य सर्वलोकप्रियंवदः ॥ २१ ॥
अथ कालेन महता मतिरेवमजायत ।
सगरस्याश्वमेधेन यजेयमिति राघव ॥ २२ ॥
स कृत्वा निश्चितां बुद्धिं सोपाध्यायगणो नृपः ।
सगरो यष्टुमारेभे कृत्वा द्रव्यपरिग्रहं ॥ २३ ॥

इत्यार्षे रामायणे आदिकाण्डे सगरपुत्रजन्म नाम
चत्वारिंशः सर्गः ॥

XLI.

विश्वामित्रवचः श्रुत्वा कथान्ते रघुनन्दनः ।
उवाच परमप्रीतो मुनिं दीप्तमिवानलं ॥ १ ॥
श्रोतुमिच्छामि भगवन् विस्तरेण कथामिमां ।
पूर्वको मे यथा यज्ञं सगरः समवाप्तवान् ॥ २ ॥
विश्वामित्रस्ततो राममुवाच प्रहसन्निव ।
श्रूयतां विस्तरो राम सगरस्य कथां प्रति ॥ ३ ॥
शङ्करश्वशुरः श्रीमान् हिमवानचलोत्तमः ।
विन्ध्यश्च स्पर्धयान्योन्यं यत्र देशे निरीक्षतः ॥ ४ ॥
तस्मिन् देशे स यज्ञोऽभूत् सगरस्य महात्मनः ।
स हि देशो महान् पुण्यः ख्यातः पुण्यजनाश्रितः ॥ ५ ॥
तस्य चानुचरो राम.दृढधन्वा महारथः ।
अंशुमानभवद्वीरः सगरस्य तदाज्ञया ॥ ६ ॥
यजतस्तस्य तं यज्ञमुत्थाय धरणीतलात् ।
तमश्वं यज्ञियं नागो जहारानन्तरूपवान् ॥ ७ ॥
हृतेऽश्वे यज्ञिये तस्मिन् सर्वे ते रघुनन्दन ।
याजकाः समुपागम्य यजमानं तदाब्रुवन् ॥ ८ ॥

केनापि नागरूपेण हृतस्तेऽश्वः स यज्ञियः ।
हत्वा तमश्वहर्तारं तमेवाश्वं त्वमानय ॥ ९ ॥
यज्ञच्छिद्रं महद्ध्येतत् सर्वेषामशिवाय नः ।
तत् तथा क्रियतां राजन् यथाच्छिद्रः क्रतुर्भवेत् ॥ १० ॥
उपाध्यायवचः श्रुत्वा तस्मिन् सदसि पार्थिवः ।
षष्टिं पुत्रसहस्राणि समाहूयेदमब्रवीत् ॥ ११ ॥
अनागतिं राक्षसानां पश्यामीह महाक्रतौ ।
नागानां चापि यज्ञोऽयं रक्ष्यते हि महर्षिभिः ॥ १२ ॥
केनापि तु स देवेन हृतोऽश्वो नागरूपिणा ।
अमर्षताच्छिद्रमेतद्दृष्ट्वा दीक्षामुपागतं ॥ १३ ॥
योऽसौ रसातलगतो यदिवान्तर्जले स्थितः ।
तं हत्वा नयताश्वं मे पुत्रका भद्रमस्तु वः ॥ १४ ॥
समुद्रमालिनीं कृत्स्नां पृथिवीमनुमार्गत ।
प्रोत्खनन्तः प्रयत्नेन यावत् तुरगदर्शनं ॥ १५ ॥
एकैकं योजनं भूमेर्निर्भिन्दन्तोऽनुगच्छत ।
अस्माकमश्वहर्तारं मार्गमाणा ममाज्ञया ॥ १६ ॥
दीक्षितः पौत्रसहितः सोपाध्यायगणस्त्वहं ।
इह स्थास्यामि भद्रं वो यावत् तुरगदर्शनं ॥ १७ ॥
असमाप्तक्रतुस्तावद्भविष्यामीह पुत्रकाः ।
युष्माभिर्यावदश्वो मे न प्रत्याह्रियते पुनः ॥ १८ ॥

इत्युक्ता हृष्टमनसः पित्राथ सगरेण ते ।
बिभिदुर्वसुधां राम पितुर्वचनकारिणः ॥ १९ ॥
योजनायामविस्तारमेकैको धरणीतलं ।
बिभिदुः पुरुषव्याघ्रा वज्रसारभुजैर्बलात् ॥ २० ॥
कुद्दालैः परिघैः शूलैर्मुषलैः शक्तिभिस्तथा ।
भिद्यमाना वसुमती नैरार्तेव ननाद सा ॥ २१ ॥
नागानां बध्यमानानां सर्पाणां च महौजसां ।
रक्षसामसुराणां च बभूवार्तस्वनो महान् ॥ २२ ॥
षष्टिं हि योजनानां ते सहस्राणि महौजसः ।
धरणीं बिभिदुः क्रुद्धाः सर्वे यावद्रसातलं ॥ २३ ॥
एवं पर्वतसंबाधं जम्बुद्वीपं नृपात्मज ।
खनन्तस्ते नृपसुताः सर्वतः परिबभ्रमुः ॥ २४ ॥
ततो देवाः सगन्धर्वा महोरगगणास्तथा ।
संभ्रान्तमनसः सर्वे पितामहमुपाद्रवन् ॥ २५ ॥
तेऽभिवाद्य महात्मानं संभ्रान्तमनसः सुराः ।
अब्रुवन् परमत्रस्ताः पितामहमिदं वचः ॥ २६ ॥
भगवन् पृथिवी सर्वा खन्यते सगरात्मजैः ।
खनद्भिश्चैव तैर्ब्रह्मन् महासत्त्ववधः कृतः ॥ २७ ॥
अयं स यज्ञहास्माकमनेनाश्वोऽपहारितः ।
इति ते सर्वभूतानि निघ्नन्ति सगरात्मजाः ॥ २८ ॥

एतच्छ्रुत्वा महावीर्य समाधिं कर्तुमर्हसि ।
यावत् त्वत्प्राणिनः सर्वानहिंसन्त्यश्वसारिणाः ॥ २१ ॥

इत्यार्ष रामायणे आदिकाण्डे पृथिवीविदारणं नाम
एकचत्वारिंशः सर्गः ॥

XLII.

इति तेषां वचः श्रुत्वा देवानां प्रपितामहः ।
प्रत्युवाच भयोद्विग्नान् सर्वदेवानिदं वचः ॥ १ ॥
बिभर्त्ति यो जगत् कृत्स्नं यस्योत्पत्तिर्न विद्यते ।
तेनाश्वो वासुदेवेन कपिलेनापवाहितः ॥ २ ॥
पृथिव्याश्चैव भेदोऽयं दृष्टस्तेनेति मे मतिः ।
सगरस्य च पुत्राणां विनाशोऽमिततेजसां ॥ ३ ॥
पितामहवचः श्रुत्वा ततस्ते त्रिदिवालयाः ।
देवर्षिपितृगन्धर्वाः प्रतिजग्मुर्यथागतं ॥ ४ ॥
सगरस्य च पुत्राणां प्रादुरासीन्महौजसां ।
खनतां पृथिवीं शब्दो वज्राशनिसमस्वनः ॥ ५ ॥
ते भित्त्वा पृथिवीं सर्वां कृत्वा चापि प्रदक्षिणं ।
उपेत्य सागराः सर्वे पितरं वाक्यमब्रुवन् ॥ ६ ॥
परिक्रान्ता मही सर्वा महद्विशसनं कृतं ।
यादोगणमहाग्राहदैत्यदानवरक्षसां ॥ ७ ॥
न चापश्याम तं राजन् यज्ञविघ्नकरं तव ।
किं कुर्महे पुनस्तात विनिश्चित्य प्रशाधि नः ॥ ८ ॥
तेषामेतद्वचः श्रुत्वा पुत्राणां सगरस्तदा ।
निश्चित्योवाच सर्वांस्तान् पुनः पुत्रानिदं वचः ॥ ९ ॥

भूयो मृगयताश्वं मे विभिद्येदं रसातलं ।
अश्वहर्त्तारमासाद्य कृतार्थाः संनिवर्तत ॥ १० ॥
पितुरेतद्वचः श्रुत्वा सगरस्यात्मसंभवाः ।
सर्वतः षष्टिसाहस्रा रसातलमुपाद्रवन् ॥ ११ ॥
पुनः खनन्तस्ते तत्र ददृशुः पर्वतोपमं ।
दिशो गजं विरूपाक्षं धारयन्तमिमां महीं ॥ १२ ॥
शिरसा नरशार्दूल सशैलवनकाननां ।
नानाजनपदाकीर्णां नानापत्तनशोभितां ॥ १३ ॥
यदा च पर्वणि गजः खेदाच्चालयते शिरः ।
सपर्वतवना राम तदेयं चलति क्षमा ॥ १४ ॥
तं ते प्रदक्षिणं कृत्वा दिशो गजमरिंदम ।
मन्यमाना दिशां पालं दक्षिणां बिभिदुर्दिशं ॥ १५ ॥
दक्षिणस्यामपि पुनर्ददृशुस्ते गजोत्तमं ।
महापद्मं महात्मानं तिष्ठन्तं मन्दरोपमं ॥ १६ ॥
तं दृष्ट्वा तु महाकायं विस्मयं परमं ययुः ।
कृत्वा तमपि नागेन्द्रं प्रदक्षिणमरिंदम ॥ १७ ॥
सगरस्यात्मजा राम पश्चिमां बिभिदुर्दिशं ।
पश्चिमायामपि दिशि कैलासशिखरोपमं ॥ १८ ॥
आशागजं सौमनसं ददृशुस्ते महाबलं ।
तं ते प्रदक्षिणं कृत्वा पृष्ट्वा चानामयं ततः ॥ १९ ॥

प्रोत्खनन्तो ययुर्वीरा दिशं हैमवतीमपि ।
उत्तरस्यामपि तु ते ददृशुर्हिमपाण्डुरं ॥ २० ॥
भद्रं भद्रेण वपुषा धारयन्तमिमां मही ।
तमप्यालभ्य ते सर्वे कृत्वा चाभिप्रदक्षिणं ॥ २१ ॥
सहिताः पुनरेवेदं बिभिदुर्धरणीतलं ।
प्रागुत्तरां दिशं गत्वा ततस्ते सगरात्मजाः ॥ २२ ॥
अमर्षवशमापन्नाश्चख्नुरेव धरामिमां ।
तत्राथ प्रोत्खनन्तस्ते क्षोणीमपि समन्ततः ॥ २३ ॥
ददृशुः कपिलं नाम देवं नारायणं प्रभुं ।
हयं च तस्य देवस्य विचरन्तमदूरतः ॥ २४ ॥
तं ते हयहरं मत्वा क्रोधपर्याकुलेक्षणाः ।
अभ्यधावन् सुसंक्रुद्धास्तिष्ठ तिष्ठेति चाब्रुवन् ॥ २५ ॥
ततस्तेनाप्रमेयेन तेऽपध्माता महात्मना ।
भस्मराशीकृताः सर्वे समेताः सगरात्मजाः ॥ २६ ॥

इत्यार्षे रामायणे आदिकाण्डे कपिलदर्शनं नाम
द्विचत्वारिंशः सर्गः ॥

XLIII.

पुत्रांश्चिरगतान् मत्वा सगरो रघुनन्दन ।
नप्तारमब्रवीद्वाक्यं दीप्यमानं स्वतेजसा ॥ १ ॥
पितॄन् गच्छ त्वमन्वेष्टुं येन चाश्वोऽपवाहितः ।
अन्तर्भूमिनिवासीनि सन्ति सत्वान्यनेकशः ॥ २ ॥
तेषां प्रतिविधानार्थं गृहीत्वा व्रज कार्मुकं ।
तानासाद्य पितॄंस्तात हत्वा विघ्नकरं च मे ॥ ३ ॥
कृतार्थः संनिवर्तेथा यज्ञादुत्तारयस्व मां ।
शूरोऽसि कृतविद्यश्च पूर्वैस्तुल्यपराक्रमः ॥ ४ ॥
एवमुक्तोऽंशुमान् राम सगरेण महात्मना ।
धनुरादाय खड्गं च ययौ त्वरितविक्रमः ॥ ५ ॥
तमेव पितृभिर्यातं पन्थानमनुसंचरन् ।
ययौ वेगेन महता पितॄनन्वेष्टुमञ्जसा ॥ ६ ॥
वीक्षमाणो विशसनं तैः कृतं यक्षरक्षसां ।
सोऽवैक्षत विरूपाक्षमाशागजमवस्थितं ॥ ७ ॥
स तं प्रदक्षिणं कृत्वा पृष्ट्वा चानामयं ततः ।
पितॄंस्तान् परिपप्रच्छ हयहर्तारमेव च ॥ ८ ॥
आशागजोऽपि तच्छ्रुत्वा पृच्छतोऽंशुमतो वचः ।
तमुवाच कृतार्थस्त्वमेष्यसीत्यभितः स्थितं ॥ ९ ॥

इति तस्य वचः श्रुत्वा सर्वानेव हि दिग्गजान् ।
यथाक्रमं यथान्यायं प्रष्टुं समुपचक्रमे ॥ १० ॥
एतदेव च तैरुक्तो गजैराशुपराक्रमः ।
पूजितः सहयश्चैव गन्तासीत्यंशुमानपि ॥ ११ ॥
तेषां तु तद्वचः श्रुत्वा जगाम लघुविक्रमः ।
भस्मराशीकृता यत्र पितरस्तस्य सागराः ॥ १२ ॥
स दुःखवशमापन्नः सुतोऽथ ह्यसमञ्जसः ।
चुक्रोशार्तस्वरं दृष्ट्वा भस्मराशीकृतान् पितॄन् ॥ १३ ॥
ञ्रपश्यत् तुरगं तं च चरन्तमविदूरतः ।
तदा पर्वणि नागेन हृतं वेलावने स्थितं ॥ १४ ॥
स तेषां राजपुत्राणां कर्तुकामो जलक्रियां ।
सलिलार्थी महातेजा नापश्यत् सलिलं क्वचित् ॥ १५ ॥
पातयंश्चाभितो दृष्टिं ततस्तत्र ददर्श ह ।
पितॄणां मातुलं राम सुपर्णं पतगोत्तमं ॥ १६ ॥
स चैनमब्रवीद्वाक्यं वैनतेयो महाबलः ।
मा शुचः पुरुषव्याघ्र बधोऽयं लोकसंमतः ॥ १७ ॥
कपिलेनाप्रमेयेन दग्धा ह्येते महाबलाः ।
नार्हसे सलिलं वीर दातुमेभ्यस्त्वमन्यतः ॥ १८ ॥
गङ्गा हिमवतो ज्येष्ठा दुहिता सरितां वरा ।
भस्मराशीकृतानेतान् प्लावयेल्लोकपावनी ॥ १९ ॥

यावत् क्लिन्नमिदं भस्म गङ्गया लोककान्तया ।
यदैषां भविता तात स्वर्गमेष्यन्ति वै तदा ॥ २० ॥
गङ्गामानय भद्रं ते देवलोकान्महीतलं ।
क्रियतां यदि शक्नोषि गङ्गाया अवतारणं ॥ २१ ॥
गच्छाश्वमेतमादाय पुनरेव यथागतं ।
यज्ञं पैतामहं वीर निवर्त्तयितुमर्हसि ॥ २२ ॥
सुपर्णवचनं श्रुत्वा वीर्यवानंशुमानथ ।
त्वरितो हयमादाय यज्ञमायान्महायशाः ॥ २३ ॥
स राजानं समासाद्य दीक्षितं रघुनन्दन ।
तस्मै निवेदयामास सुपर्णवचनं तदा ॥ २४ ॥
तच्छ्रुत्वा व्यथितो राजा घोरमंशुमतो वचः ।
यज्ञं समापयामास नातिहृष्टमना इव ॥ २५ ॥
स्वपुरं च ययौ धीमानिष्टयज्ञो महीपतिः ।
गङ्गायाश्चागमे राजा नाध्यगच्छत् स निश्चयं ॥ २६ ॥
अगत्वा निश्चयं चापि युयुजे कालधर्मणा ।
त्रिंशद्वर्षसहस्राणि पालयित्वा महीमिमां ॥ २७ ॥

इत्यार्षे रामायणे आदिकाण्डे सगरयज्ञसमाप्तिर्नाम
त्रिचत्वारिंश सर्गः ॥

XLIV.

ततः प्रकृतयो राम सगरे स्वर्गते नृपे ।
धार्मिकं रोचयामासुरंशुमन्तं नराधिपं ॥ १ ॥
स राजा सुमहानासीदंशुमान् रघुनन्दन ।
तस्य पुत्रः समभवद्दिलीप इति विश्रुतः ॥ २ ॥
तस्मिन् राज्यं समावेश्य दिलीपेऽथांशुमानपि ।
हिमवच्छिखरे राम तपस्तेपे महायशाः ॥ ३ ॥
गङ्गावतारणं पुण्यं चिकीर्षुरमरद्युतिः ।
अनवाप्यैव तं कामं स वै नृपतिसत्तमः ॥ ४ ॥
द्वात्रिंशतं सहस्राणि वर्षाणाममितद्युतिः ।
तपस्तप्त्वा महाघोरं स्वर्गं लेभे महामनाः ॥ ५ ॥
दिलीपोऽपि महातेजा यज्ञैर्बहुभिरीजिवान् ।
विंशतिं वै सहस्राणि वर्षाणां गामपालयत् ॥ ६ ॥
निश्चयं चाप्यगत्वैव गङ्गावतरणे ततः ।
व्याधिना नरशार्दूल कालस्य वशमीयिवान् ॥ ७ ॥
इन्द्रलोकं गतो राजा सोऽर्जितं पुण्यकर्मणा ।
राज्यं भगीरथे पुत्रे निक्षिप्य पुरुषर्षभः ॥ ८ ॥
भगीरथोऽथ राजाभूद्धार्मिको रघुनन्दन ।
अनपत्यः सदा काङ्क्षन् सदृशीमात्मनः प्रजां ॥ ९ ॥

स तपो महदातस्थे गोकर्णेऽनुपमद्युतिः ।
ऊर्ध्वबाहुः पञ्चतपा ग्रीष्मे भूत्वा यतव्रतः ॥ १० ॥
जलशायी च हेमन्ते वर्षास्वभ्रावकाशिकः ।
शीर्णपर्णकृताहारो यतात्मा यतमैथुनः ॥ ११ ॥
तस्य वर्षसहस्रान्ते तपसोग्रेण तोषितः ।
आजगामाश्रमं ब्रह्मा प्रजानां प्रभुरीश्वरः ॥ १२ ॥
वृतः सुरगणैः श्रीमान् विमानवरमास्थितः ।
स एनमाभाष्य तदा तप्यमानं तपोऽब्रवीत् ॥ १३ ॥
भगीरथ महाभाग प्रीतस्तेऽहं नरेश्वर ।
गृहाण त्वं वरं मत्तः काङ्क्षितं पृथिवीपते ॥ १४ ॥
तमुवाच ततो दृष्ट्वा ब्रह्माणं स्वयमागतं ।
भगीरथो महातेजाः कृताञ्जलिरिदं वचः ॥ १५ ॥
यदि मे भगवान् प्रीतो यद्यस्ति तपसो बलं ।
ततः सगरपुत्रास्ते मत्तः सलिलमाप्नुयुः ॥ १६ ॥
गङ्गाजलप्लुते तस्मिन् देहभस्मनि पाविताः ।
गच्छेयुरमलाः स्वर्गं सर्वे नः प्रपितामहाः ॥ १७ ॥
इयं च संततिर्देव नावसादं कथञ्चन ।
इक्ष्वाकूणां कुले गच्छेदेष मे प्रवरो वरः ॥ १८ ॥
इत्युक्तवाक्यं राजानं सर्वलोकपितामहः ।
प्रत्युवाच शुभां वाणीं मधुराक्षरभूषितां ॥ १९ ॥

तपोधन महाभाग भगीरथ महारथ ।
एवं भवत्वविच्छिन्नमिक्ष्वाकुकुलमव्ययं ॥ २० ॥
इयं तु गङ्गा सरितां प्रवरा स्वर्गतश्च्युता ।
दारयेत् पृथिवीं कृत्स्नां निपतन्ती महौघिनी ॥ २१ ॥
तदस्या धारणे राजन् शिवो देवः प्रसाद्यतां ।
गङ्गायाः पतनं व्यक्तं भूमिः सोढुं न शक्ष्यति ॥ २२ ॥
तस्या धारयितारं च नान्यं पश्यामि शङ्करात् ।
वेगं सुदुःसहं लोके तस्मात् तं त्वं प्रसादय ॥ २३ ॥
तमेवमुक्त्वा राजानं भगवान् प्रपितामहः ।
आभाष्य च महीं नेतुं गङ्गां स त्रिदिवं ययौ ॥ २४ ॥

इत्यार्षे रामायणे आदिकाण्डे भगीरथवरप्रदानं नाम
चतुश्चत्वारिंशः सर्गः ॥

XLV.

प्रजापतौ गते तस्मिनंगुष्ठाग्रनिपीडितं ।
कृत्वा महीतलं राजा संवत्सरमुपावसत् ॥ १ ॥
ऊर्ध्वबाहुर्निरालम्बो वायुभक्षो निराश्रयः ।
अचलः स्थाणुवत् स्थित्वा रात्रिं दिवमतन्द्रितः ॥ २ ॥
अथ संवत्सरे पूर्णे सर्वदेवनमस्कृतः ।
उमापतिः पशुपतिर्भगीरथमभाषत ॥ ३ ॥
प्रीतस्तेऽहं नरश्रेष्ठ करिष्यामि प्रियं महत् ।
पतन्तीं धारयिष्यामि दिवस्त्रिपथगां नदीं ॥ ४ ॥
ततो हिमवतः शृङ्गमधिरुह्य महेश्वरः ।
निपतेत्यब्रवीद्गङ्गामाभाष्याकाशगां नदीं ॥ ५ ॥
जटाकलापं विपुलं विनिकीर्य समन्ततः ।
बहुयोजनविस्तीर्णं शैलकन्दरसंनिभं ॥ ६ ॥
तस्मिन् पपात गगणाद्गङ्गा देवनदी च्युता ।
वेगेन महता राम शिरस्यमिततेजसः ॥ ७ ॥
तत्र संवत्सरं पूर्णं बभ्राम परिमोहिता ।
गङ्गा शिरसि देवस्य विसृता वेगवाहिनी ॥ ८ ॥
ततः प्रसादयामास पुनरेव भगीरथः ।
गङ्गायाः परिमोक्षार्थं महादेवमुमापतिं ॥ ९ ॥

तस्याथ वचनाद्गङ्गामुत्ससर्ज तदा हरः ।
जटामेकां समाक्षिप्य श्रोतः संजनयन् स्वयं ॥ १० ॥
श्रोतसा तेन सुस्राव गङ्गा त्रिपथगामिनी ।
पावयन्ती जगद्राम पुण्या देवनदी शुभा ॥ ११ ॥
ततो देवर्षिगन्धर्वा यक्षाः सिद्धगणास्तथा ।
विमानैर्विविधै राम हयैर्गजवरैस्तथा ॥ १२ ॥
परिप्लवगताश्चापि देवतास्तत्र विष्ठिताः ।
स्वयं चानुजगामैनां ब्रह्मा लोकपितामहः ॥ १३ ॥
तदद्भुततमं लोके गङ्गापतनमुत्तमं ।
दिदृक्षवो देवगणाः समीयुरमितौजसः ॥ १४ ॥
संपतद्भिः सुरगणैस्तेषां चाभरणज्वलं ।
शतादित्यमिवासीत् तु गगणं गततोयदं ॥ १५ ॥
क्वचिद्द्रुततरं प्रायात् कुटिलं क्वचिदायतं ।
विततं क्वचिदुद्भूतं शनैरपि पुनः क्वचित् ॥ १६ ॥
सलिलेनैव सलिलं क्वचिदभ्याबधीत्पुनः ।
शिशुमारोरगगणैर्मीनैरपि च चञ्चलैः ॥ १७ ॥
विद्युद्भिरिव विक्षिप्तैराकाशमभवद्वृतं ।
पाण्डुरैः सलिलोत्पीडैः कीर्यमाणं सहस्रधा ॥ १८ ॥
शरच्छुभ्रमिवाभाति गगणं हंससंप्लवैः ।
मुहुरूर्ध्वमधो गत्वा पपात धरणीतले ॥ १९ ॥

तच्छङ्करशिरोभ्रष्टं गतं भूमितलं पयः ।
ग्रहाः सगणगन्धर्वा वसुधातलवासिनः ॥ २० ॥
नागाश्च शोधयामासुर्मार्गमस्य महौजसः ।
भवाङ्गसंगते तोये पवित्रे तत्र पूजिते ॥ २१ ॥
कृत्वाभिषेकं ते सर्वे बभूवुर्गतकल्मषाः ।
शापात् प्रपतिता ये च गगणाद्वसुधातलं ॥ २२ ॥
पूतात्मानः पुनस्तेन सलिलेन दिवं गताः ।
जेपुर्देवर्षयो जप्यं सिद्धाश्च परमर्षयः ॥ २३ ॥
जगुश्च देवगन्धर्वा ननृतुश्चाप्सरोगणाः ।
मुनिसंघा मुमुदिरे प्रह्लादं जगदाप्तवान् ॥ २४ ॥
त्रयोऽपि लोका मुदिता गङ्गावतरणे तदा ।
भगीरथो हि राजर्षिर्दिव्यं स्यन्दनमास्थितः ॥ २५ ॥
प्रायादग्रे महातेजास्तं गङ्गा पृष्ठतोऽन्वयात् ।
महातरङ्गौघवती प्रनृत्यन्तीव राघव ॥ २६ ॥
स्ववेगोद्भ्रामितजला फेनमालावतंसिका ।
महाजलावर्तवती महावेगप्रवाहिनी ॥ २७ ॥
प्रययौ विलसन्तीव भगीरथपथानुगा ।
देवाः सर्षिगणाः सर्वे दैत्यदानवराक्षसाः ॥ २८ ॥
गन्धर्वयक्षप्रवराः सकिन्नरमहोरगाः ।
सर्वाश्चाप्सरसो राम भगीरथरथानुगाः ॥ २९ ॥

गङ्गामन्वगमन् प्रीताः सर्वे जलचराश्च ये ।
यतो भगीरथो गच्छेत् ततो गङ्गा यशस्विनी ॥ ३० ॥
जगाम नरशार्दूल सर्वलोकनमस्कृता ।
स गत्वा सागरं राजा गङ्गयानुगतस्तदा ॥ ३१ ॥
प्रविवेश तलं भूमेः खातं यत् सगरात्मजैः ।
उपानीय ततो गङ्गां रसातलतलं प्रभुः ॥ ३२ ॥
तर्पयामास तान् सर्वान् भस्मभूतान् पितामहान् ।
अथ गङ्गाम्भसा तेन प्लाविताः सगरात्मजाः ॥ ३३ ॥
दिव्यमूर्तिधरा भूत्वा जग्मुः स्वर्गं मुदान्विताः ।
तान् दृष्ट्वा प्लावितान् सर्वान् पितॄंस्तेन महात्मना ॥ ३४ ॥
भगीरथमुवाचेदं ब्रह्मा सुरगणैः सह ।
तारिता नरशार्दूल त्वया पूर्वपितामहाः ॥ ३५ ॥
षष्टिः पुत्रसहस्राणि सगरस्य महात्मनः ।
अन्वयः सगरस्यायं नाम्ना ख्यातो महोदधिः ॥ ३६ ॥
व्यक्तं सागर इत्येव ख्यातिं लोके गमिष्यति ।
यावच्च सागरो लोके स्थितोऽयमिह शाश्वतः ॥ ३७ ॥
सगरः सहितः पुत्रैस्तावत् स्वर्गे निवत्स्यति ।
इयं च दुहिता राजंस्तव गङ्गा भविष्यति ॥ ३८ ॥
भागीरथीति विख्याता त्रिषु लोकेषु विश्रुता ।
गङ्गेति गमनाद्भूमेः ख्याता भागीरथीति च ॥ ३९ ॥

भविष्यति सरिच्छ्रेष्ठा लोके त्रिपथगेति च ।
त्रिपथेति च नामास्यास्त्रिमार्गगमनादिदं ॥ ४० ॥
त्रींल्लोँकान् प्लावयन्त्या वै सुरर्षिभिरुदाहृतं ।
द्वितीयं चापि गङ्गेति गां गताया विशां पते ॥ ४१ ॥
भागीरथीति चाप्येतत् तृतीयं नाम सुव्रत ।
त्वत्प्रीत्या च भविष्यति सुतेयं ते विचक्षण ॥ ४२ ॥
यावच्च भुवि गङ्गेयं भविष्यति महानदी ।
तावत् तवाक्षया कीर्तिर्लोकेषु विचरिष्यति ॥ ४३ ॥
पितामहानां सर्वेषां त्वमत्र मनुजाधिप ।
कुरुष्व सलिलं राजन् प्रतिज्ञामपवर्जय ॥ ४४ ॥
पूर्वजेनापि ते राजंस्तेनातियशसा सता ।
धर्मिणां प्रवरेणापि नैष प्राप्तो मनोरथः ॥ ४५ ॥
तथैवांशुमता तात लोकेऽप्रतिमतेजसा ।
गङ्गां प्रार्थयमानेन न प्राप्तः काम एष हि ॥ ४६ ॥
राजर्षीणां पुराणानां महर्षिसमतेजसां ।
अतुल्यतपसा चापि क्षत्रधर्मस्थितेन च ॥ ४७ ॥
दिलीपेन महाभाग तव पित्रातितेजसा ।
पुनर्न शकितं तेन गङ्गां प्रार्थयतानघ ॥ ४८ ॥
सा त्वया समनुप्राप्ता प्रतिज्ञा पुरुषर्षभ ।
प्राप्तोऽसि परमं लोके यशस्त्रिदशसंमतं ॥ ४९ ॥

यच्च गङ्गावतरणं त्वया कृतमरिंदम ।
अनेन सुमहत् प्राप्तं धर्मस्थानं त्वयानघ ॥ ५० ॥
पावयस्व त्वमात्मानं नरोत्तम सदोचिते ।
सलिले पुरुषश्रेष्ठ शुचिः पुण्यफलो भव ॥ ५१ ॥
पितामहानां सलिलं कुरुष्व च यथासुखं ।
स्वस्ति तेऽस्तु गमिष्यामि स्वर्लोकं नरपुंगव ॥ ५२ ॥
इत्युक्त्वा भगवान् ब्रह्मा भगीरथमरिंदमं ।
जगाम सहितो देवैर्ब्रह्मलोकमनामयं ॥ ५३ ॥
भगीरथोऽपि राजर्षिः कृत्वा तेषां जलक्रियां ।
पितामहानां सर्वेषामयोध्यां पुनरागमत् ॥ ५४ ॥
समृद्धार्थो नरश्रेष्ठो राज्यं चानुशशास ह ।
प्रमुमोद च लोकस्तं नृपमासाद्य राघव ॥ ५५ ॥
इति ते राम गङ्गाया विस्तरोऽभिहितो मया ।
स्वस्ति प्राप्नुहि भद्रं ते संध्याकाल उपस्थितः ॥ ५६ ॥
धन्यं यशस्यमायुष्यं स्वर्ग्यं पावनमेव च ।
इदमाख्यानमाख्यातं गङ्गावतरणं मया ॥ ५७ ॥

इत्यार्षे रामायणे आदिकाण्डे गङ्गावतरणं नाम
पञ्चचत्वारिंशः सर्गः ॥

XLVI.

विश्वामित्रवचः श्रुत्वा रामो दशरथात्मजः ।
विस्मयं परमं गत्वा प्रोवाचेदं वचस्तदा ॥ १ ॥
अत्यद्भुतमुपाख्यानं त्वयाख्यातं महामुने ।
गङ्गावतरणं पुण्यं सागरस्य च पूरणं ॥ २ ॥
इयं नो रजनी पुण्या क्षणभूता भविष्यति ।
इमां चिन्तयतामेव कथां पापभयापहां ॥ ३ ॥
ततः सा रजनी पुण्या सह सौमित्रिणा तदा ।
गता चिन्तयतस्तस्य विश्वामित्रस्य तां कथां ॥ ४ ॥
ततः प्रभाते विमले विश्वामित्रं महामुनिं ।
उवाच रामः सत्कृत्य कृताह्निकमिदं वचः ॥ ५ ॥
गता भगवती रात्रिः श्रोतव्यं परमं श्रुतं ।
संतरामः सरिच्छ्रेष्ठां पुण्यां त्रिपथगां नदीं ॥ ६ ॥
दृढेयं नौः सुविस्तीर्णा संतारयितुमापगां ।
भवन्तमिह संप्राप्तं दृष्ट्वेति मतिर्मम ॥ ७ ॥
इत्येतद्वचनं श्रुत्वा रामस्याक्लिष्टकर्मणः ।
संतारं कारयामास विश्वामित्रो महामुनिः ॥ ८ ॥
उत्तरं तीरमासाद्य ततः स मुनिपुंगवः ।
अपश्यत् तत्र निरतांस्तापसान् नियतव्रतान् ॥ ९ ॥

स तान् संपूज्य विधिवज्जगाम सहराघवः ।
विशालस्य पुरीं रम्यां दिव्यां स्वर्गपुरीमिव ॥ १० ॥
तत्र रामो महाबुद्धिर्विश्वामित्रमिदं तदा ।
पप्रच्छ प्राञ्जलिर्भूत्वा वैशालीं प्राप्य तां पुरीं ॥ ११ ॥
कतमो राजवंशोऽयं विशालस्य महात्मनः ।
श्रोतुमिच्छामि भगवन् कौतूहलसमन्वितः ॥ १२ ॥
तस्येदं वचनं श्रुत्वा रामस्य विदितात्मनः ।
आख्यातुमुपचक्राम विश्वामित्रो महातपाः ॥ १३ ॥
श्रुता मयेयं शक्रस्य पुरा कथयतः कथा ।
यथा दिविषदां मध्ये शृणु तां मम राघव ॥ १४ ॥
आसन् कृतयुगे राम दितेः पुत्रा महाबलाः ।
अदितेश्च महावीर्याः स्ववीर्यबलदर्पिताः ॥ १५ ॥
भ्रातरः स्पर्धिनः पुत्राः कश्यपस्य महात्मनः ।
मातृष्वसेयाः सापत्न्याः परस्परजिगीषवः ॥ १६ ॥
तेषां किल समेतानां बुद्धिरासीन्महौजसां ।
अजराश्चामराश्चैव कथं स्यामेति राघव ॥ १७ ॥
तेषां चिन्तयतामेव बुद्धिरासीद्विनिश्चिता ।
क्षीरोदं सागरं सर्वे मथ्नीमः सहिता वयं ॥ १७ ॥
नानौषधीः समाहृत्य प्रक्षिप्य च ततस्ततः ।
यत् तत्रोत्पत्स्यते सारं तत् पास्यामस्ततो वयं ॥ १९ ॥

तेनाजरामरा लोके भविष्यामो गतज्वराः ।
तेजोवीर्यबलोपेताः कान्तिद्युतिसमन्विताः ॥ २० ॥
इति ते निश्चयं कृत्वा ममन्थुर्वरुणालयं ।
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिं ॥ २१ ॥
अप्सु निर्मथ्यमानासु रसात् तस्माद्वरस्त्रियः ।
उत्पेतुरम्भसो यस्मात् तस्मादप्सरसोऽभवन् ॥ २२ ॥
षष्टिः कोट्योऽभवन् राम तासामप्सरसां तदा ।
दिव्यानां दिव्यरूपाणां दिव्याभरणवाससां ॥ २३ ॥
रूपयौवनमाधुर्यगुणाढ्यानां सुवर्चसां ।
असंख्येया बभूवुश्च यास्तासां परिचारिकाः ॥ २४ ॥
न ता वै जगृहुर्देवास्तत्र दैत्याश्च राघव ।
अप्रतिग्रहणात् ताश्च सर्वाः साधारणीकृताः ॥ २५ ॥
वरुणस्य ततः कन्या वारुणी रघुनन्दन ।
उत्पपात रसात् तस्मान्मार्गमाणा परिग्रहं ॥ २६ ॥
दितेः पुत्रा न तां राम जगृहुर्वरुणात्मजां ।
अदितेस्तु सुताः प्रीतास्तामगृह्णन्त वै तदा ॥ २७ ॥
सुरापरिग्रहाद्देवाः सुरा इत्यभिविश्रुताः ।
अप्रतिग्रहणात् तस्या दैतेयाश्चासुराः स्मृताः ॥ २८ ॥
उच्चैःश्रवाश्च तत्राश्वो मणिरत्नं च कौस्तुभं ।
तस्मादेव समुद्भूतममृतं चाप्यनन्तरं ॥ २९ ॥

अमृतानन्तरं चापि धन्वन्तरिरजायत ।
वैद्यराजोऽमृतस्यैव बिभ्रत् पूर्णं कमण्डलुं ॥ ३० ॥
धन्वन्तरेरनूद्भूतं विषं लोकविषादकृत् ।
तन्नागा जगृहुः सर्वे ज्वलनादित्यसंनिभं ॥ ३१ ॥
तदामृतार्थे देवानामसुराणां च विग्रहः ।
आसीद्बलवतां राम लोकक्षयकरो महान् ॥ ३२ ॥
तस्मिन् विमर्दे महति तेषाममिततेजसां ।
अदितेरात्मजा राम निजघ्नुस्तान् दितेः सुतान् ॥ ३३ ॥
निहत्य च दितेः पुत्रान् राज्यं प्राप्य पुरंदरः ।
मुमोदर्द्धिं परां प्राप्य सर्वदेवाभिपूजितः ॥ ३४ ॥
विज्वरो निहतामित्रो मुमुदे विबुधैः सह ।
तदा च मुदिता लोकाः सर्षिसंघाः सचारणाः ॥ ३५ ॥

इत्यार्षे रामायणे आदिकाण्डे अमृतोत्पत्तिर्नाम
षट्चत्वारिंशः सर्गः ॥

XLVII.

हतपुत्रा ततो देवी दितिः परमदुःखिता ।
मारीचं कश्यपं देवी भर्तारमिदमब्रवीत् ॥ १ ॥
हतपुत्रास्मि भगवन् पुत्रैः शक्रादिभिस्तव ।
शक्रहन्तारमिच्छामि पुत्रं दीर्घतपोऽर्जितं ॥ २ ॥
साहं तपश्चरिष्यामि गर्भमाधातुमर्हसि ।
तत्र मे शक्रहन्तारं पुत्रं त्वं जनयिष्यसि ॥ ३ ॥
तस्यास्तद्वचनं श्रुत्वा मारीचः कश्यपस्तदा ।
प्रत्युवाच महातेजा दितिं परमदुःखितां ॥ ४ ॥
एवं भवतु भद्रं ते शुचिर्भव तपोधने ।
जनयिष्यसि पुत्रं त्वं शक्रहन्तारमीप्सितं ॥ ५ ॥
पूर्णे वर्षसहस्रं त्वं शुचिर्यदि भविष्यसि ।
एवमुक्त्वा महातेजाः पाणिना स ममार्ज तां ॥ ६ ॥
संस्पृश्य चोक्त्वा स्वस्तीति जगाम तपसे मुनिः ।
गते तस्मिन् रघुश्रेष्ठ दितिः परमहर्षिता ॥ ७ ॥
उदक्प्रवणे देशे तप आतिष्ठदुत्तमं ।
चरन्त्यास्तु तपस्तस्याः परां संनतिमास्थितः ॥ ८ ॥
परिचर्यां स्वयं शक्रश्चकारोत्पत्य तत्परः ।
समित्कुशं मूलफलं पुष्पमग्निं तथा जलं ॥ ९ ॥

प्रयत्नवानाजहार तस्याः काले पुरंदरः ।
गात्रसंवाहनं कुर्वन् श्रमापनयनं तथा ॥ १० ॥
शक्रः सर्वेषु कार्येषु दितिं परिचचार ह ।
गते वर्षसहस्रे तु दशोने रघुनन्दन ॥ ११ ॥
दितिः प्रीता सहस्राक्षमिदं वचनमब्रवीत् ।
प्रीता तेऽहं महावीर्य दश वर्षाणि पुत्रक ॥ १२ ॥
अवशेषाणि भद्रं ते द्रष्टासि भ्रातरं ततः ।
तमहं त्वत्कृते पुत्र समाधास्ये जयोत्सुकं ॥ १३ ॥
सौभ्रात्रेणैव सहितस्त्वं हि राज्यमवाप्स्यसि ।
एवमुक्त्वा ततः शक्रं विश्वस्ता शक्रसंनिधौ ॥ १४ ॥
निद्रयापहृता देवी मध्यं प्राप्ते दिवाकरे ।
कृतपादा शिरःस्थाने दितिः सुष्वाप राघव ॥ १५ ॥
दृष्ट्वा तामशुचिं शक्रः पादतः कृतमूर्धजां ।
कृतपादां शिरःस्थाने मुमोद च जहास च ॥ १६ ॥
तस्याः शरीरं विवृतं प्रविश्य बलसूदनः ।
बिभेद सप्तधा गर्भं वज्रेण शतपर्वणा ॥ १७ ॥
एकैकं चैव गर्भांशं पुनश्चिच्छेद सप्तधा ।
विस्फुरन्तं बलाद्राम रुदन्तं चार्तया गिरा ॥ १८ ॥
भिद्यमानस्तदा गर्भः कुक्षौ वज्रेण वज्रिणा ।
रुरोद सुस्वरं राम ततो दितिरबुध्यत ॥ १९ ॥

मा रोधीरिति तं शक्रः प्ररुदन्तमभाषत ।
बिभेद चैनं वज्रेण रुदन्तमपि वासवः ॥ २० ॥
न हन्तव्यो न हन्तव्य इति तं दितिरब्रवीत् ।
निर्ययौ च ततः शक्रो मातुर्वचनगौरवात् ॥ २१ ॥
प्राञ्जलिश्चाब्रवीदेनां विनिःसृत्याग्रतः स्थितः ।
अशुचिर्देवि सुप्तासि पादयोः कृतमूर्धजा ॥ ॥२२ ॥
लब्ध्वा तदन्तरं चाहं मद्विनाशार्थमाहितं ।
गर्भं ते हृतवान् देवि तन्मे त्वं क्षन्तुमर्हसि ॥ २३ ॥

इत्यार्षे रामायणे आदिकाण्डे गर्भभेदो नाम
सप्तचत्वारिंशः सर्गः ॥

XLVIII.

एकोनपञ्चाशद्धा तु भिन्ने गर्भे ततो दितिः ।
सहस्राक्षं दुराधर्षमुवाच भृशदुःखिता ॥ १ ॥
ममापराधाद्गर्भोऽयं बहुधा विदलीकृतः ।
नापराधोऽस्ति देवेश तवात्रात्महितैषिणः ॥ २ ॥
एवं गतेऽपि शक्र त्वं प्रियं मे कर्तुमर्हसि ।
इमे ते सप्तकाः सप्त मरुतो नाम विश्रुताः ॥ ३ ॥
चरन्त्वाज्ञाकराः सप्तवातस्कन्धेषु सप्तसु ।
सहैभिर्मम पुत्रैस्त्वं मरुद्भिर्जहि शात्रवान् ॥ ४ ॥
ब्रह्मलोके चरन्त्वेक इन्द्रलोके तथापरे ।
दिक्षु चैतासु सर्वासु विचरन्तु तवाज्ञया ॥ ५ ॥
दिव्यमूर्तिधरा भूत्वा मरुतोऽमृतभोजनाः ।
तवैवाज्ञाकराः शक्र कुरुष्वैतद्वचो मम ॥ ६ ॥
तस्यास्तद्वचनं श्रुत्वा शक्रः शक्तिमतां वरः ।
उवाच प्राञ्जलिर्वाक्यमेवमस्त्विति राघव ॥ ७ ॥
त्वत्कृतेनैव नाम्ना हि भविष्यन्ति तवात्मजाः ।
ख्याता मरुत इत्येते दिव्यरूपा ममाज्ञया ॥ ८ ॥
सर्वमेतद्यथाकामं करिष्येऽहमशेषतः ।
अमृतप्राशिनः पुत्रा इमे ते सहिता मया ॥ ९ ॥

विचरिष्यन्ति लोकांस्त्रीन् निर्भया विगतज्वराः ।
निर्वृता भव भद्रं ते करिष्ये वचनं तव ॥१०॥
सर्वमेतद्यथोक्तं ते भविष्यति न संशयः ।
एवं तौ निश्चयं कृत्वा मातापुत्रौ परस्परं ॥११॥
जग्मतुस्त्रिदिवं राम कृतार्थाविति नः श्रुतं ।
एष देशः स काकुत्स्थ महेन्द्राध्युषितः पुरा ॥१२॥
दितिं यत्र तपःसिद्धामेवं परिचचार सः ।
इक्ष्वाकोरत्र राजर्षेः पुत्रः परमधार्मिकः ॥१३॥
अलम्बुषायामुत्पन्नो विशाल इति विश्रुतः ।
तेनेयं निर्मिता राम वैशाली नगरी शुभा ॥१४॥
विशालस्य सुतो राम हेमचन्द्रोऽभवन्नृपः ।
सुचन्द्र इति विख्यातो हैमचन्द्रिर्महायशाः ॥१५॥
सुचन्द्रतनयो राम धूम्राश्व इति विश्रुतः ।
धूम्राश्वतनयश्चापि सृञ्जयः समजायत ॥१६॥
सृञ्जयस्य सुतस्त्वासीत् स्वर्णष्ठीवीति विश्रुतः ।
स्वर्णष्ठीविसुतश्चापि कुशाश्व इति विश्रुतः ॥१७॥
कुशाश्वस्य महातेजाः सोमदत्तः सुतोऽभवत् ।
सोमदत्तस्य काकुत्स्थ सुतोऽभूज्जनमेजयः ॥१८॥
तस्य पुत्रोऽथ काकुत्स्थ पालयेतां साम्प्रतं पुरीं ।
धर्मात्मा नरशार्दूल प्रमतिर्नाम वीर्यवान् ॥१९॥

इक्ष्वाकवः सर्व एव ख्याता वैशालिका नृपाः ।
दीर्घायुषो महात्मानो वीर्यवन्तो महाबलाः ॥ २० ॥
इहाद्य रजनीं राम सुखं वत्स्यामहे वयं ।
श्वः प्रभाते तु जनकं ध्रुवं द्रक्ष्याम राघव ॥ २१ ॥
प्रमतिस्तं ततः श्रुत्वा विश्वामित्रमुपागतं ।
प्रत्युद्गम्य महात्मानं पूजयामास पार्थिवः ॥ २२ ॥
पाद्यार्घासनदानेन सोपाध्यायगणस्तदा ।
प्राञ्जलिः कुशलं चैनं पृष्ट्वेदं वाक्यमब्रवीत् ॥ २३ ॥
प्रीतोऽस्म्यनुगृहीतश्च यस्य मे विषयं मुने ।
संप्राप्तो दर्शनं चैव नास्ति धन्यतरो मम ॥ २४ ॥
अद्य मे सफलं जन्म संवृत्तश्च मनोरथः ।
यत् त्वां कुशलिनं ब्रह्मन् पश्यामि समुपागतं ॥ २५ ॥

इत्यार्षे रामायणे आदिकाण्डे प्रमतिसमागमो नाम
अष्टचत्वारिंशः सर्गः ॥

XLIX.

पृष्ट्वा तु कुशलं प्रश्नं परस्परमशेषतः ।
कथान्ते प्रमतिस्तत्र विश्वामित्रमभाषत ॥ १ ॥
इमौ कुमारौ भगवन् कुतः कस्य च शंस मे ।
किमर्थं च त्वया सार्धं भ्रमेते देवरूपिणौ ॥ २ ॥
सिंहर्षभगती वीरौ शार्दूलवृषभाविव ।
पद्मपत्रविशालाक्षौ वरायुधधरावुभौ ॥ ३ ॥
अश्विनाविव रूपेण समुपस्थितयौवनौ ।
यदृच्छया क्षितिं प्राप्तौ देवलोकादिवामरौ ॥ ४ ॥
कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने ।
भूषयन्ताविमं देशं चन्द्रसूर्याविवाम्बरं ॥ ५ ॥
परस्परस्य सदृशौ प्रमाणस्थितिचेष्टितैः ।
वराम्बरधरौ वीरौ श्रोतुमिच्छामि तत्त्वतः ॥ ६ ॥
तस्यैतद्वचनं श्रुत्वा यथावृत्तं न्यवेदयत् ।
सिद्धाश्रमकथां चैव राक्षसानां बधं च सः ॥ ७ ॥
विश्वामित्रवचः श्रुत्वा प्रमतिर्भृशविस्मितः ।
अतिथी पूजयामास पुत्रौ दशरथस्य तौ ॥ ८ ॥
ततः परमसत्कारं प्रमतेः प्राप्य राघवौ ।
उषित्वा च निशां तत्र जग्मतुर्मिथिलां प्रति ॥ ९ ॥

तां दृष्ट्वा दूरतः सर्वे जनकस्य पुरीं शुभां ।
मुनयो हृष्टमनसः शशंसुः साधु साध्विति ॥ १० ॥
मिथिलोपवने तस्मिन्नाश्रमं प्रेक्ष्य राघवः ।
पप्रच्छ मुनिशार्दूलं किमिदं निर्जनं वनं ॥ ११ ॥
श्रीमानविरलच्छायो मुनिसंघविवर्जितः ।
श्रोतुमिच्छामि भगवन् कस्यासीदयमाश्रमः ॥ १२ ॥
इति तस्य वचः श्रुत्वा विश्वामित्रोऽभ्यभाषत ।
रामं कमलपत्राक्षमाभाष्य मधुरं वचः ॥ १३ ॥
हन्त ते कथयिष्यामि शृणु यस्यायमाश्रमः ।
यथा शून्योऽभवच्चायं शप्तः कोपान्महात्मना ॥ १४ ॥
गौतमस्याश्रमः पुण्यो ह्ययमासीन्महात्मनः ।
नित्यं पुष्पफलोपेतैः पादपैरुपशोभितः ॥ १५ ॥
स चेह तप आतिष्ठदहल्यासहितो मुनिः ।
संवत्सरसहस्राणि बहूनि रघुनन्दन ॥ १६ ॥
तस्यान्तरं विदित्वाथ कामार्तस्त्रिदिवेश्वरः ।
मुनिवेशधरो भूत्वा सोऽहल्यामिदमब्रवीत् ॥ १७ ॥
ऋतुकालः प्रतीक्ष्योऽपि न प्रतीक्ष्ये सुमध्यमे ।
संगमं शीघ्रमिच्छामि पृथुश्रोणि सह त्वया ॥ १८ ॥
मुनिवेशधरं शक्रं सा ज्ञात्वापि परंतप ।
मतिं चकार दुर्मेधा देवराजकुतूहलात् ॥ १९ ॥

अब्रवीच्च सुरश्रेष्ठं कृतार्थं सा वचस्तदा ।
कृतार्थोऽसि सुरश्रेष्ठ गच्छ शीघ्रमलक्षितः ॥ २० ॥
आत्मानं मां च देवेश सर्वथा रक्ष मानद ।
तामिन्द्रः प्रहसन् वाक्यमहल्यामिदमब्रवीत् ॥ २१ ॥
सुश्रोणि परितुष्टोऽस्मि गमिष्यामि क्षमस्व मे ।
एवमुक्त्वा ततोऽहल्यां निष्क्रामन्नुटजान्मुनेः ॥ २२ ॥
संभ्रमात् त्वरितो राम शङ्कितो गौतमं प्रति ।
ददर्श सहसायान्तं गौतमं दीप्ततेजसं ॥ २३ ॥
देवैरपि सुदुर्धर्षं तपोवीर्यबलाश्रयात् ।
पुण्यतीर्थोदकक्लिन्नमाज्यक्लिन्नमिवानलं ॥ २४ ॥
दृष्ट्वा च तं तदा शक्रो विषादमगमत् परं ।
सोऽपि दृष्ट्वैव देवेन्द्रं मुनिवेशधरं मुनिः ॥ २५ ॥
दुर्वृत्तं वृत्तसंपन्नो रोषाद्वचनमब्रवीत् ।
मम रूपं समास्थाय कृतवानसि दुर्मते ॥ २६ ॥
अकर्तव्यमिदं यस्मात् तस्मात् त्वं विफलो भव ।
गौतमेनैवमुक्तस्य सरोषेण महात्मना ॥ २७ ॥
पेततुर्वृषणौ भूमौ सहस्राक्षस्य राघव ।
व्यथितः स तदा चासीद्धतौजा विफलीकृतः ॥ २८ ॥
धर्षितस्तपसोग्रेण कश्मलं चापि सोऽविशत् ।
तं शप्त्वैव मुनिवरो भार्यां तामपि शप्तवान् ॥ २९ ॥

वर्षपूगानसंख्येयांस्त्वं पापे दुष्टचारिणि ।
तप्यमाना निरालम्बा सततं भस्मशायिनी ॥ ३० ॥
अदृश्या सर्वभूतानां वनेऽस्मिंस्त्वं निवत्स्यसि ।
यदा विदं वनं घोरं रामो दशरथात्मजः ॥ ३१ ॥
आगमिष्यति तं दृष्ट्वा धूतपापा भविष्यसि ।
तस्यातिथ्यं सुदुर्मेधे कृत्वा लोभविवर्जिता ॥ ३२ ॥
मत्समीपं मुदोपेता समुपैष्यस्यसंशयं ।
एवमुक्त्वा महातेजा गौतमो दुष्टचारिणीं ॥ ३३ ॥
पुण्यदेशं समासाद्य सिद्धचारणसेवितं ।
हिमवच्छिखरं गत्वा तपस्तेपे सुदुश्चरं ॥ ३४ ॥

इत्यार्षे रामायणे आदिकाण्डे शक्राहल्याशापो नाम
एकोनपञ्चाशः सर्गः ॥

L.

विफलस्तु कृतः शक्रो देवानग्निपुरोगमान् ।
अब्रवीत् त्रस्तमानसः सहसिद्धर्षिचारणान् ॥ १ ॥
कुर्वता तपसो विघ्नं प्राप्तेयं विक्रिया मया ।
गौतमात् क्रोधमुत्पाद्य सुरकार्यचिकीर्षुणा ॥ २ ॥
अफलोऽहं कृतस्तेन क्रोधात् सा च निराकृता ।
शापमोक्षेण तेनास्य तपोविघ्नः कृतो मया ॥ ३ ॥
तन्मां सुरगणाः सर्वे सर्षिसंघाः सचारणाः ।
सुरकार्यार्थमफलं सफलं कर्तुमर्हथ ॥ ४ ॥
शतक्रतोर्वचः श्रुत्वा देवा अग्निपुरोगमाः ।
ऊचुः पितृगणान् वाक्यमिदं तत्र समागतान् ॥ ५ ॥
एष मेषः सवृषणः शक्रश्चावृषणीकृतः ।
अस्येमौ वृषणौ छित्वा महेन्द्राय प्रयच्छत ॥ ६ ॥
अफलस्तु कृतो मेषः परां तुष्टिमुपैष्यति ।
भवतामुपयोगेन तच्चास्य सुमहत् फलं ॥ ७ ॥
तस्मान्मेषस्य वृषणौ छित्वेमौ दातुमर्हथ ।
इन्द्राय सुरकार्यार्थं विफलाय पितामहाः ॥ ८ ॥
श्रुत्वाथाग्निपुरोगानां देवानां पितरो वचः ।
उत्कृत्य मेषवृषणाविन्द्रायोपददुस्तदा ॥ ९ ॥

ततःप्रभृति काकुत्स्थ पितरः कव्यभोजिनः ।
अफलं भुञ्जते मेषं सफलं तु न भुञ्जते ॥ १० ॥
इन्द्रश्च मेषवृषणास्ततःप्रभृति राघव ।
गौतमस्य प्रभावेन बभूवामिततेजसः ॥ ११ ॥
तस्मात् प्रविश रामाशु गौतमस्याश्रमं विभो ।
तारयेमां महाभागामहल्यां शापविज्वतां ॥ १२ ॥
विश्वामित्रवचः श्रुत्वा रामः सौमित्रिणा सह ।
विश्वामित्रं पुरस्कृत्य प्रविवेशाश्रमं ततः ॥ १३ ॥
स ददर्श महाभागां तपसा द्योतितप्रभां ।
सेन्द्रैरपि सुरैः साक्षादनालक्ष्यां समागतैः ॥ १४ ॥
प्रयत्नान्निर्मितां धात्रा दिव्यां मायामयीमिव ।
धूमेनाभिपरीताङ्गीं दीप्तामग्निशिखामिव ॥ १५ ॥
तुषारेणावृतां साभ्रां पूर्णचन्द्रप्रभामिव ।
मध्येऽम्भसो दुराधर्षां दीप्तां सूर्यप्रभामिव ॥ १६ ॥
सा हि गौतमवाक्येन दुर्निरीक्ष्या बभूव ह ।
त्रयाणामपि लोकानां यावद्रामस्य दर्शनं ॥ १७ ॥
दृष्ट्वैव राघवौ तस्याः पादौ जगृहतुस्तदा ।
सा च तौ पूजयामास स्मृत्वा गौतमभाषितं ॥ १८ ॥
पाद्यार्घ्यासनसत्कारैर्यथावत् प्रीतमानसा ।
प्रतिजग्राह रामश्च पूजां तां विधिवत् तदा ॥ १९ ॥

सस्वनुर्देववाद्यानि पुष्पवृष्टिः पपात खात् ।
गन्धर्वाप्सरसां चैव महानासीत् समागमः ॥ २० ॥
साधु साध्विति देवाश्च तदाहल्यामपूजयन् ।
विशुद्धां तपसोग्रेण तदा रामसमागमे ॥ २१ ॥
गौतमोऽथ महातेजा दृष्ट्वा दिव्येन चक्षुषा ।
स्वमाश्रमपदं राममागतं प्रत्यपूजयत् ॥ २२ ॥
समेत्य भार्यया चैव पूतयाहल्यया तदा ।
तत्रैव सहितो भूयस्तपस्तेपे महायशाः ॥ २३ ॥
रामोऽपि परमां पूजां गौतमादृषिसत्तमात् ।
अवाप्य विधिवत् तस्माज्जगाम मिथिलां प्रति ॥ २४ ॥

इत्यार्षे रामायणे आदिकाण्डे अहल्यादर्शनं नाम
पञ्चाशः सर्गः ॥

LI.

ततः प्रागुत्तरां गत्वा दिशं रामः सलक्ष्मणः ।
विश्वामित्रं पुरस्कृत्य यज्ञवाटं ददर्श ह ॥ १ ॥
तं रामो मुनिशार्दूलं दृष्ट्वा यज्ञमभाषत ।
अहो समृद्धिर्यज्ञस्य जनकस्य महात्मनः ॥ २ ॥
बहूनीह सहस्राणि नानादेशनिवासिनां ।
समागतानां विप्राणां देशभाषाधिकारिणां ॥ ३ ॥
दृश्यन्ते ब्राह्मणानां च वासा ब्रह्मरथाः कृताः ।
देशः परीक्ष्यतां ह्यद्यो वत्स्यामो यत्र वै वयं ॥ ४ ॥
इति रामवचः श्रुत्वा विश्वामित्रो महामनाः ।
निवेशमकरोद्देशे विविक्ते सलिलप्लुते ॥ ५ ॥
विश्वामित्रमृषिं प्राप्तं श्रुत्वाथ मिथिलेश्वरः ।
शतानन्दं पुरस्कृत्य पुरोहितमकल्मषं ॥ ६ ॥
ऋत्विग्भिः सहितश्चान्यैरादायार्घ्यं त्वरान्वितः ।
विश्वामित्राय सत्कृत्य ददौ मन्त्रपुरस्कृतं ॥ ७ ॥
प्रतिगृह्य स तां पूजां जनकान्मुनिसत्तमः ।
पप्रच्छानामयं चैव यज्ञसामृद्ध्यमेव च ॥ ८ ॥
तांश्चैवान्यान् मुनीन् सर्वानागतान् सपुरोहितान् ।
यथान्यायं यथायोगं पर्यपृच्छदनामयं ॥ ९ ॥

अथ राजा मुनिश्रेष्ठं कृताञ्जलिरभाषत ।
आसने भगवन् क्लृप्ते उपवेष्टुमिहार्हसि ॥ १० ॥
जनकेनैवमुक्तोऽथ विश्वामित्रो महामुनिः ।
निषसाद ततश्चैनं स राजा मन्त्रिभिः सह ॥ ११ ॥
उपविष्टमुपेत्येदं कृताञ्जलिरभाषत ।
अमृतस्येव संप्राप्तिरद्य मे भगवन् मुने ॥ १२ ॥
अद्य यज्ञसमृद्धिर्मे सफला दैवतैः कृता ।
अद्य यज्ञफलावाप्तिर्ममाभ्यागमनात् तव ॥ १३ ॥
धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे त्वं महामुने ।
यज्ञस्यावभृथं पुण्यं द्रष्टासि सपदानुगः ॥ १४ ॥
द्वादशाहं च शेषं मे यज्ञस्याहुर्द्विजातयः ।
ततो भागार्थिनो देवानिह द्रक्ष्यस्युपागतान् ॥ १५ ॥
उष्यतामिह मत्प्रीत्या सहैभिर्ब्रह्मवादिभिः ।
एतान्यहानि सुसुखं ततो यास्यथ सत्कृताः ॥ १६ ॥
एतौ च मुनिशार्दूल कुमाराविव पावकौ ।
काकपक्षधरौ कस्य किमर्थं चाभ्युपागतौ ॥ १७ ॥
व्यूढोरस्कौ दीर्घभुजौ खड्गतूणधनुर्धरौ ।
अश्विनोः सदृशौ रूपे कस्यातिप्रियदर्शनौ ॥ १८ ॥
किमर्थं सुकुमाराङ्गावध्वानं संश्रितावुभौ ।
देवाविवानवद्याङ्गौ श्रोतुं कौतूहलं मम ॥ १९ ॥

तस्यैतद्वचनं श्रुत्वा जनकस्य महात्मनः ।
न्यवेदयन्महात्मानौ सुतौ दशरथस्य तौ ॥ २० ॥
तत्रागमनमव्यग्रं राक्षसानां च तं वधं ।
सिद्धाश्रमनिवासं च विशालस्य च दर्शनं ॥ २१ ॥
गौतमस्य च शापान्तमहल्यायाश्च दर्शनं ।
रामस्य धनुषश्चैव जिज्ञासार्थमुपागमं ॥ २२ ॥
इति सर्वं महातेजा जनकाय महात्मने ।
निवेद्य विरराामाथ विश्वामित्रो महामुनिः ॥ २३ ॥

इत्यार्षे रामायणे आदिकाण्डे जनकसमागमो नाम
एकपञ्चाशः सर्गः ॥

LII.

तस्य तद्वचनं श्रुत्वा विश्वामित्रस्य धीमतः ।
हृष्टरोमा भृशं भूत्वा शतानन्दो महातपाः ॥ १ ॥
गौतमस्य सुतो ज्येष्ठस्तपसा द्योतितप्रभः ।
रामसंदर्शनं प्राप्य विस्मयं परमं ययौ ॥ २ ॥
संनिषण्णावुभौ दृष्ट्वा सदृशौ रामलक्ष्मणौ ।
शतानन्दो मुनिश्रेष्ठं विश्वामित्रमभाषत ॥ ३ ॥
अपि त्वया मुनिश्रेष्ठ मम माता यशस्विनी ।
दर्शिता राजपुत्रस्य रामस्यास्य महात्मनः ॥ ४ ॥
अपि रामाय मे माता पूजार्हाय महात्मने ।
पूजां कृतवती सम्यगहल्या भृशदुःखिता ॥ ५ ॥
अपि रामाय कथितं यथावृत्तं पुरातनं ।
मम मातुर्महाबुद्धे देवेन यदनुष्ठितं ॥ ६ ॥
अपि कौशिक माता मे संगता गुरुणा पुनः ।
शापाग्निदग्धा पित्रा मे रामदर्शननिर्मला ॥ ७ ॥
अपि प्रीतेन मनसा गुरुर्मे कुशिकात्मज ।
पूतां दीर्घेण तपसा मातरं मेऽभ्यनन्दत ॥ ८ ॥
अपि मे गुरुणा ब्रह्मन् पूजितोऽसि यथार्हतः ।
इहागतो महातेजाः पूजां प्राप्य महात्मनः ॥ ९ ॥

तच्छ्रुत्वा वचनं तस्य विश्वामित्रो महायशाः ।
प्रत्युवाच शतानन्दं वाक्यं वाक्यविशारदः ॥ १० ॥
नातिक्रान्तमिदं ब्रह्मन् यत्कार्यं तत्कृतं मया ।
संगता गुरुणा पत्नी भार्गवेणेव रेणुका ॥ ११ ॥
तच्छ्रुत्वा वचनं तस्य विश्वामित्रस्य धीमतः ।
शतानन्दस्ततो राममिदं वचनमब्रवीत् ॥ १२ ॥
स्वागतं ते रघुश्रेष्ठ दिष्ट्या प्राप्तोऽसि मे प्रभो ।
विश्वामित्रेण सहित इमं यज्ञं महात्मनः ॥ १३ ॥
अचिन्त्यो ह्येष धर्मात्मा राजर्षिरमितद्युतिः ।
विश्वामित्रो महातेजा यश्च ते परमो गुरुः ॥ १४ ॥
नास्ति धन्यतरो राम त्वदन्यो भुवि कश्चन ।
यस्य ते हितकामोऽयं विश्वामित्रस्तपोनिधिः ॥ १५ ॥
श्रूयतां च पुरावृत्तं कौशिकस्य महात्मनः ।
यद्वीर्यो यत्प्रभावोऽयं यद्योगश्च महायशाः ॥ १६ ॥
राजाभूदेष धर्मात्मा दीर्घकालमरिंदमः ।
धर्मज्ञश्च क्रियावांश्च प्रजानां पालने रतः ॥ १७ ॥
पितामहसुतस्त्वासीत् कुशो नाम महीपतिः ।
कुशस्य पुत्रो बलवान् कुशनाभः सुधार्मिकः ॥ १८ ॥
कुशनाभसुतस्त्वासीद्गाधिर्नाम महामतिः ।
तस्य पुत्रो महातेजा विश्वामित्रो महामुनिः ॥ १९ ॥

विश्वामित्रस्तु धर्मात्मा पालयन् मेदिनीमिमां ।
वर्षायुतान्यनेकानि राजा राज्यमकारयत् ॥ २० ॥
कदाचित् स महातेजा योजयित्वा षडङ्गिनीं ।
अक्षौहिणीपरिवृतः परिचक्राम मेदिनीं ॥ २१ ॥
सरितः पर्वतांश्चैव वनानि नगराणि च ।
विचरन् क्रमशो राजा आजगाम महायशाः ॥ २२ ॥
वशिष्ठस्याश्रमपदं नानापुष्पफलद्रुमं ।
नानामृगगणाकीर्णं सिद्धचारणसेवितं ॥ २३ ॥
तपश्चरणसंसिद्धैरग्निकल्पैर्महात्मभिः ।
सततं संकुलं श्रीमद्ब्रह्मकल्पैर्महाव्रतैः ॥ २४ ॥
अब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा ।
फलमूलाशिभिर्दान्तैर्जितक्रोधैर्जितेन्द्रियैः ॥ २५ ॥
प्रक्षालनैरश्मकुट्टैर्दन्तोलूखलिभिस्तथा ।
ऋषिभिर्बालखिल्यैश्च जपहोमपरायणैः ॥ २६ ॥
वशिष्ठस्याश्रमपदं ब्रह्मस्थानमनुत्तमं ।
अपश्यज्जयतां श्रेष्ठो विश्वामित्रो महामनाः ॥ २७ ॥

इत्यार्षे रामायणे आदिकाण्डे शतानन्दवाक्यं नाम
द्विपञ्चाशः सर्गः ॥

LIII.

स दृष्ट्वा परमप्रीतो विश्वामित्रो महाबलः ।
प्रणतो विनयाद्वीरो वशिष्ठं जपतां वरं ॥ १ ॥
स्वागतं च तवेत्युक्ता वशिष्ठेन महात्मना ।
आसनं तस्य विधिवत् प्रदिष्टं जगतीपतेः ॥ २ ॥
उपविष्टाय च तदा विश्वामित्राय धीमते ।
वृष्यामग्र्यां मुनिवरः फलमूलमुपाहरत् ॥ ३ ॥
प्रतिगृह्य तु तां पूजां वशिष्ठाद्राजसत्तमः ।
तमग्निहोत्रे शिष्येषु पप्रच्छ कुशलं ततः ॥ ४ ॥
विश्वामित्रो महातेजा वनस्पतिगणैस्तथा ।
सर्वत्र कुशलं चोक्ता वशिष्ठो मुनिसत्तमः ॥ ५ ॥
सुखोपविष्टं राजानं विश्वामित्रं महातपाः ।
अपृच्छज्जयतां श्रेष्ठं गाधिजं ब्रह्मणः सुतः ॥ ६ ॥
कच्चित् ते कुशलं राजन् कच्चिद्धर्मेण रञ्जयन् ।
प्रजाः पालयसे नित्यं राजवृत्तेन धार्मिकः ॥ ७ ॥
कच्चित् ते सुभृता भृत्याः कच्चित् तिष्ठन्ति शासने ।
कच्चित् ते विजिताः सर्वे रिपवो रिपुसूदन ॥ ८ ॥
कच्चिद्बलेषु कोषेषु मित्रेषु च परंतप ।
कुशलं ते नरव्याघ्र पुत्रपौत्रेषु चानघ ॥ ९ ॥

सर्वत्र कुशलं राजा वशिष्ठं प्रत्युवाच ह ।
विश्वामित्रो महातेजास्तमतो विनयान्वितः ॥ १० ॥
कृत्वा तु सुचिरं कालं धर्मिष्ठां तां कथां तदा ।
मुदा परमया युक्तावभिनन्द्य परस्परं ॥ ११ ॥
ततो वशिष्ठो भगवान् कथान्ते मुनिसत्तमः ।
विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव ॥ १२ ॥
आतिथ्यं कर्तुमिच्छामि बलस्यास्य महाबल ।
तव चैवाप्रमेयस्य यथार्हं प्रतिगृह्यतां ॥ १३ ॥
सत्क्रियां प्रतिगृह्णातु भवानिह मयोद्यतां ।
राजंस्त्वमतिथिश्रेष्ठः पूजनीयः प्रयत्नतः ॥ १४ ॥
एवमुक्तो वशिष्ठेन विश्वामित्रो महीपतिः ।
कृतमित्यब्रवीद्राजा पूजा चानेन मे कृता ॥ १५ ॥
फलमूलेन भगवंस्तव यद्विद्यते प्रभो ।
पाद्येनाचमनीयेन भगवद्दर्शनेन च ॥ १६ ॥
सर्वथैव महातेजः पूजार्हेणास्मि पूजितः ।
गमिष्यामि नमस्तेऽस्तु मैत्रेणेक्षस्व चक्षुषा ॥ १७ ॥
एवं ब्रुवन्तं राजानं वशिष्ठः पुनरेव तु ।
न्यमन्त्रयदमेयात्मा पुनः पुनरुदारधीः ॥ १८ ॥
बाढमित्येव गाधेयो वशिष्ठं प्रत्युवाच ह ।
यथा प्रियं भगवतस्तथास्तु मुनिपुंगव ॥ १९ ॥

एवमुक्तो महातेजा वशिष्ठो जपतां वरः ।
आजुहाव ततः प्रीतः कामदां धूतकल्मषां ॥ २० ॥
एह्येहि शबले क्षिप्रं शृणु चैव वचो मम ।
सबलस्यास्य राजर्षेः कर्तुं व्यवसितो ह्यहं ॥ २१ ॥
भोजनेन महार्हेण सत्कारं तद्विधत्स्व मे ।
यस्य यस्य यथा कामः षड्रसेष्वभिवाञ्छितः ॥ २२ ॥
तत् सर्वं कामधुग्दिव्ये अभिवर्षेह मत्कृते ।
रसैरन्नेन पानेन चोष्यलेह्येन सवरं ।
कुरु राज्ञोऽस्य शबले परमातिथ्यसत्क्रियां ॥ २३ ॥

इत्यार्षे रामायणे आदिकाण्डे शतानन्दवाक्ये
विश्वामित्रनिमन्त्रणं नाम
त्रिपञ्चाशः सर्गः ॥

LIV.

एवमुक्ता वशिष्ठेन शबला शत्रुसूदन ।
विदधे कामधुक् कामान् यस्य यस्य यथेप्सितान् ॥ १ ॥
इक्षून् मधूनि लाजांश्च मैरेयं च वरासवं ।
पानानि च महार्हाणि भक्ष्यांश्च विविधांस्तथा ॥ २ ॥
चोष्यांश्चमोदनस्यापि राशीन् पर्वतसंनिभान् ।
मिष्टान्नानि तथा पूपान् दधिकुल्यास्तथैव च ॥ ३ ॥
नानास्वादुरसानां च षड्रसानामितस्ततः ।
भाजनानि सुपूर्णानि गौडानि च सहस्रशः ॥ ४ ॥
सर्वमासीत् सुसंतुष्टं हृष्टपुष्टजनाकुलं ।
विश्वामित्रबलं राम वशिष्ठेनाभितर्पितं ॥ ५ ॥
यस्य यस्य यथा कामस्तस्य तस्य तथा तथा ।
अभिवर्षति कामौघैः शबला शत्रुसूदन ॥ ६ ॥
एवमस्य बलं सर्वं सर्वकामाभिपूजितं ।
विश्वामित्रस्य राजर्षेर्हृष्टपुष्टं तदाभवत् ॥ ७ ॥
सान्तःपुरजनो राजा सब्राह्मणपुरोगमः ।
सामात्यमन्त्रिसहितः सभृत्यबलवाहनः ॥ ८ ॥
युक्तः परेण हर्षेण वशिष्ठमिदमब्रवीत् ।
पूजितोऽहं त्वया ब्रह्मन् पूजनार्हेण कामद ॥ ९ ॥

अयतामभिधास्यामि वाक्यं वाक्यविशारद ।
गवां शतसहस्रेण दीयतां शबला मम ॥ १० ॥
रत्नं हि भगवन्नेतद्रत्नभागी च पार्थिवः ।
तस्मान्मे शबलां देहि ममैषा धर्मतो द्विज ॥ ११ ॥
एवमुक्तस्तु भगवान् वशिष्ठो मुनिसत्तमः ।
विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिं ॥ १२ ॥
नाहं शतसहस्रेण नापि कोटिशतैर्गवां ।
राजन् दास्यामि शबलां राशिभी रजतस्य वा ॥ १३ ॥
न परित्यागमर्हेयं मत्सकाशादरिंदम ।
शाश्वती शबलेयं मे कीर्तिरात्मवतो यथा ॥ १४ ॥
अत्र हव्यं च कव्यं च प्राणयात्रा तथैव च ।
आयत्तमग्निहोत्रं च बलिर्होमस्तथैव च ॥ २५ ॥
स्वाहाकारवषट्कारौ विद्याश्च विविधास्तथा ।
आयत्ता ह्यत्र राजर्षे सर्व एते न संशयः ॥ १६ ॥
सर्वमेतद्धि सत्यं ते मम पुष्टिकरं सदा ।
कारणैर्बहुभी राजन् न दास्ये नन्दिनीं तव ॥ १७ ॥
वशिष्ठेनैवमुक्तस्तु विश्वामित्रोऽब्रवीद्वचः ।
संरब्धतरमत्यर्थं वाक्यं वाक्यविशारदः ॥ १८ ॥
सुवर्णकक्षान् ग्रैवेयान् सुवर्णाङ्कुशभूषणान् ।
ददामि कुञ्जरांस्तेऽहं सहस्राणि चतुर्दश ॥ १९ ॥

हैरण्यानां रथानां च श्वेतानां वै चतुर्युजां ।
ददामि ते शतान्यष्टौ किङ्किणीशतघोषिणां ॥ २० ॥
हयानां देशजातानां कुलजानां महौजसां ।
सहस्रमेकं दश च ददामि तव सुव्रत ॥ २१ ॥
नानावर्णविभक्तानां वयःस्थानां तथैव च ।
ददाम्येकां गवां कोटिं दीयतां शबला मम ॥ २२ ॥
एवमुक्तः स भगवान् विश्वामित्रेण धीमता ।
नैव दास्यामि शबलामिति राजानमब्रवीत् ॥ २३ ॥
एतदेव हि मे रत्नमेतदेव हि मे धनं ।
एतदेव हि सर्वस्वमेतदेव हि जीवितं ॥ २४ ॥
दर्शश्च पौर्णमासश्च यज्ञाश्चैवाप्तदक्षिणाः ।
एतदेव हि मे राजन् क्रियाश्च विविधास्तथा ॥ २५ ॥
एतन्मूलाः क्रियाः सर्वा मम राजन् न संशयः ।
बहुना किं प्रलापेन न दास्ये कामदोहिनीं ॥ २६ ॥

इत्यार्षे रामायणे आदिकाण्डे शतानन्दोपाख्याने
वशिष्ठविश्वामित्रसंवादो नाम
चतुःपञ्चाशः सर्गः ॥

LV.

कामधेनुं वशिष्ठोऽसौ न तत्याज यदा मुनिः ।
ततोऽस्य शबलां राजा विश्वामित्रस्तदाहरत् ॥ १ ॥
नीयमाना तु शबला राम राज्ञा महात्मना ।
ध्यायन्ती चिन्तयामास रुदन्ती शोकविह्वला ॥ २ ॥
परित्यक्ता वशिष्ठेन किमहं सुमहात्मना ।
याहं राजभटैर्दीना ह्रिये परमदुःखिता ॥ ३ ॥
किं मयापकृतं तस्य महर्षेर्भावितात्मनः ।
यन्मामनागसं स्विष्टां भक्तां त्यजति धार्मिकः ॥ ४ ॥
इति संचिन्तयित्वा तु निःश्वस्य च पुनः पुनः ।
प्रययौ साथ वेगेन वशिष्ठं प्रति राघव ॥ ५ ॥
निर्धूय तान् राजभृत्यान् शतशोऽथ सहस्रशः ।
जगामानिलवेगा सा पादमूलं महामुनेः ॥ ६ ॥
गत्वा च रुदती शोकादिदं वचनमब्रवीत् ।
वशिष्ठस्याग्रतः स्थित्वा हम्भारवविराविणी ॥ ७ ॥
भगवन् किं परित्यक्ता त्वयाहं ब्रह्मणः सुत ।
यन्मां राजभृता एते नयन्ति त्वत्सकाशतः ॥ ८ ॥
ब्रह्मर्षिरेवमुक्तस्तु तामिदं वाक्यमब्रवीत् ।
शोकसंतप्तहृदयां स्वसारमिव दुःखितां ॥ ९ ॥

न त्वां त्यजामि शबले नापि मेऽपकृतं त्वया ।
एष त्वां नयते राजा बलान्मम महाबलः ॥ १० ॥
न हि तुल्यं बलं मन्ये राज्ञो विप्रैर्विशेषतः ।
बली राजा क्षत्रियश्च पृथिव्याः पतिरेव च ॥ ११ ॥
इयमक्षौहिणी पूर्णा गजवाजिरथाकुला ।
पत्तिध्वजनरौघैश्च ययैष बलवत्तरः ॥ १२ ॥
एवमुक्ता वशिष्ठेन प्रत्युवाच विनीतवत् ।
वचनं वचनज्ञा सा ब्रह्मर्षिममितप्रभं ॥ १३ ॥
न बलं क्षत्रियस्याहुर्ब्राह्मणस्य बलाधिकं ।
ब्रह्मन् ब्रह्मबलं दिव्यं क्षात्राच्च बलवत्तरं ॥ १४ ॥
अप्रमेयं बलं तेऽस्ति नायं त्वद्बलवत्तरः ।
विश्वामित्रो महावीर्यस्तेजस्तव दुरासदं ॥ १५ ॥
नियुङ्क्ष्व मां महातेजस्त्वं ब्रह्मन् बलसंभृतां ।
बलं दर्पं च यावद्धि नाशयामि दुरात्मनः ॥ १६ ॥
इत्युक्तस्तु तया राम वशिष्ठः सुमहातपाः ।
सृज त्वमिति होवाच बलं परबलार्दनं ॥ १७ ॥
तस्या हुम्भारवोत्सृष्टाः पह्लवाः शतशो नृप ।
अनाशयन् बलं सर्वं विश्वामित्रस्य पश्यतः ॥ १८ ॥
स राजा परमायस्तः क्रोधविस्फुरितेक्षणः ।
पह्लवान् नाशयामास शस्त्रैरुच्चावचैस्तदा ॥ १९ ॥

विश्वामित्रार्दितान् दृष्ट्वा पह्लवान् शतशस्तथा ।
भूय एवासृजद्घोरान् शकान् यवनमिश्रितान् ॥ २० ॥
तैरासीत् संवृता भूमिः शकैर्यवनमिश्रितैः ।
प्रधावद्भिर्महावीर्यैः पद्मकिञ्जल्कसंनिभैः ॥ २१ ॥
दीर्घासिपट्टिशधरैर्हेमवर्मायुधावृतैः ।
निर्दग्धं तद्बलं सर्वं प्रदीप्तैरिव पावकैः ॥ २२ ॥
दह्यमानं बलं दृष्ट्वा संभ्रान्तश्चलितेन्द्रियः ।
ततोऽस्त्राणि महातेजा विश्वामित्रोऽभ्यवासृजत् ॥ २३ ॥

इत्यार्षे रामायणे आदिकाण्डे धेनुहरणे वशिष्ठवाक्यं नाम
पञ्चपञ्चाशः सर्गः ॥

LVI.

ततस्तान् व्याकुलान् दृष्ट्वा विश्वामित्रास्त्रमोहितान् ।
वशिष्ठश्चोदयामास स्वां धेनुं सृज योधिनः ॥ १ ॥
तस्या हुम्भारवाज्जाताः काम्बोजा रविसंनिभाः ।
ऊरसस्त्वभिसंजाताः पह्लवाः शस्त्रपाणयः ॥ २ ॥
योनिदेशाच्च यवनाः शकृद्देशाच्छकास्तथा ।
रोमकूपेषु म्लेच्छास्तु तुषाराः सकिरातकाः ॥ ३ ॥
यैस्तन्निषूदितं सैन्यं विश्वामित्रस्य तत्क्षणात् ।
सपदातिरथं साश्वं सगजं रघुनन्दन ॥ ४ ॥
दृष्ट्वा निषूदितं सैन्यं वशिष्ठेन महात्मना ।
विश्वामित्रसुतानां तु शतं नानाविधायुधं ॥ ५ ॥
अभ्यधावत् सुसंक्रुद्धं वशिष्ठं जपतां वरं ।
हुङ्कारेणैव तान् सर्वान् निर्ददाह महामुनिः ॥ ६ ॥
ते साश्वरथपदाता वशिष्ठेन महात्मना ।
भस्मीकृता मुहूर्तेन विश्वामित्रसुतास्तदा ॥ ७ ॥
दृष्ट्वा विनाशितान् पुत्रान् बलं च सुमहाबलः ।
सव्रीडश्चिन्तयामास विश्वामित्रस्तदानघ ॥ ८ ॥
समुद्र इव निर्वेगो भग्नदंष्ट्र इवोरगः ।
उपरक्त इवादित्यः सद्यो निष्प्रभतां गतः ॥ ९ ॥

हतपुत्रबलो दीनो लूनपक्ष इव द्विजः ।
हतदर्पो हतोत्साहो निर्वेदं समपद्यत ॥ १० ॥
स पुत्रमेकं राज्याय नियुज्य परिपालने ।
पृथिव्या क्षत्रधर्मेण वनमेवाभ्यपद्यत ॥ ११ ॥
स गत्वा हिमवत्पार्श्वं किन्नरैरुपशोभितं ।
महादेवप्रसादार्थं तपस्तेपे सुदुश्चरं ॥ १२ ॥
केनचित् त्वथ कालेन महादेवो वृषध्वजः ।
आगत्य वरदो वीरं विश्वामित्रमभाषत ॥ १३ ॥
किमर्थं तप्यसे राजंस्तपो ब्रूहि विवक्षितं ।
वरदोऽस्मि वरो यस्ते काङ्क्षितः सोऽभिधीयतां ॥ १४ ॥
एवमुक्तस्तु देवेन विश्वामित्रो महातपाः ।
प्रणिपत्य महादेवमिदं वचनमब्रवीत् ॥ १५ ॥
यदि तुष्टोऽसि मे देव धनुर्वेदो महेश्वर ।
साङ्गोपाङ्गः सोपनिषत् सरहस्यः प्रदीयतां ॥ १६ ॥
यानि देवेषु चास्त्राणि दानवेषु तथर्षिषु ।
गन्धर्वयक्षरक्षःसु प्रतिभान्तु च तानि मे ॥ १७ ॥
तव प्रसादाद्भगवन् देवदेव ममेप्सितं ।
एवमस्त्विति देवेशो वाक्यमुक्त्वा दिवं ययौ ॥ १८ ॥
प्राप्य चास्त्राणि राजर्षिर्विश्वामित्रो महायशाः ।
हर्षेण महता युक्तो दर्पपूर्णस्तदाभवत् ॥ १९ ॥

विवर्धमानो वीर्येण समुद्र इव पर्वणि ।
जितमेव तदा मेने वशिष्ठं मुनिसत्तमं ॥ २० ॥
आगत्य चाश्रमपदं मुमोचास्त्राणि तस्य सः ।
यैस्तु तपोवनं सर्वं निर्दग्धमभवत् तदा ॥ २१ ॥
उदीर्यमाणमस्त्रं तद्विश्वामित्रस्य धीमतः ।
दृष्ट्वा विप्रद्रुता भीता ऋषयोऽथ सहस्रशः ॥ २२ ॥
वशिष्ठस्य च ये शिष्यास्तथैव मृगपक्षिणः ।
व्यद्रवन्त भयाद्भीता दिशः सर्वाः सहस्रशः ॥ २३ ॥
वशिष्ठस्याश्रमपदं शून्यमासीन्महात्मनः ।
मुहूर्तादिव निःशब्दमासीदीरिणसंनिभं ॥ २४ ॥
अवदच्च वशिष्ठस्तान् मा भैष्टेति मुहुर्मुहुः ।
नाशयाम्येष गाधेयं नीहारमिव भास्करः ॥ २५ ॥
एवमुक्त्वा महातेजा वशिष्ठो वदतां वरः ।
विश्वामित्रं तदा वाक्यं सरोषमिदमब्रवीत् ॥ २६ ॥
आश्रमं चिरसंवृद्धं यद्विनाशितवानसि ।
दुराचारोऽसि संमूढ तस्मात् त्वं प्रविनङ्क्ष्यसे ॥ २७ ॥
इत्युक्त्वा परमक्रुद्धो दण्डं जग्राह सत्वरः ।
सधूममिव कालाग्निं यमदण्डमिवापरं ॥ २८ ॥

इत्यार्षे रामायणे आदिकाण्डे शतानन्दवाक्ये
वशिष्ठाश्रमदाहो नाम षट्पञ्चाशः सर्गः ॥

LVII.

एवमुक्तो वशिष्ठेन विश्वामित्रो महाबलः ।
आग्नेयास्त्रं समुत्क्षिप्य तिष्ठ तिष्ठेत्यथाब्रवीत् ॥ १ ॥
तस्य तद्वचनं श्रुत्वा वशिष्ठः प्रत्यभाषत ।
स्थितोऽस्म्येष क्षत्रबन्धो यद्बलं तद्विदर्शय ॥ २ ॥
नाशयाम्येष ते दर्पं शस्त्रस्याद्यक्ष गाधिज ।
क्व च क्षात्रं बलं मूढ क्व च ब्राह्मं महद्बलं ॥ ३ ॥
पश्य ब्राह्मं बलं दिव्यं मम क्षत्रियपांसन ।
तच्चास्त्रं गाधिपुत्रस्य घोरमाग्नेयमुत्तमं ॥ ४ ॥
ब्रह्मदण्डाहतं शान्तमग्निवेग इवाम्भसा ।
रौद्रं च वारुणं चैव ऐन्द्रं पाशुपतं तथा ॥ ५ ॥
ऐशिकं चापि चिक्षेप रुषितो गाधिनन्दनः ।
मानसं मानवं चैव गान्धर्वं स्वापनं तथा ॥ ६ ॥
भ्रंशनं मोहनं चैव संतापनविलापने ।
शोषणं दारुणं चैव वज्रमस्त्रं सुदुर्जयं ॥ ७ ॥
दण्डास्त्रमथ पैशाचं क्रौञ्चमस्त्रं तथैव च ।
शक्तिद्वयं च चिक्षेप कङ्कालं मुषलं तथा ॥ ८ ॥
वैद्याधरं महास्त्रं च कालास्त्रमथ दारुणं ।
धर्मचक्रं विष्णुचक्रं कालचक्रं तथैव च ॥ ९ ॥

ब्रह्मपाशं कालपाशं वारुणं पाशमेव च ।
पैनाकमस्त्रं शुष्कार्द्रे दयिते चाशनी तथा ॥ १० ॥
वायव्यं मथनं चैव अस्त्रं हयशिरस्तथा ।
त्रिशूलमस्त्रं घोरं च कापालमथ किङ्किणीं ॥ ११ ॥
एतान्यस्त्राणि सर्वाणि चिक्षेप कुशिकात्मजः ।
वशिष्ठे सुमहाभागे तदद्भुतमिवाभवत् ॥ १२ ॥
तानि दण्डेन सर्वाणि न्यबधीद्ब्रह्मणः सुतः ।
तेषु शान्तेषु ब्रह्मास्त्रं प्राक्षिपद्गाधिनन्दनः ॥ १३ ॥
तदस्त्रमुद्यतं दृष्ट्वा देवाः साग्निपुरोगमाः ।
देवर्षयश्च संत्रस्ता गन्धर्वाश्च महोरगाः ॥ १४ ॥
त्रैलोक्यमासीत् संत्रस्तं ब्रह्मास्त्रे समुदीरिते ।
तदप्यस्त्रं महाघोरं ब्राह्मं ब्राह्मेण तेजसा ॥ १५ ॥
वशिष्ठोऽग्रसदव्यग्रो ब्रह्मदण्डेन राघव ।
ब्रह्मास्त्रं ग्रसतस्तस्य वशिष्ठस्य महात्मनः ॥ १६ ॥
त्रैलोक्यमोहनं रौद्रं रूपमासीत् सुदुःसहं ।
सर्वेभ्यो रोमकूपेभ्यो वशिष्ठस्य महात्मनः ॥ १७ ॥
मरीच्य इव निष्पेतुः सधूमा ज्वलनार्चिषः ।
प्राज्वलद्ब्रह्मदण्डश्च वशिष्ठस्य करोद्यतः ॥ १८ ॥
सधूम इव कालाग्निर्यमदण्ड इवापरः ।
ततोऽस्तुवंस्तु मुनयो वशिष्ठं जपतां वरं ॥ १९ ॥

अमोघं ते बलं ब्रह्मंस्तेजो धारय तेजसा ।
निगृहीतस्त्वया ब्रह्मन् विश्वामित्रो महाबलः ॥ २० ॥
प्रसीद द्विपदां श्रेष्ठ लोकाः सन्तु गतव्यथाः ।
एवमुक्तो महातेजाः शममाप महायशाः ॥ २१ ॥
विश्वामित्रोऽपि निकृतो विनिश्वस्येदमब्रवीत् ।
धिग्बलं क्षत्रियबलं ब्रह्मतेजोबलं बलं ॥ २२ ॥
एकेन ब्रह्मदण्डेन सर्वास्त्राणि हतानि मे ।
तदेतद्बलमालोक्य सर्वेन्द्रियसमाहितः ॥ २३ ॥
तपोबलं समास्थास्ये यद्वै ब्रह्मत्वकारणं ।
एवमुक्त्वा महातेजाः शस्त्रमुत्सृज्य दूरतः ॥ २४ ॥
ततः स निश्चयं कृत्वा ब्राह्मण्ये धृतमानसः ।
स जगाम तदा राम तपश्चरणनिश्चितः ॥ २५ ॥

इत्यार्षे रामायणे आदिकाण्डे शतानन्दवाक्ये
विश्वामित्रप्रतिज्ञा नाम सप्तपञ्चाशः सर्गः ॥

LVIII.

सोऽतप्यत ततो घोरं विश्वामित्रस्तपोनिधिः ।
विनिश्वस्य विनिश्वस्य कृतवैरो महात्मना ॥ १ ॥
दक्षिणां दिशमास्थाय महिष्या सह कौशिकः ।
फलमूलाशनस्तत्र चचार सुमहत् तपः ॥ २ ॥
ब्रह्मर्षित्वमभिप्रेप्सुर्वशिष्ठस्पर्धया विभुः ।
दृष्ट्वा ब्रह्मतपोयोगं वशिष्ठस्यात्मनोऽधिकं ॥ ३ ॥
तताप परमं राम तपोवनमुपाश्रितः ।
ब्राह्मणः स्यामिति मतिं समाधाय महामनाः ॥ ४ ॥
तत्रास्य जज्ञिरे पुत्राश्चत्वारो लोकविश्रुताः ।
हविस्यन्दमधुस्यन्ददृढनेत्रमहोदराः ॥ ५ ॥
तदानुशासतो राज्यमष्टौ पुत्रा महाबलाः ।
जज्ञिरे राजशार्दूलाद्वीर्यवन्तो महौजसः ॥ ६ ॥
वर्षाणां तत्र पूर्णेऽथ सहस्रे तपतां वरः ।
जज्वाल तपसा धीमान् कौशिकोऽग्निसमप्रभः ॥ ७ ॥

इत्यार्षे रामायणे आदिकाण्डे विश्वामित्रप्रशंसायां
अष्टपञ्चाशः सर्गः ॥

LIX.

पूर्णे वर्षसहस्रेऽथ ब्रह्मा लोकपितामहः ।
आगम्य गाधिजं राम सोऽब्रवीन्मधुरं वचः ॥ १ ॥
जितो राजर्षिलोकस्ते सुमहान् कुशिकात्मज ।
अनेन तपसा युक्तं राजर्षिं त्वां समर्थये ॥ २ ॥
एवमुक्त्वा महातेजा जगाम सह दैवतैः ।
त्रिपिष्टपाद्ब्रह्मलोकं लोकानां प्रभुरीश्वरः ॥ ३ ॥
विश्वामित्रोऽपि तच्छ्रुत्वा ह्रिया किञ्चिदवाङ्मुखः ।
दुःखेन महता युक्तः समन्युरिदमब्रवीत् ॥ ४ ॥
तपश्च सुमहत् तप्तं राजर्षिरिति चैव मां ।
अद्यापि भगवानाह नास्ति शङ्के तपःफलं ॥ ५ ॥
एवमुक्त्वा महातेजा भूय एव महामुनिः ।
तपश्चचार काकुत्स्थ परमं परमात्मवान् ॥ ६ ॥
एतस्मिन्नेव काले तु सत्यधर्मपरायणः ।
त्रिशङ्कुर्नाम राजाभूदिक्ष्वाकुकुलनन्दनः ॥ ७ ॥
तस्य बुद्धिः समुत्पन्ना यजेयमिति राघव ।
गच्छेयं स्वशरीरेण देवतानां परां गतिं ॥ ८ ॥

वशिष्ठं च समाहूय मतिमेतां न्यवेदयत् ।
अशक्यमेतदित्युक्तो वशिष्ठेन च धीमता ॥ ९ ॥
प्रत्याख्यातो वशिष्ठेन स ययौ दक्षिणां दिशं ।
वशिष्ठशतपुत्रैस्तु यत्र तैस्तप्यते तपः ॥ १० ॥
त्रिशङ्कुरथ पुत्राणां वशिष्ठस्य शतं तु तत् ।
ददर्श दीर्घतपसां तप्यतां तप उत्तमं ॥ ११ ॥
सोऽभिवाद्याञ्जलिं कृत्वा तानुवाच तपोधनान् ।
कुशलं चाव्ययं चैव पृष्ट्वा चैताननामयं ॥ १२ ॥
अब्रवीत् सुमहातेजा गुरुपुत्रान् नराधिपः ।
प्रत्याख्यातो वशिष्ठेन ह्रिया किञ्चिदवाङ्मुखः ॥ १३ ॥
शरणं वः प्रपन्नोऽहं शरण्यः शरणप्रदान् ।
त्रातुमर्हथ मां सर्वे प्रपन्नं शरणागतं ॥ १४ ॥
प्रत्याख्यातोऽस्मि गुरुणा वशिष्ठेन महात्मना ।
यष्टुकामो महायज्ञं तदनुज्ञातुमर्हथ ॥ १५ ॥
गुरुपुत्रानहं सर्वान् पुरस्कृत्य पुरोधसः ।
शिरसा प्रणतो भूत्वा याचे वस्तपसि स्थितान् ॥ १६ ॥
ते मां भवन्तः सिद्ध्यर्थं याजयन्तु समाहिताः ।
सशरीरो यथा स्वर्गं यज्ञेन समवाप्नुयां ॥ १७ ॥
प्रत्याख्यातो वशिष्ठेन गतिमन्यां तपोधनाः ।
गुरुपुत्रानृते सर्वान् नाहं पश्यामि तत्त्वतः ॥ १८ ॥

इक्ष्वाकूणां हि सर्वेषां वशिष्ठः प्रवरो गुरुः ।
तस्मादनन्तरं सर्वे भवन्तो गुरवो मम ॥ ११ ॥

इत्यार्षे रामायणे आदिकाण्डे
शतानन्दवाक्ये त्रिशङ्कुप्रत्याख्यानं नाम
एकोनषष्टितमः सर्गः ॥

LX.

त्रिशङ्कुवचनं श्रुत्वा ततः क्रोधसमन्वितं ।
ऋषिपुत्रशतं राम राजानमिदमब्रवीत् ॥ १ ॥
प्रत्याख्यातोऽसि दुर्बुद्धे गुरुणा सत्यवादिना ।
तदतिक्रम्य वचनं कस्मादस्मानुपागतः ॥ २ ॥
मूलमुत्सृज्य कस्मात् त्वं शाखास्विच्छसि लम्बितुं ।
नैतत् ते साधु यद्राजन्नस्मानिच्छसि सेवितुं ॥ ३ ॥
इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः ।
अतः क्षमं न ते तस्य वचोऽतिक्रम्य वर्तितुं ॥ ४ ॥
अशक्यमिति यत् प्राह वशिष्ठो भगवानृषिः ।
तदस्माभिः कथं शक्यं कर्तुमद्य बलादिव ॥ ५ ॥
बालिशोऽसि सुमन्दात्मन् गम्यतां स्वपुरं पुनः ।
याजने भगवानेव शक्तोऽसौ न वयं हि ते ॥ ६ ॥
तेषां तद्वचनं श्रुत्वा क्रोधव्याकुलिताक्षरं ।
राजा मन्युसमाविष्टो मुनिपुत्रानुवाच तान् ॥ ७ ॥
प्रत्याख्यातो वशिष्ठेन भवद्भिस्तदनन्तरं ।
अन्यां गतिं गमिष्यामि यष्टुं विदितमस्तु वः ॥ ८ ॥
ऋषिपुत्रास्तु तच्छ्रुत्वा घोराक्षरमिदं वचः ।
शेपुस्तं नृपतिं क्रुद्धाश्चाण्डालस्त्वं भविष्यसि ॥ ९ ॥

इति शप्त्वा तु राजानं विविशुस्ते स्वमाश्रमं ।
अथ रात्र्यां व्यतीतायां तस्यां राजा बभूव सः ॥ १० ॥
चाण्डालदर्शनो राम सद्य एव दुराकृतिः ।
अधो नीलाम्बरधरो रक्ताम्बरकृतोत्तरः ॥ ११ ॥
संरक्तताम्रघोराक्षः करालो हरिपिङ्गलः ।
ऋक्षचर्मनिवासी च लौहाभरणभूषितः ॥ १२ ॥
तं दृष्ट्वा सचिवास्तस्य सद्यश्चाण्डालतां गतं ।
दुद्रुवुः स्वपुरं राम पौरा ये चानुयायिनः ॥ १३ ॥
एक एव ततो राजा जगामाकुलचेतनः ।
शापजेन सुदुःखेन दह्यमानो दिवानिशं ॥ १४ ॥
विश्वामित्रं महात्मानं ततः शरणमाययौ ।
स्पर्धमानं वशिष्ठेन शरणार्थी तपोधनं ॥ १५ ॥
विश्वामित्रोऽपि दृष्ट्वैव राजानं तं तथागतं ।
चाण्डालरूपिणं राम कारुण्यं समुपागमत् ॥ १६ ॥
कारुण्याच्च महातेजा वाक्यं वाक्यविशारदः ।
अब्रवीद्गतलक्ष्मीकं राजानं घोरदर्शनं ॥ १७ ॥
किमागमनकृत्यं ते इक्ष्वाकुकुलनन्दन ।
अयोध्याधिपते वीर शापाच्चाण्डालतां गतः ॥ १८ ॥
अथ तद्वाक्यमाज्ञाय राजा चाण्डालदर्शनः ।
अब्रवीत् प्राञ्जलिर्वाक्यं विश्वामित्रं तपोधनं ॥ १९ ॥

प्रत्याख्यातोऽस्मि गुरुणा गुरुपुत्रैस्तथैव च ।
इमं विपर्ययं प्राप्तः काममप्राप्य काङ्क्षितं ॥ २० ॥
सशरीरो दिवं यायामिति मे सौम्य दर्शनं ।
महायज्ञफलेनेति तच्च नावाप्यते मया ॥ २१ ॥
अनृतं नोक्तपूर्वं हि विश्वामित्र मया क्वचित् ।
कृच्छ्रेऽपि वर्तमानेन क्षत्रधर्मेण ते शपे ॥ २२ ॥
यज्ञैर्मयेष्टं बहुभिर्धर्मतः पालिता मही ।
गुरवश्च मया सर्वे शीलवृत्तेन तोषिताः ॥ २३ ॥
धर्मे प्रयतमानस्य शुद्धवाग्बुद्धिकर्मणः ।
परितोषं न गच्छन्ति गुरवो मुनिपुंगव ॥ २४ ॥
दैवमत्र परं मन्ये पौरुषं तु निरर्थकं ।
शुभाशुभफलप्राप्तौ नराणामिति मे मतिः ॥ २५ ॥
तस्य मे परमार्तस्य दैवोपहतकर्मणः ।
शरणागतस्य भवान् प्रसादं कर्तुमर्हति ॥ २६ ॥
नान्यां गतिं प्रपश्यामि नान्यः शरणदोऽस्ति मे ।
दैवं पुरुषकारेण निवर्तयितुमर्हसि ॥ २७ ॥

इत्यार्षे रामायणे आदिकाण्डे शतानन्दवाक्ये त्रिशङ्कुशापो नाम षष्टितमः सर्गः ॥

LXI.

उक्तवाक्यं तु राजानं विश्वामित्रो महामुनिः ।
अब्रवीन्मधुरं वाक्यं त्रिशङ्कोर्हर्षवर्धनं ॥ १ ॥
इक्ष्वाको स्वागतं वत्स जानामि त्वां सुधार्मिकं ।
शरणं ते भविष्यामि वसेह त्वं ममाश्रमे ॥ २ ॥
सर्वानामन्त्रयिष्ये ऽहं त्वत्कृते ऽत्र तपोधनान् ।
काङ्क्षितस्यास्य ते राजन् सिद्धये यज्ञकर्मणि ॥ ३ ॥
गुरुशापकृतं रूपं यदेतद्धार्यते त्वया ।
संसिद्धस्त्वमनेनैव रूपेण स्वर्गमेष्यसि ॥ ४ ॥
हस्तप्राप्तमहं मन्ये स्वर्गं ते नृपसत्तम ।
यस्त्वं मामभ्युपागम्य त्रिदिवं गन्तुमिच्छसि ॥ ५ ॥
एवमुक्त्वा महातेजाः पुत्रानाहूय सर्वशः ।
शिष्यांश्च सुहृदश्चान्यानुवाचेदं वचो ऽर्थवत् ॥ ६ ॥
आनयध्वमिह क्षिप्रं यज्ञद्रव्याण्यशेषतः ।
मदीयेनैव यज्ञो ऽयं द्रव्येणास्य भविष्यति ॥ ७ ॥
शिष्यानुवाच चाहूय सर्वानेव तु तद्वचः ।
सर्वानृषीनानयध्वं समुपेत्याज्ञया मम ॥ ८ ॥
यश्च यद्वचनं ब्रूयान्ममवाक्यप्रचोदितः ।
तन्मे भवद्भिरावेद्यं यथा प्रोक्तमशेषतः ॥ ९ ॥

शिष्यास्ततोऽस्य ते जग्मुर्दिशः सर्वे तदाज्ञया ।
आमन्त्र्य चाभ्युपावृत्ता न चिरेण तपोधनान् ॥ १० ॥
ऊचुः प्राञ्जलयोऽभ्येत्य विश्वामित्रमिदं वचः ।
तवोपामन्त्रिताः सर्वे मुनयोऽस्माभिराज्ञया ॥ ११ ॥
आज्ञा प्रतिगृहीता ते सर्वैरेव तपोधनैः ।
अस्माभिरुक्तैरभ्येत्य वर्जयित्वा महोदयं ॥ १२ ॥
वशिष्ठस्य च पुत्राणां शतं क्रोधसमाकुलं ।
यदुवाच वचो घोरं शृणु त्वन्मुनिपुंगव ॥ १३ ॥
क्षत्रियो याजको यत्र चाण्डालस्य यियक्षतः ।
कथं सदसि भोक्ष्यन्ते हविस्तत्र सुरोत्तमाः ॥ १४ ॥
ब्राह्मणा वा महात्मानो भुक्त्वा चाण्डालभोजनं ।
कथं स्वर्गं गमिष्यन्ति विश्वामित्रेण पातिताः ॥ १५ ॥
निष्ठुरं वचनं प्राहुरेतत् संरक्तलोचनाः ।
वाशिष्ठा मुनिशार्दूल सर्वे ते समहोदयाः ॥ १६ ॥
इति तेषां वचः श्रुत्वा शिष्याणां मुनिपुंगवः ।
क्रोधसंरक्तनयन इदं वचनमब्रवीत् ॥ १७ ॥
यद्दूषयन्त्यदुष्टं मां वाशिष्ठा मन्दचेतसः ।
भस्मीभूता दुरात्मानः कालस्य वशमागताः ॥ १८ ॥
अद्य ते कालपाशेन नीता वैवस्वतक्षयं ।
सप्त जातिशतान्येव मृतपाः सन्तु सर्वशः ॥ १९ ॥

स्वमांसनियताहाराः पुष्टिकामाः सनिर्घृणाः ।
विकृताश्च विरूपाश्च लोकाननुचरन्त्विति ॥ २० ॥
महोदयश्च दुर्बुद्धिरदुष्टं मां प्रदूषयन् ।
दूषितः सर्वलोकेषु निषादत्वमवाप्स्यति ॥ २१ ॥
प्राणातिपातनिरतो निरनुक्रोशतां गतः ।
दीर्घकालं मम क्रोधाद्दुर्वृत्त्या वर्तयिष्यति ॥ २२ ॥
एतावदुक्त्वा वचनं विश्वामित्रो महामुनिः ।
विरराम महातेजास्तस्मिन् मुनिसमागमे ॥ २३ ॥

इत्यार्षे रामायणे आदिकाण्डे शतानन्दवाक्ये
वाशिष्ठशापो नाम एकषष्टितमः सर्गः ॥

LXII.

स क्रोधविषमुत्सृज्य गाधिजो रघुनन्दन ।
तपोबलहतान् कृत्वा वाशिष्ठान् समहोदयान् ॥ १ ॥
ऋषिमध्येऽपरं वाक्यं विश्वामित्रोऽभ्यभाषत ।
अयमिक्ष्वाकुदायादस्त्रिशङ्कुरिति विश्रुतः ॥ २ ॥
धार्मिकः सत्यसंधश्च मां चैव शरणं गतः ।
स्वेनानेन शरीरेण स्वर्गं गन्तुमभीप्सति ॥ ३ ॥
तदिदं मुनयः सर्वे समनुज्ञातुमर्हथ ।
विश्वामित्रवचः श्रुत्वा ततस्ते मुनिपुंगवाः ॥ ४ ॥
मिथः संमन्त्रयामासुर्विश्वामित्रभयार्दिताः ।
अयं कुशिकदायादस्तपस्वी क्रोधनो भृशं ॥ ५ ॥
न विग्रहः सहानेन ज्ञमोऽस्माकं शरीरिणां ।
अग्निकोपो हि भगवान् शापं दास्यति रोषितः ॥ ६ ॥
तस्मात् प्रवर्त्यतां यज्ञो यथैवोक्तं महर्षिणा ।
क्रियतां च तथा यत्नः सशरीरो यथा दिवं ॥ ७ ॥
गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा ।
ततः प्रववृते यज्ञः सर्वसंभारसंभृतः ॥ ८ ॥
अध्वर्युरभवत् तत्र विश्वामित्रो महातपाः ।
ऋत्विजश्चाभवंस्तत्र मुनयः संशितव्रताः ॥ ९ ॥

तस्य यज्ञे तदा तस्मिंस्त्रिशङ्कोर्भूरितेजसः ।
विश्वामित्रोऽथ भगवान् मन्त्रविन्मन्त्रपारगः ॥ १० ॥
चकारावाहनं यज्ञे भागार्थं त्रिदिवौकसां ।
नाभ्यगच्छन् यदा हूता भागार्थं तत्र देवताः ॥ ११ ॥
ततः क्रोधसमाविष्टो विश्वामित्रो महामुनिः ।
श्रुवमुद्यम्य भगवांस्त्रिशङ्कुमिदमब्रवीत् ॥ १२ ॥
पश्य मे तपसो वीर्यमूर्जितस्य नरेश्वर ।
एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा ॥ १३ ॥
त्रिशङ्को स्वशरीरेण दिवं गच्छ नराधिप ।
बाल्यात् प्रभृति यत् किञ्चिन्मया सम्यक् तपश्चितं ॥ १४ ॥
तेजसा तस्य तपसः सशरीरो दिवं व्रज ।
उक्तवाक्ये मुनावेवं सशरीरो नृपस्तदा ॥ १५ ॥
ययौ स्वर्गं खमाविश्य मुनीनां पश्यतां तदा ।
त्रिदिवं तं गतं दृष्ट्वा त्रिशङ्कुं पाकशासनः ॥ १६ ॥
सह सर्वैः सुरगणैरिदं वचनमब्रवीत् ।
त्रिशङ्को पत भूमौ त्वं नासि स्वर्गकृतालयः ॥ १७ ॥
गुरुशापादुपहतो मूढ शीघ्रमवाक्शिराः ।
एवमुक्तो महेन्द्रेण त्रिशङ्कुरपतद्दिवः ॥ १८ ॥
उपाक्रोशत् स पाहीति विश्वामित्रमवाक्शिराः ।
तच्छ्रुत्वा वचनं तस्य पाहीति पततो दिवः ॥ १९ ॥

विश्वामित्रो भृशं क्रुद्धस्तिष्ठ तिष्ठेत्युवाच तं ।
ततो ब्रह्मतपोयोगात् प्रजापतिरिवापरः ॥ २० ॥
असृजद्दक्षिणे मार्गे सप्तर्षीनपरांस्ततः ।
सृष्ट्वा दक्षिणमार्गस्थान् सप्तर्षीनपरान् प्रभुः ॥ २१ ॥
नक्षत्रवंशमपरं स्रष्टुं समुपचक्रमे ।
स्वर्गस्य दक्षिणे मार्गे तपोब्रह्मबलाश्रयात् ॥ २२ ॥
सृष्ट्वा च नक्षत्रगणं क्रोधसंरक्तलोचनः ।
इन्द्रादीनपरान् देवान् स्रष्टुं समुपचक्रमे ॥ २३ ॥
ततः परमसंभ्रान्ताः सदेवर्षिगणाः सुराः ।
विश्वामित्रं महात्मानमूचुः सानुनयं वचः ॥ २४ ॥
अयं राजा द्विजश्रेष्ठ गुरुशापपरिक्षतः ।
सशरीरो दिवं गन्तुं नार्हत्यकृतपावनः ॥ २५ ॥
प्रमाणानि प्रमाणज्ञैः परिपाल्यानि यत्नतः ।
प्रमाणैः स्थापितां संस्थां नातिक्रमितुमर्हसि ॥ २६ ॥
इति तेषां वचः श्रुत्वा देवानां मुनिपुंगवः ।
अब्रवीत् स्नेहवद्वाक्यमिदमाभाष्य देवताः ॥ २७ ॥
सशरीरस्य विबुधास्त्रिशङ्कोरस्य धीमतः ।
आरोहणं प्रतिज्ञाय नानृतं कर्तुमुत्सहे ॥ २८ ॥
गमनं सशरीरस्य त्रिशङ्कोर्मत्प्रतिग्रहात् ।
नक्षत्राणि च सर्वाणि ध्रुवाणीमानि सन्तु च ॥ २९ ॥

यावल्लोका धरिष्यन्ति तावत् स्थास्यन्त्यमूनि तु ।
एतां प्रतिज्ञां सर्वे मे समनुज्ञातुमर्हथ ॥ ३० ॥
तमूचुर्विबुधा भीता एवमस्त्विति राघव ।
तिष्ठन्त्वेतान्ययोगानि वैश्वानरपथाद्बहिः ॥ ३१ ॥
अवाक्शिरा एव चायं त्रिशङ्कुरिह तिष्ठतु ।
दक्षिणस्यामभिरतो दिशि स्वप्रभया ज्वलन् ॥ ३२ ॥
विश्वामित्रस्तु तच्छ्रुत्वा देवानां वचनं तदा ।
बाढमित्यब्रवीत् तत्र सर्वदेवैरभिष्टुतः ॥ ३३ ॥
ततो देवा ययुः सर्वे यथागतमरिंदम ।
ऋषयश्च महात्मानो यज्ञस्यान्ते तपोधनाः ॥ ३४ ॥

इत्यार्षे रामायणे आदिकाण्डे शतानन्दवाक्ये
त्रिशङ्कुस्वर्गारोहणं नाम
द्विषष्टितमः सर्गः ॥

LXIII.

मुनीन् प्रतिगतान् दृष्ट्वा विश्वामित्रस्तपोधनः ।
अब्रवीन्मुनिशार्दूलः सर्वांस्तान् वनवासिनः ॥ १ ॥
महान् विमर्दः प्रवृत्तो दक्षिणामभितो दिशं ।
दिशमन्यामतो यामस्तप्स्यामो यत्र वै तपः ॥ २ ॥
पश्चिमस्यां दिशि सुखं पुष्करारण्यमाश्रिताः ।
तपस्तत्र चरिष्यामः परं तद्धि तपोवनं ॥ ३ ॥
एवमुक्त्वा महातेजाः पुष्करारण्यमाश्रितः ।
तप उग्रं दुराधर्षं तेपे मूलफलाशनः ॥ ४ ॥
अथ तत्रापि वसतो विश्वामित्रस्य राघव ।
अम्बरीषस्य राजर्षेर्यष्टुं मतिरजायत ॥ ५ ॥
तस्य वै यजमानस्य नरमेधेन भूपतेः ।
प्रोक्षितं महवयूपात् पशुमिन्द्रो जहार तं ॥ ६ ॥
नरं लक्षणसंपूर्णं पशुत्वे विनियोजितं ।
तस्मिन् हृते पशौ विप्रो राजानमिदमब्रवीत् ॥ ७ ॥
पशुर्यः प्रोक्षितो राजन् केनापि स हृतो बलात् ।
अरक्षितारं च नृपं घ्नन्ति देवा नरेश्वर ॥ ८ ॥
प्रायश्चित्तं महच्चैतत् तं त्वं पशुमुपानय ।
अन्यं वाप्यानय क्रीत्वा यावत् कर्म प्रवर्तते ॥ ९ ॥

उपाध्यायवचः श्रुत्वा स राजा बहुशस्तदा ।
अन्वेष्टुं पशुमारेभे पुरुषं लक्षणान्वितं ॥ १० ॥
देशान् जनपदांश्चैव नगराणि वनानि च ।
आश्रमांश्च तथा पुण्यान् प्राविशद्धि महामनाः ॥ ११ ॥
अन्वेषमाणः सोऽपश्यदृचीकं नाम राघव ।
बहुपुत्रं दरिद्रं च द्विजं गृहनिवासिनं ॥ १२ ॥
अभिगम्याम्बरीषस्तं विप्रं वचनमब्रवीत् ।
तपःस्वाध्यायनिरतं पृष्ट्वा कुशलमादितः ॥ १३ ॥
गवां शतसहस्रेण सुतमेकं प्रयच्छ मे ।
नरमेधे महायज्ञे पश्वर्थे च द्विजोत्तम ॥ १४ ॥
बहुपुत्रो दरिद्रश्च वृद्धश्चासि द्विजोत्तम ।
यदि ते रोचते ब्रह्मन् सुतमेकं परित्यज ॥ १५ ॥
बहवोऽनुसृता देशा न लेभे यज्ञियं पशुं ।
दातुमर्हसि मूल्येन सुतमेकं द्विजोत्तम ॥ १६ ॥
पशोरर्थे कृतार्थः स्यामहं काश्यप सुव्रत ।
इत्युक्तोऽथाम्बरीषेण ऋचीको रघुनन्दन ॥ १७ ॥
न विक्रेष्याम्यहं पुत्रं ज्येष्ठमित्यब्रवीद्वचः ।
ऋचीकवचनं श्रुत्वा माता तेषां यशस्विनी ॥ १८ ॥
उवाचर्चीकपुत्राणां तं राजानमिदं वचः ।
अविक्रेयं सुतं ज्येष्ठं भगवानाह काश्यपः ॥ १९ ॥

ममाप्येवं कनीयांसं सुतं द्विद्धि परं प्रियं ।
पितृणां वल्लभा ज्येष्ठाः प्रायेण हि सुता नृप ॥ २० ॥
मातृणां च कनीयांसस्तस्माद्रक्ष्यौ हि तौ नृप ।
उक्तवाक्ये मुनौ तस्मिन् मुनिपत्न्यां तथैव च ॥ २१ ॥
शुनःशेफ इदं तत्र मध्यमो वाक्यमब्रवीत् ।
ज्येष्ठः पितुरविक्रेयः कनीयान् मातुरेव च ॥ २२ ॥
विक्रीतं मध्यमं मन्ये राजन्नाशु नयस्व मां ।
गवां शतसहस्रेण शुनःशेफं ततो नृपः ॥ २३ ॥
गृहीत्वा परमप्रीतो जगाम रघुनन्दन ।
रथमारोप्य तं राम शुनःशेफं त्वरान्वितः ।
आजगाम ततो यज्ञं समापयितुमात्मनः ॥ २४ ॥

इत्यार्षे रामायणे आदिकाण्डे शतानन्दवाक्ये
शुनःशेफविक्रयो नाम त्रिषष्टितमः सर्गः ॥

LXIV.

शुनःशेफं तमादाय स राजा आत्तवाहनः ।
व्यश्रमत् पुष्करे तीर्थे मध्याह्ने रघुनन्दन ॥ १ ॥
तस्य विश्रमतस्तत्र शुनःशेफो महामतिः ।
पुष्करं श्रेष्ठमागम्य विश्वामित्रं ददर्श ह ॥ २ ॥
स दीर्णहृदयो दीनो विक्रयेण श्रमेण च ।
जगाम शिरसा पादौ मुनेर्वाक्यमुवाच ह ॥ ३ ॥
न मेऽस्ति माता न पिता न सुहृन्न च बान्धवाः ।
त्रातुमर्हसि मां त्यक्तं बन्धुभिः शरणागतं ॥ ४ ॥
राजा च कृतकार्यः स्याज्जीवेयं चाप्यहं यथा ।
भवतो वीर्यमाश्रित्य तथा त्वं कर्तुमर्हसि ॥ ५ ॥
नाथो मे त्वमनाथस्य भव भव्येन चेतसा ।
पितेव पुत्रं कृपणं त्रातुमर्हसि मां मुने ॥ ६ ॥
तस्यैतद्वचनं श्रुत्वा विश्वामित्रस्तपोधनः ।
शान्त्वयित्वा शुनःशेफं स्वान् पुत्रानिदमब्रवीत् ॥ ७ ॥
यत्कृते पितरः पुत्रानिच्छन्ति गुणवत्तरान् ।
दुर्गसंतरणार्थाय तस्य कालोऽयमागतः ॥ ८ ॥
अयं मुनिसुतो बालो मत्तः शरणमिच्छति ।
तस्य जीवितदानेन प्रियं मे कर्तुमर्हथ ॥ ९ ॥

सर्वे सुकृतकल्याणाः सर्वे सुचरितव्रताः ।
ते यूयं मन्नियोगेन मोक्षयध्वं मुनेः सुतं ॥ १० ॥
अध्वराग्नेः समिद्धस्य गत्वा तृप्तिं प्रयच्छत ।
मोक्षयध्वमिमं चैव पशुत्वान्मम शासनात् ॥ ११ ॥
शरणं मामनुप्राप्तमृचीकस्य मुनेः सुतं ।
स्यादविघ्नं यथा तस्य राजर्षेः क्रियतां तथा ॥ १२ ॥
इति पित्रानुशिष्टास्ते मधुस्यन्दादयस्ततः
साभिमानमिदं वाक्यमूचुः पितरमप्रियं ॥ १३ ॥
कथमात्मसुतान् हित्वा त्राता परसुतानसि ।
भगवन् कार्यमेतत् ते स्वमांसस्येव भक्षणं ॥ १४ ॥
इति तेषां वचः श्रुत्वा पुत्राणां मुनिरप्रियं ।
क्रोधसंरक्तनयनः पुत्रांस्तानशपत् तदा ॥ १५ ॥
निःसाध्वसमिदं वाक्यं धर्मादभिहितं वहिः ।
यस्मात् स्वमांसमुद्दिष्टं युष्माभिरवमन्य मां ॥ १६ ॥
स्वमांसवृत्तयस्तस्माद्वाशिष्ठा इव ज्ञातिषु ।
पतिता वर्षसहस्रं कुत्सिता विचरिष्यथ ॥ १७ ॥
इति शापाग्निना दग्ध्वा पुत्रान् स्वान् कुशिकात्मजः ।
शुनःशेफमुवाचेदं वचनं परिशान्त्वयन् ॥ १८ ॥
यदा पशुत्वे पुत्र त्वं प्रोक्षितः स्यास्तदा नृपेः ।
इमं मन्त्रं मया प्रोक्तमिन्द्राभिष्टवसंयुतं ॥ १९ ॥

जपन्तमेनं मन्त्रं त्वां मोक्षयिष्यति वासवः ।
पशुत्वादस्य चाविघ्नं भविष्यति महीपतेः ॥ २० ॥
शुनःशेफोऽथ तं मन्त्रमधीत्य त्वरितस्तदा ।
उपेत्य हृष्टो राजानमम्बरीषमभाषत ॥ २१ ॥
एहि राजन्नितः शीघ्रं नय मां यज्ञमात्मनः ।
पशुं मां मन्त्रतः प्रोक्ष्य दीक्षामेतां समापय ॥ २२ ॥
तद्वाक्यमृषिपुत्रस्य श्रुत्वा हर्षसमन्वितः ।
जगाम नृपतिः श्रीमान् स्वमेव यजनं तदा ॥ २३ ॥
सदस्यानुमतं सोऽथ पवित्रं कृतलक्षणं ।
शुनःशेफं पशुं यूपे निबबन्धानुमन्त्रितं ॥ २४ ॥
स बद्ध ऋग्भिस्तुष्टाव देवेन्द्रं हरिवाहनं ।
भागार्थिनमनुप्राप्तं स्वरेणोच्चैर्विनादयन् ॥ २५ ॥
तस्मै प्रीतः सहस्राक्षस्तदा प्रादादभीप्सितं ।
आयुरिष्टं यशश्चाग्र्यं शुनःशेफाय राघव ॥ २६ ॥
स च राजा क्रतुफलं तदवाप यथेप्सितं ।
धर्मं यशः श्रियं चाग्र्यां सहस्राक्षप्रसादतः ॥ २७ ॥
विश्वामित्रोऽथ धर्मात्मा चचारोग्रं महत् तपः ।
पुष्करेष्वेव वर्षाणां सहस्रं नियतव्रतः ॥ २८ ॥

इत्यार्षे रामायणे आदिकाण्डे शतानन्दवाक्ये
अम्बरीषयज्ञो नाम चतुःषष्टितमः सर्गः ॥

LXV.

पूर्णे वर्षसहस्रे तु व्रतस्नातं महामुनिं ।
अभ्यागच्छन् सुरा राम तपोबलसमाहिताः ॥ १ ॥
तत्रैनमब्रवीद्ब्रह्मा पुनः सुरुचिरं वचः ।
ऋषिस्त्वमसि भद्रं ते निवर्त तपसोऽधुना ॥ २ ॥
इत्युक्त्वानन्तरं ब्रह्मा जगामाशु यथागतं ।
विश्वामित्रोऽपि तच्छ्रुत्वा चचारैव पुनस्तपः ॥ ३ ॥
तत्र चैनं तपस्यन्तं कालस्य महतस्तपः ।
आजगामाप्सरा राम तं प्रलोभयितुं रहः ॥ ४ ॥
मेनका नाम सुश्रोणी विश्वामित्राश्रमं प्रति ।
पुष्करे सा सुचार्वङ्गी स्नातुं समुपचक्रमे ॥ ५ ॥
तां ददर्शाद्भुताकारां मेनकां कुशिकात्मजः ।
रूपेणाप्रतिमां राम श्रियं मूर्तिमतीमिव ॥ ६ ॥
तां दृष्ट्वा चारुसर्वाङ्गीं मेनकां निर्जने वने ।
जलप्रक्लिन्नवसनां मनोहरतराकृतिं ॥ ७ ॥
कन्दर्पवशगोऽभ्येत्य मुनिर्वचनमब्रवीत् ।
का त्वं कस्य कुतो वेदं वनं भद्रेऽभ्युपागता ॥ ८ ॥
एहि विश्राम्यतां भीरु ममाश्रमपदे शुभे ।
मेनका तद्वचः श्रुत्वा विश्वामित्रमभाषत ॥ ९ ॥

अप्सरा मेनका नाम त्वत्प्रीत्याहमुपागता ।
रोचते यदि ते ब्रह्मन् भजमानां भजस्व मां ॥ १० ॥
इति तां रुचिरं वाक्यं भाषमाणामनिन्दितां ।
पाणौ गृहीत्वा भगवानाश्रमं प्रविवेश ह ॥ ११ ॥
तया च सह वर्षाणि पञ्च पञ्च च राघव ।
विश्वामित्रस्य रमतः क्षणवद्व्यतिचक्रमुः ॥ १२ ॥
हृतविज्ञानबुद्धिर्हि तया मुनिरसौ तदा ।
तानि वर्षाण्यतीतानि बुबोधैकमहर्यथा ॥ १३ ॥
अथ काले गते तस्मिन् बुद्ध्वा बुद्ध्यात्मविक्रियां ।
जगादेतत् तदा वाक्यं विश्वामित्रस्तपोधनः ॥ १४ ॥
सामर्षस्तच्च मे ज्ञानं तत् तपः स च निश्चयः ।
नष्टान्येकपदेनेह सर्वथा किमपि स्त्रियः ॥ १५ ॥
अनया लोभयित्वा मां तपोऽपहरणं कृतं ।
इन्द्रप्रियं चिकीर्षन्त्या तस्मादेनां त्यजाम्यहं ॥ १६ ॥
ततस्तां मधुरैर्वाक्यैर्विसृज्य कुशिकात्मजः ।
पुष्कराणि परित्यज्य जगामोत्तरपर्वतं ॥ १७ ॥
नैष्ठिकीं बुद्धिमास्थाय जेतुं कामममर्षितः ।
कौशिकीतीरमासाद्य तपस्तेपे सुदारुणं ॥ १८ ॥
सहस्रमपरं राम वर्षाणाममितद्युतिः ।
चचार दुश्चरं तेन देवा भयसमन्विताः ॥ १९ ॥

समेत्य मन्त्रयामासुः सर्षिसंघाः सवासवाः ।
महर्षिशब्दं लभतां साध्वयं कुशिकात्मजः ॥ २० ॥
मा च नस्तपसोग्रेण तापयत्येवमुद्यतः ।
निवर्ततामयं ब्रह्मंस्तपसोऽस्मादिति प्रभो ॥ २१ ॥
देवानां निश्चयं श्रुत्वा ब्रह्मा लोकपितामहः ।
अब्रवीदभिगम्यैवं विश्वामित्रं तपोनिधिं ॥ २२ ॥
महर्षे विनिवर्तस्व तपसः कुशिकात्मज ।
महत्त्वमृषिमुख्यानां ददामि तव सुव्रत ॥ २३ ॥
ब्रह्मणस्तु वचः श्रुत्वा विश्वामित्रस्तपोधनः ।
प्राञ्जलिः प्रणतो वाक्यं प्रत्युवाच पितामहं ॥ २४ ॥
ब्रह्मर्षिशब्दं भगवन् दुर्लभं तपसार्जितं ।
लभेयं त्वत्प्रसादेन यदि मेऽस्ति तपश्चितं ॥ २५ ॥
तमुवाच ततो ब्रह्मा न तावत् त्वं जितेन्द्रियः ।
कामक्रोधावनिर्जित्य कथं ब्रह्मत्वमिच्छसि ॥ २६ ॥
जयेन्द्रियाणि तावत् त्वं कामक्रोधौ च कौशिक ।
ततः परं त्वं ब्रह्मत्वं समवाप्स्यसि दुर्लभं ॥ २७ ॥
इत्युक्त्वा प्रययौ ब्रह्मा पुनरेव यथागतं ।
विश्वामित्रोऽपि तत्रैव तेपे घोरतरं तपः ॥ २८ ॥
ऊर्ध्वबाहुर्निरालम्ब एकपादाग्रविष्ठितः ।
वायुभक्ष्यः स्थितः स्थान एकस्मिन् स्थाणुवत् स्थिरः ॥ २९ ॥

घर्मे पञ्चतपा भूत्वा वर्षास्वभ्रावकाशिकः ।
शिशिरे जलशायी च भूत्वा तेपे महत् तपः ॥ ३० ॥
एवं वर्षशतं घोरं साग्र्यं तप उपासतः ।
समस्ता दिवि काकुत्स्थ देवा भयमुपाविशन् ॥ ३१ ॥
संभ्रमं परमास्थाय ततः शक्रः सुराधिपः ।
चिन्तयित्वा तपोविघ्नमुपायं रघुनन्दन ॥ ३२ ॥
आहूयाप्सरसं रम्भां मरुद्गणावृतः प्रभुः ।
उवाचात्महितं वाक्यमहितं कौशिकस्य च ॥ ३३ ॥

इत्यार्षे रामायणे आदिकाण्डे शतानन्दवाक्ये
मेनकानिर्वासो नाम पञ्चषष्टितमः सर्गः ॥

LXVI.

सुरकार्यमिदं रम्भे कर्तुमर्हसि भाविनि ।
लोभयस्व तपस्यन्तं कौशिकं रूपसंपदा ॥ १ ॥
एवमुक्ता ततो रम्भा सहस्राक्षेण धीमता ।
प्राञ्जलिः परमोद्विग्ना प्रत्युवाच सुराधिपं ॥ २ ॥
कोपनश्च तपस्वी च विश्वामित्रः शचीपते ।
स कोपं नियतं देव मय्युत्स्रक्ष्यति कोपितः ॥ ३ ॥
तस्मात् त्वं मे सुरपते प्रसादं कर्तुमर्हसि ।
नास्य सादयितव्यानि तेजांसि च तपांसि च ॥ ४ ॥
तामुवाच ततः शक्रो वेपमानां कृताञ्जलिं ।
त्वं रम्भे कुरु मा भैषीः प्रियं मे प्रियभाषिणि ॥ ५ ॥
कोकिलो हृदयग्राही काले कुसुमितद्रुमे ।
अहं कन्दर्पसहितः स्थास्ये तव समीपतः ॥ ६ ॥
मनोहरं तु रम्भोरु कृत्वा रूपमथाद्भुतं ।
तमृषिं रुचिरापाङ्गि गच्छ लोभयितुं वने ॥ ७ ॥
इत्युक्ता देवराजेन रम्भा सुरुचिरानना ।
कृत्वा रूपं मनोहरं विश्वामित्रमलोभयत् ॥ ८ ॥
इन्द्रोऽपि कोकिलो भूत्वा कन्दर्पसहितस्तदा ।
वल्गुवागभितस्तस्यास्तस्थौ राम विलोभयन् ॥ ९ ॥

कोकिलस्य वचः श्रुत्वा वल्गु व्याहरतो वने ।
रम्भागीतस्वरं चैव मधुरं सुमनोहरं ॥ १० ॥
मारुतं च सुखस्पर्शं दिव्यगन्धाधिवासितं ।
आयान्तं समभिप्रेक्ष्य कामिनां मदवर्धनं ॥ ११ ॥
सहसा हृतचित्तात्मा मदनेन महामुनिः ।
गीतस्वनेनानुसृत्य रम्भां दृष्ट्वा मनोहरां ॥ १२ ॥
शब्देनापहृतस्तेन रम्भासंदर्शनेन च ।
स्मृत्वा चात्र तपोभ्रंशं मुनिः शङ्कामुपागमत् ॥ १३ ॥
सहसान्तस्य तत् कर्म दृष्ट्वाथ ध्यानचक्षुषा ।
रम्भां कोपसमाविष्ट इदं वचनमब्रवीत् ॥ १४ ॥
यस्माल्लोभयसे रम्भे मामात्मगुणसंपदा ।
तस्माच्छिलामयी भूत्वा स्थास्यसीह तपोवने ॥ १५ ॥
वर्षाणामयुतं पूर्णं मच्छापकलुषीकृता ।
ब्राह्मणस्तु तपःसिद्ध उद्धर्ता ते भविष्यति ॥ १६ ॥
रम्भां शैलमयीं कृत्वा विश्वामित्रो महामुनिः ।
संतापमगमत् तीव्रं क्रोधस्य वशमागतः ॥ १७ ॥
दृष्ट्वा तथा कृतां रम्भां सद्यः शैलमयीं रुषा ।
कन्दर्पसहितं चैव दृष्ट्वा तत्र पुरंदरं ॥ १८ ॥
तपसोऽपहारं पुनः कृतं दृष्ट्वा तथात्मनः ।
अजितेन्द्रियोऽस्मीति भृशं जगर्हात्मानमात्मना ॥ १९ ॥

अथ हैमवतीं पुण्यां दिशं त्यक्त्वा महामुनिः ।
पूर्वां दिशमुपागम्य तपस्तप्तुं प्रचक्रमे ॥ २० ॥
मौनं वर्षसहस्रं तु कृत्वा स कृतनिश्चयः ।
वज्रस्थानमुपाश्रित्य तस्थौ गिरिरिवाचलः ॥ २१ ॥

इत्यार्षे रामायणे आदिकाण्डे शतानन्दवाक्ये
रम्भाशापो नाम षट्षष्टितमः सर्गः ॥

LXVII.

स्थाणुभूते स्थिते तस्मिन् मुनौ मौनव्रतान्विते ।
आवेष्टुं नान्तरं कामो न क्रोधो ददृशे मुनेः ॥ १ ॥
अक्रोधनमकामं च तं दृष्ट्वा शान्तचेतसं ।
तपसोग्रेण संसिद्धिं परां गतमरिंदम ॥ २ ॥
संभ्रान्तमनसो भीता ब्रह्माणं तपसां निधिं ।
ऊचुरभ्येत्य विबुधाः सर्वे शक्रपुरोगमाः ॥ ३ ॥
उपायैर्बहुभिर्विप्रो विश्वामित्रस्तपोनिधिः ।
क्रोधितो लोभितश्चैव तपसा च विवर्धितः ॥ ४ ॥
न चास्य वृजिनं किञ्चिद्दृश्यते स्वल्पमप्यथ ।
न दीयते यदि तस्मै मनसो यदभीप्सितं ॥ ५ ॥
विनाशयति लोकांस्त्रींस्तेजसा सचराचरान् ।
व्याकुलाश्च दिशः सर्वा न च सूर्यः प्रकाशते ॥ ६ ॥
सागराः क्षुभिताः सर्वे विदीर्यन्ते च पर्वताः ।
कम्पते पृथिवी चैव वायुर्वाति भृशाकुलः ॥ ७ ॥
बुद्धिं न कुरुते यावदेष प्रतपतां वरः ।
देवराज्यपरिप्राप्तौ लभतां तावदीप्सितं ॥ ८ ॥
ततः सर्वे सुरगणाः पितामहपुरःसराः ।
विश्वामित्रमुपागम्य वाक्यमूचुरिदं तदा ॥ ९ ॥

ब्रह्मर्षे विनिवर्तस्व तपसोऽस्मादतः परं ।
ब्रह्मर्षित्वमनुप्राप्तस्तपसा ह्यसि दुर्लभं ॥ १० ॥
प्रीतः स्वच्छन्दमरणं ददामि तव चेप्सितं ।
स्वस्त्याप्नुहि त्वं भद्रं ते तपसोऽस्मादुपारम ॥ ११ ॥
पितामहवचः श्रुत्वा तत् तदा मधुराक्षरं ।
कृताञ्जलिरिदं वाक्यमुवाच मुनिपुंगवः ॥ १२ ॥
यदि प्राप्तं मया ब्रह्मन् ब्राह्मण्यं तपसो बलात् ।
ततो ब्रह्म च वेदाश्च सत्यं च वरयन्तु मां ॥ १३ ॥
सिद्धिर्धृतिः स्मृतिश्चैव विद्या मेधा शमः क्षमा ।
तपो दमो ~~क्षमो~~ दया क्षान्तिः सर्वज्ञत्वं कृतज्ञता ॥ १४ ॥
असंमोह इति प्राहुर्ब्रह्म ब्रह्मविदो जनाः ।
अद्रोहः सर्वभूतानामसंकल्पमसङ्गता ॥ १५ ॥
तन्मां भजन्तु विश्वेश ब्रह्माव्ययमनुत्तमं ।
तपसा च यदि प्राप्तं ब्राह्मणत्वं यथेप्सितं ॥ १६ ॥
तमेवं वादिनं ब्रह्मा प्रत्युवाच तपोनिधिं ।
प्रतिभास्यन्ति ते वेदा ब्रह्म चाव्ययमुत्तमं ॥ १७ ॥
अधिकस्त्वं मतो मेऽद्य सर्ववेदविदां मुने ।
इत्युक्त्वैनं ततो ब्रह्मा ययौ सुरगणैर्वृतः ॥ १८ ॥
विश्वामित्रोऽपि धर्मात्मा लब्ध्वा ब्राह्मण्यमुत्तमं ।
कृतकृत्यश्चचारेमां पृथिवीं सिद्धमानसः ॥ १९ ॥

एष ब्रह्मविदां श्रेष्ठ एष तेजस्विनां वरः ।
एष विग्रहवान् धर्म एष सिद्धिमतां वरः ॥ २० ॥
एष सत्ये दमे चैव धर्मेषु च समास्थितः ।
शतानन्दवचः श्रुत्वा रामलक्ष्मणसंनिधौ ॥ २१ ॥
जनकः प्राञ्जलिर्भूत्वा विश्वामित्रं ततोऽब्रवीत् ।
धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे त्वं महामुने ॥ २२ ॥
यज्ञं काकुत्स्थसहितो द्रष्टुमभ्यागतः स्वयं ।
गुणाः सुबहवः प्राप्तास्त्वत्संदर्शनजा मया ॥ २३ ॥
सदश्च पावितमिदं त्वद्गुणौघैस्तपोनिधे ।
विप्रभावश्च ते ब्रह्मन् कीर्त्यमानो महातपः ॥ २४ ॥
श्रुतो मया महातेजो रामेण च महात्मना ।
सदस्यैः प्राप्य च सदः श्रुतास्ते बहवो गुणाः ॥ २५ ॥
अप्रमेयं तव तपो ह्यप्रमेयं च ते बलं ।
अप्रमेया गुणाश्चापि नित्यं ते पुरुषर्षभ ॥ २६ ॥
तृप्तिराश्चर्यभूतानां कथानां नास्ति मे विभो ।
कर्मकालो मुनिश्रेष्ठ लम्बते रविमण्डलं ॥ २७ ॥
श्वः प्रभाते भवन्तं च द्रष्टुमेष्यामि वै पुनः ।
स्वागतं जयतां श्रेष्ठ मामनुज्ञातुमर्हसि ॥ २८ ॥
एवमुक्त्वा मुनिश्रेष्ठं वैदेहो मिथिलाधिपः ।
प्रदक्षिणमुपावृत्य विश्वामित्रं ततो ययौ ॥ २९ ॥

विश्वामित्रोऽपि धर्मात्मा सहरामः सलक्ष्मणः ।
स्ववासमुपचक्राम पूज्यमानो महर्षिभिः ॥३०॥

इत्यार्षे रामायणे आदिकाण्डे शतानन्दवाक्ये
विश्वामित्रब्रह्मत्वप्राप्तिर्नाम
सप्तषष्टितमः सर्गः ॥

LXVIII.

ततः प्रभाते विमले कृतकर्मा नराधिपः ।
विश्वामित्रं महात्मानमुपायात् सहराघवं ॥ १ ॥
तमर्चयित्वा धर्मात्मा शास्त्रदृष्टेन कर्मणा ।
राघवौ च महात्मानौ ततो वाक्यमुवाच ह ॥ २ ॥
भगवन् स्वागतं तेऽस्तु किं करोमि महातपः ।
भवानाज्ञापयतु मामाज्ञाप्यो भवतो ह्यहं ॥ ३ ॥
एवमुक्तस्तु धर्मात्मा जनकेन महात्मना ।
प्रत्युवाच पुनर्धीरो वाक्यं वाक्यविदां वरः ॥ ४ ॥
पुत्रौ दशरथस्येमौ क्षत्रियौ लोकविश्रुतौ ।
द्रष्टुकामौ धनुर्दिव्यं यदेतत् त्वयि तिष्ठति ॥ ५ ॥
एतद्दर्शय भद्रं ते कृतकामौ नृपात्मजौ ।
दर्शनादस्य धनुषो यथेष्टं तु करिष्यतः ॥ ६ ॥
इत्युक्तो जनको राजा प्रत्युवाच कृताञ्जलिः ।
श्रूयतां धनुषस्तत्त्वं यदर्थं मयि तिष्ठति ॥ ७ ॥
देवरात इति ख्यातो निमेः षष्ठो महीपतिः ।
न्यासभूतमिदं तस्य धनुर्दत्तं महात्मनः ॥ ८ ॥
दक्षयज्ञबधे पूर्वं धनुषानेन शङ्करः ।
विध्वंस्य त्रिदशान् सर्वानिदं किल तदोक्तवान् ॥ ९ ॥

यस्माद्भागार्थिनो भागं नाकल्पयत मे सुराः ।
तस्मादङ्गानि सर्वाणि धनुषा शातयामि वः ॥ १० ॥
तस्मै देवा भयोद्विग्ना रुद्राय प्राणमंस्तदा ।
प्रसादयां चक्रुरेनं तेषां तुष्टोऽभवद्भवः ॥ ११ ॥
प्रीतश्चापि ददौ तेषां तान्यङ्गानि महौजसां ।
धनुषा यानि यान्यासन् शातितानि महात्मना ॥ १२ ॥
तदेतद्देवदेवस्य धनुर्दिव्यं महात्मनः ।
तिष्ठत्यद्यापि भगवन् कुलेऽस्माकं सुपूजितं ॥ १३ ॥
वीर्यशुल्का च मे कन्या दिव्यरूपा गुणान्विता ।
भूतलादुत्थिता पूर्वं नाम्ना सीतेत्ययोनिजा ॥ १४ ॥
तां नृपा वरयामासुरागत्यागत्य वै पुरा ।
वीर्यशुल्का प्रदेयेति तानहं चाब्रुवं नृपान् ॥ १५ ॥
ततो नृपतयः सर्वे प्रार्थयन्तः सुतां मम ।
वीर्यं जिज्ञासयिषवः पुरमभ्याययुर्मम ॥ १६ ॥
वीर्यजिज्ञासया तेषां मया संदर्शितं धनुः ।
न शेकुश्चापि ते ब्रह्मन्नुद्यन्तुमपि तद्धनुः ॥ १७ ॥
तेषामल्पमहं ज्ञात्वा वीर्यं तत्र महामुने ।
कृतवान् सर्वतस्तेषां प्रत्याख्यानं सुतां प्रति ॥ १८ ॥
ततस्ते तेन कोपेन राजानः सहिता मुने ।
रुरुधुर्मिथिलामेतां पुरीमभ्येत्य सर्वशः ॥ १९ ॥

ते मन्यमाना ह्यात्मानमवधूतं पृथङ्नृपाः ।
रोषेण महताविष्टा मिथिलामभ्यपीडयन् ॥ २० ॥
संवत्सरं समापूर्णं रुरुधुः कृतनिश्चयाः ।
अवरोधेन तेनास्मि यदा क्षीणो हि सर्वशः ॥ २१ ॥
तदा प्रसादयां चक्रे देवदेवमुमापतिं ।
प्रसादाद्भगवान् प्रीतश्चतुरङ्गबलं ददौ ॥ २२ ॥
ततो भग्ना नृपतयो मया तेन ययुर्मुने ।
अल्पवीर्यमदोत्साहा अल्पवीर्याभिमानिनः ॥ २३ ॥
तदेतन्मुनिशार्दूल दिव्यं परमभास्वरं ।
दर्शयाम्यद्य रामाय लक्ष्मणाय च तद्धनुः ॥ २४ ॥
कुर्यादारोपणं रामो धनुषश्चास्य चेदयं ।
दद्यामयोनिजामस्मै सीतां दशरथस्नुषां ॥ २५ ॥

इत्यार्षे रामायणे आदिकाण्डे जनकवाक्यं नाम
अष्टषष्टितमः सर्गः ॥

LXIX.

जनकस्य वचः श्रुत्वा विश्वामित्रो महामुनिः ।
धनुर्दर्शय रामाय तदिति प्राब्रवीन्नृपं ॥ १ ॥
सुरोपमस्तु जनकः सोऽमात्यान् व्यादिदेश ह ।
रामसंदर्शनार्थं तद्धनुरानीयतामिति ॥ २ ॥
जनकेन समादिष्टाः प्रविश्य सचिवाः पुरीं ।
धनुरानाययामासुः पुरुषैराप्तकारिभिः स ॥ ३ ॥
पुरुषाणां शतान्यष्टौ व्यायतानां महौजसां ।
मञ्जूषामष्टचक्रस्थां गुर्वीमूहुः कथञ्चन ॥ ४ ॥
तामानीय च मञ्जूषामायसीं यत्र तद्धनुः ।
सुरोपमं तु जनकं तमूचुरिति मन्त्रिणः ॥ ५ ॥
इदं तद्धनुरानीतमाज्ञया ते नराधिप ।
दर्शयैतदृषेरस्य राघवस्य च भास्वरं ॥ ६ ॥
तेषामेतद्वचः श्रुत्वा जनकः प्रसृतं वचः ।
विश्वामित्रमुवाचेदं तौ चोभौ रामलक्ष्मणौ ॥ ७ ॥
ब्रह्मन् धनुरुपानीतं यत् तु तिष्ठति नो गृहे ।
राजभिर्यन्न शकितमुद्यन्तुमपि तद्धनुः ॥ ८ ॥
नैतत् पूरयितुं शक्ताः सेन्द्राः सुरगणा अपि ।
न यक्षोरगरक्षांसि देवदेवादृते शिवात् ॥ ९ ॥

अशक्तिर्मानुषाणां तु धनुषोऽस्य प्रपूरणे ।
कुत एव हि संधाने शक्तिर्वास्यानुकर्षणे ॥ १० ॥
इदं मया धनुर्दिव्यं तवानायितमाज्ञया ।
दर्शयैतन्मुने क्षिप्रमनयो राजपुत्रयोः ॥ ११ ॥
विश्वामित्रस्तु तच्छ्रुत्वा जनकस्य वचस्तदा ।
अभ्यभाषत धर्मात्मा प्रहृष्टेनान्तरात्मना ॥ १२ ॥
गृहाणेदं महाबाहो दिव्यं धनुरनुत्तमं ।
धारणे कर्षणे चास्य यत्नमातिष्ठ राघव ॥ १३ ॥
मुनेस्तु वचनाद्रामो यत्र तिष्ठति तद्धनुः ।
मञ्जूषां तामपावृत्य विश्वामित्रमभाषत ॥ १४ ॥
इदं धनुरहं दिव्यं तोलयिष्यामि पाणिना ।
यत्नवांश्च भविष्यामि सज्यस्यास्य विकर्षणे ॥ १५ ॥
बाढमित्येव तं राजा मुनिश्च समभाषत ।
सलीलमिव तद्रामस्तोलयित्वैकपाणिना ॥ १६ ॥
पश्यतामभितस्तत्र सदस्यानां समन्ततः ।
आनम्य नातियत्नेन सज्यं चक्रे हसन्निव ॥ १७ ॥
सज्यं कृत्वा ततश्चैव पूरयामास वीर्यवान् ।
बभञ्ज पूरयंश्चैव मध्ये रामो बलादिव ॥ १८ ॥
तस्य शब्दो महानासीद्गिरेरिव विशीर्यतः ।
वज्रस्येव विमुक्तस्य शक्रेण नगमूर्धनि ॥ १९ ॥

निपेतुस्तेन शब्देन सर्वशो मोहिता जनाः ।
विश्वामित्रं वर्जयित्वा राजानं तौ च राघवौ ॥ २० ॥
प्रत्याश्वस्ते जने तस्मिन् राजा विस्मयमागतः ।
उवाच प्राञ्जलिर्वाक्यं विश्वामित्रमिदं तदा ॥ २१ ॥
भगवन् श्रुतपूर्वो मे रामो दशरथात्मजः ।
अत्यद्भुतमिदं त्वद्य कर्म चादर्शितं मया ॥ २२ ॥
जनकानां कुले कीर्तिमाहरिष्यति मे सुता ।
सीता भर्तारमासाद्य रामं दशरथात्मजं ॥ २३ ॥
वीर्यशुल्कप्रदानेन प्रतिज्ञा सफलीकृता ।
सीतां दास्यामि रामाय प्राणेभ्योऽपि प्रियामहं ॥ २४ ॥
भवतोऽनुमते तस्मादितो यान्तु महामुने ।
दूता ममाज्ञया शीघ्रमयोध्यां जवनैर्हयैः ॥ २५ ॥
विज्ञाप्य चैव राजानमानयन्तु पुरीं मम ।
प्रदानं वीर्यशुल्कायाः सीतायाः कथयन्तु च ॥ २६ ॥
त्वया गुप्तौ च काकुत्स्थौ वेदयन्तु नृपाय ते ।
एभिः प्रह्लादितं वाक्यैरानयन्त्विह तं नृपं ॥ २७ ॥
कौशिकेन तथेत्युक्तो नृपः प्रेष्यानुपस्थितान् ।
अयोध्यां प्रेषयामास स हि राजा त्वरान्वितः ॥ २८ ॥

इत्यार्षे रामायणे आदिकाण्डे धनुर्भङ्गो नाम
एकोनसप्ततितमः सर्गः ॥

LXX.

जनकेन समादिष्टा दूतास्ते द्रुतवाहनाः ।
मार्गे त्रिरात्रमुषिता अयोध्यां प्राविशन् पुरीं ॥ १ ॥
ते राज्ञो विदिता दूता राजवेश्म प्रवेशिताः ।
ददृशुस्तं महात्मानं तत्राथ नृपसत्तमं ॥ २ ॥
शश्वत् प्रजाः प्रशासन्तं धर्मज्ञं सचिवैर्वृतं ।
ऋषिभिर्देवसंकाशैर्वशिष्ठाद्यैश्च मन्त्रिभिः ॥ ३ ॥
आशास्यमानं सुप्रीतैः शक्रमाङ्गिरसैरिव ।
तं लोकपालप्रतिमं लोकपाले सुनिश्चितं ॥ ४ ॥
दृष्ट्वैव चाभिप्रणता बद्धाञ्जलिपुटास्ततः ।
ऊचुर्दशरथं वाक्यमिदं प्रियनिवेदिनः ॥ ५ ॥
वैदेहो जनको राजा पृच्छति त्वां नराधिप ।
कुशलानामयं स्निग्धं सामात्यं सपुरोहितं ॥ ६ ॥
पृष्ट्वा चानामयं पूर्वमव्ययं स नराधिपः ।
विश्वामित्रसहायस्त्वां विज्ञापयति पार्थिवः ॥ ७ ॥
सुता मे वीर्यशुल्केति प्रख्याता विदिता च ते ।
राजभिर्हीनवीर्यैश्च पुरापि प्रार्थिता यथा ॥ ८ ॥
सेयं मम सुता राजन् विश्वामित्रस्य शासनात् ।
पुरीमिमां समागत्य तव पुत्रेण निर्जिता ॥ ९ ॥

आनम्य तद्धनुर्दिव्यं मध्ये भग्नं महात्मना ।
रामेण बलमाश्रित्य महत्यां जनसंसदि ॥ १० ॥
तस्मै सीता मया देया वीर्यशुल्का सुताय ते ।
प्रतिज्ञां तर्तुमिच्छामि तदनुज्ञातुमर्हसि ॥ ११ ॥
सोपाध्यायः सस्वजनः सबलः सपदानुगः ।
शीघ्रमर्हसि राजर्षे त्वमागन्तुमिह प्रभो ॥ १२ ॥
प्रीतिं पूर्वप्रवृत्तां मे संवर्धयितुमर्हसि ।
पुत्रयोरुभयोरेव वधौ ते दित्सिते मया ॥ १३ ॥
इति त्वां जनको राजा विज्ञापयति पार्थिव ।
विश्वामित्राभ्यनुज्ञातः शतानन्दमते स्थितः ॥ १४ ॥
इति दूतवचः श्रुत्वा राजा परमहर्षितः ।
उवाचेदं वशिष्ठादिन् सर्वानेव पुरोधसः ॥ १५ ॥
गुप्तः कुशिकपुत्रेण कौशल्यानन्दिवर्धनः ।
लक्ष्मणेन सह भ्रात्रा विदेहानगमत् किल ॥ १६ ॥
दृष्टवीर्यश्च काकुत्स्थे जनकः सुमहायशाः ।
प्रतिप्रदानं सीताया रामे कर्तुं किलेच्छति ॥ १७ ॥
यदि ते रोचते ब्रह्मन् जनकः स महीपतिः ।
संबन्धी तत्र गच्छामस्ततः शीघ्रमितो वयं ॥ १८ ॥
वाढमित्येव तच्छ्रुत्वा वशिष्ठप्रमुखा द्विजाः ।
ऊचुः परमसंहृष्टाः स्वस्तु यास्याम इत्यपि ॥ १९ ॥

ते चापि रजनीं तत्र दूताः परमसत्कृताः ।
ऊषुर्विदेहराजस्य सर्वकामैः सुपूजिताः ॥२०॥

इत्यार्षे रामायणे आदिकाण्डे जनकदूतवाक्यं नाम
सप्ततितमः सर्गः ॥

LXXI.

तस्यां रात्र्यां व्यतीतायां सोपाध्यायो नराधिपः ।
राजा दशरथः श्रीमान् सुमन्त्रमिदमब्रवीत् ॥ १ ॥
अद्य सर्वे धनाध्यक्षा धनमादाय पुष्कलं ।
निर्यान्त्वग्रे समारोप्य नानारत्नचयान् मम ॥ २ ॥
चतुरङ्गं च मे शीघ्रं बलं निर्यातु सर्वशः ।
ममाज्ञासमकालं च युज्यतां युग्यमुत्तमं ॥ ३ ॥
वशिष्ठो वामदेवश्च जावालिः काश्यपो भृगुः ।
मार्कण्डेयश्च दीर्घायुर्मुनिः कात्यायनस्तथा ॥ ४ ॥
एते द्विजाः प्रयान्त्वग्रे स्यन्दनैः सहिता मया ।
यथा कालात्ययो न स्याद्दूता हि त्वरयन्ति मां ॥ ५ ॥
इत्याज्ञया नरेन्द्रस्य सेना सा चतुरङ्गिनी ।
राजानमृषिभिः सार्धं प्रयान्तं पृष्ठतोऽन्वगात् ॥ ६ ॥
चतुर्भिस्तानहोरात्रैर्विदेहानभ्युपेयिवान् ।
ददर्श मिथिलां रम्यां जनकेनोपशोभितां ॥ ७ ॥
प्रत्युद्गम्य च तं राजा प्रियातिथिमुपागतं ।
उवाच जनकः प्रीतः शतानन्दसमन्वितः ॥ ८ ॥
स्वागतं ते महाराज दिष्ट्या प्राप्तोऽसि मे गृहं ।
पुत्रयोरुभयोः प्रीतिं दिष्ट्या प्राप्स्यसि राघव ॥ ९ ॥

दिष्ट्या प्राप्तो महातेजा वशिष्ठो भगवानयं ।
मार्कण्डेयादयश्चैव दिष्ट्या प्राप्ता महर्षयः ॥ १० ॥
दिष्ट्या मे निर्जिता विघ्ना दिष्ट्या मे पूजितं कुलं ।
राघवैः सह संबन्धं कृत्वा प्रथितसद्गुणैः ॥ ११ ॥
अद्य मे सफलं जन्म प्राप्तं चाद्य क्रियाफलं ।
अद्य पूतोऽस्मि राजर्षे त्वत्संबन्धात् सबान्धवः ॥ १२ ॥
एषां चापि महर्षीणामद्याभ्यागमनादहं ।
सविशेषतरं पूतो राजन्नाप्यायितस्तथा ॥ १३ ॥
श्वः प्रभाते महाराज निर्वर्तयितुमर्हसि ।
यज्ञस्यावभृथे पुण्यमुद्वाहमृषिभिः सह ॥ १४ ॥
तस्यैतद्वचनं श्रुत्वा राजा दशरथस्तदा ।
ऋषिमध्य उवाचेदं जनकं मिथिलेश्वरं ॥ १५ ॥
राजन् प्रतिगृहीतारः स्मृता दातृवशाः किल ।
यद्वक्ष्यसि यदा चैव तत्कर्तारस्तदा वयं ॥ १६ ॥
श्लक्ष्णं चैवानुरूपं च वचनं प्रियवादिनः ।
तद्राज्ञो जनकः श्रुत्वा परं विस्मयमागतः ॥ १७ ॥
ततः सर्वे मुनिगणाः परस्परसमागमे ।
हर्षमेत्य परं तत्र निशां तामवसंस्तदा ॥ १८ ॥
कथयन्तः कथा हृद्याः पुण्यश्रवणकीर्तनाः ।
परस्परप्रभावज्ञाः पूजयन्तः परस्परं ॥ १९ ॥

विश्वामित्रं च दृष्ट्वैव राजा दशरथस्तदा ।
मुनिश्रेष्ठं समागम्य ववन्दे हृष्टमानसः ॥ २० ॥
भवन्तं नाथमासाद्य पावितोऽस्मीति चाब्रवीत् ।
विश्वामित्रोऽपि चैवैनं प्रीतिमानिदमब्रवीत् ॥ २१ ॥
पूत एवासि राजेन्द्र स्वकृतैः कर्मभिः शुभैः ।
अनेन चापि पुत्रेण रामेणाक्लिष्टकर्मणा ॥ २२ ॥
पूतोऽसि श्लाघनीयश्च देवानामपि संमतः ।
एष ते नृपते पुत्रो रामो निर्यातितो मया ॥ २३ ॥
लक्ष्मणेन सह भ्रात्रा कुशली रघुनन्दन ।
इत्युक्तो मुमुदे राजा विश्वामित्रेण धीमता ॥ २४ ॥
तौ चापि पुत्रावाघ्राय परिष्वज्य च पीडितं ।
उवास स निशां तत्र सुसुखी हृष्टमानसः ॥ २५ ॥
जनकोऽपि तदा राजा क्रिया धर्मेण धर्मवित् ।
कृत्वा यथोचिताः सर्वास्तां रात्रिमवसत् सुखं ॥ २६ ॥

इत्यार्षे रामायणे आदिकाण्डे दशरथजनकसमागमो नाम
एकसप्ततितमः सर्गः ॥

LXXII.

ततः प्रभाते जनकः कृतपौर्वाह्णिकक्रियः ।
उवाच मधुरं वाक्यं शतानन्दं पुरोधसं ॥ १ ॥
भ्राता ममानुजः श्रीमान् वीर्यवानाज्ञया मम ।
कुशध्वज इति ख्यातो यो ऽध्यास्ते नगरं शुभं ॥ २ ॥
चयाट्टालकपर्यन्तं पिबन्निक्षुमतीं नदीं ।
सांकाश्यं स्वर्गसंकाशं विमानमिव पुष्पकं ॥ ३ ॥
तमहं द्रष्टुमिच्छामि मानार्हो हि स मे मतः ।
प्रीयते हि महासत्त्वः स मया राजसत्तमः ॥ ४ ॥
तस्याथ शासनाद्दूतास्तं यात्वा शीघ्रगामिनः ।
आनयामासुरव्यग्रा विष्णुमिन्द्राज्ञया यथा ॥ ५ ॥
स तस्य शासनाद्भ्रातुराजगाम कुशध्वजः ।
ददर्श चोपसृत्याशु जनकं भ्रातृवत्सलं ॥ ६ ॥
सो ऽभिवाद्य शतानन्दं जनकं च महीपतिं ।
अध्यतिष्ठदनुज्ञातो राजार्हं वरमासनं ॥ ७ ॥
सहोपविष्टौ तौ तत्र प्रेषयामासतुस्तदा ।
मन्त्रिश्रेष्ठं समाहूय सुदामानं समाहितौ ॥ ८ ॥
गच्छ मन्त्रिवराभ्येत्य शीघ्रं दशरथं नृपं ।
आनयेह सहामात्यं सपुत्रं सपुरोधसं ॥ ९ ॥

उपकार्यां स गत्वा तमिक्ष्वाकुकुलनन्दनं ।
ददर्श शिरसा चैनं प्रणिपत्येदमब्रवीत् ॥ १० ॥
अयोध्याधिपते राजन् वैदेहो मिथिलाधिपः ।
त्वां द्रष्टुमिच्छति क्षिप्रं सोपाध्यायं सबान्धवं ॥ ११ ॥
मन्त्रिश्रेष्ठवचः श्रुत्वा राजा सर्षिगणस्तदा ।
सबन्धुरागमत् तत्र यत्र राजा स मैथिलः ॥ १२ ॥
तमासाद्य च संगृह्य राजा दशरथस्ततः ।
वाक्यं वाक्यविदां श्रेष्ठो वैदेहमिदमब्रवीत् ॥ १३ ॥
विदितं ते यथास्माकमिक्ष्वाकुकुलदैवतं ।
प्रवक्ता धर्मकार्येषु वशिष्ठो भगवानृषिः ॥ १४ ॥
विश्वामित्राभ्यनुज्ञातः सर्वैश्च परमर्षिभिः ।
एष वक्ष्यति नः पूर्वं यथाधर्मं यथाक्रमं ॥ १५ ॥
तूष्णींभूते दशरथे वशिष्ठो भगवानृषिः ।
उवाचेदं वचो धर्म्यं जनकं सपुरोहितं ॥ १६ ॥
आकाशप्रभवो ब्रह्मा शाश्वतो नित्यमव्ययः ।
तस्मान्मरीचिः संजज्ञे मरीचेः कश्यपः सुतः ॥ १७ ॥
मारीचादङ्गिरास्तस्य प्रचेतास्तनयोऽभवत् ।
मनुः प्रचेतसः पुत्र इक्ष्वाकुस्तु मनोः सुतः ॥ १८ ॥
स इक्ष्वाकुरयोध्यायां राजाभूत् प्रथमः पुरे ।
इक्ष्वाकोस्तु सुतः श्रीमान् विकुक्षिरुपपद्यत ॥ १९ ॥

विकुक्षेस्तु महातेजा बाणः पुत्रो व्यजायत ।
बाणस्य तु महाराज अनरण्यः प्रतापवान् ॥ २० ॥
अनरण्यात् पृथुर्जज्ञे त्रिशङ्कुश्च पृथोरपि ।
त्रिशङ्कोरभवत् पुत्रो धुन्धुमारो महायशाः ॥ २१ ॥
धुन्धुमारसुतो राजा युवनाश्वो महाबलः ।
युवनाश्वसुतश्चासीन्मान्धाता पृथिवीपतिः ॥ २२ ॥
मान्धातुस्तु महातेजाः सुषन्धिः समपद्यत ।
सुषन्धेर्ध्रुवसन्धिस्तु द्वितीयस्तु प्रसेनजित् ॥ २३ ॥
यशस्वी ध्रुवसन्धेस्तु भरतो नाम विश्रुतः ।
भरतात् तु महातेजा असितः समजायत ॥ २४ ॥
पतिशोकातुरा तत्र पुत्रं देवी व्यजायत ।
सह तेन गरेणैव ततः स सगरोऽभवत् ॥ २५ ॥
सगरादसमञ्जास्तु अंशुमांश्चासमञ्जसः ।
दिलीपोऽंशुमतः पुत्रो दिलीपस्य भगीरथः ॥ २६ ॥
भगीरथात् ककुत्स्थश्च ककुत्स्थाच्च रघुस्तथा ।
रघोस्तु वंशे तेजस्वी प्रवृद्धः पुरुषादकः ॥ २७ ॥
कल्माषपादो ह्यभवच्छङ्खणस्तस्य चात्मजः ।
सुदर्शनः शङ्खणस्य अग्निवर्णः सुदर्शनात् ॥ २८ ॥
शीघ्रगस्त्वग्निवर्णस्य शीघ्रगादभवन्मरुः ।
मरोः प्रशुश्रुको ह्यासीदम्बरीषः प्रशुश्रुकात् ॥ २९ ॥

अम्बरीषस्य पुत्रोऽभून्नहुषः पृथिवीपतिः ।
नहुषस्य ययातिस्तु नाभागश्च ययातितः ॥ ३० ॥
अजो नाभागपुत्रस्तु तस्माद्दशरथोऽभवत् ।
राज्ञो दशरथस्येमौ तनयौ रामलक्ष्मणौ ॥ ३१ ॥
आमनोरिति शुद्धानां राज्ञाममिततेजसां ।
ककुत्स्थेक्ष्वाकुसगररघुप्रवरजन्मनां ॥ ३२ ॥
उदाराचारसत्वानां क्षत्रधर्मानुपालिनां ।
कुले जलनिधिप्रख्ये जातयोर्वृत्तशालिनोः ॥ ३३ ॥
रामलक्ष्मणयोरर्थे वरये तनये तव ।
सदृशाभ्यां स्वसदृशे सुते त्वं दातुमर्हसि ॥ ३४ ॥
इत्युक्तो जनको राजा कृताञ्जलिरभाषत ।
अस्माकमपि राजर्षे कुलं त्वं श्रोतुमर्हसि ॥ ३५ ॥
कन्यादाने हि वक्तव्यं कुलं निरवशेषतः ।
नामतो वृत्ततश्चैव कर्मतः शीलतस्तथा ॥ ३६ ॥

इत्यार्षे रामायणे आदिकाण्डे कन्यावरणं नाम
द्विसप्ततितमः सर्गः ॥

LXXIII.

ततस्त्वाभाष्य जनको वशिष्ठं वदतां वरं ।
नृपं दशरथं चेदं प्रोवाच वचनं तदा ॥ १ ॥
राजाभूत् त्रिषु लोकेषु विश्रुतः स्वेन कर्मणा ।
निमिः परमधर्मात्मा सर्वसत्ववतां वरः ॥ २ ॥
तस्य पुत्रो मिथिर्नाम बभूवानुपमद्युतिः ।
तस्यापि जनको नाम जनकस्याप्युदावसुः ॥ ३ ॥
उदावसोरभूत् सूनुः प्रथितो नन्दिवर्धनः ।
नन्दिवर्धनजश्चासीत् सुकेतुर्नाम पार्थिवः ॥ ४ ॥
सुकेतोरभवत् पुत्रो देवरातो महाबलः ।
देवरातस्य तनयो वृहद्रथ इति श्रुतः ॥ ५ ॥
वृहद्रथस्य च सुतो महावीर्यः प्रतापवान् ।
महावीर्यस्य धृतिमान् सुधृतिस्तनयोऽभवत् ॥ ६ ॥
सुधृतेरपि धर्मात्मा धृष्टकेतुरभूत् सुतः ।
धृष्टकेतोरभूच्चापि हर्यश्वस्तनयो महान् ॥ ७ ॥
हर्यश्वस्य मरुः पुत्रो मरोः पुत्रः प्रसिद्धकः ।
प्रसिद्धकस्य धर्मात्मा राजा कृत्तिरथः सुतः ॥ ८ ॥
पुत्रः कृत्तिरथस्यापि देवमीढ इति स्मृतः ।
देवमीढस्य विबुधो विबुधस्यापि चान्धकः ॥ ९ ॥

अन्धकस्य सुतश्चासीत् कृतिरात इति श्रुतः ।
कृतिरातस्य च सुतः कृतिरोमा व्यजायत ॥ १० ॥
कृतिरोमसुतश्चापि स्वर्णरोमेति विश्रुतः ।
स्वर्णरोम्णोऽभवच्चापि ह्रस्वरोमा सुतो बली ॥ ११ ॥
तस्य पुत्रद्वयं जज्ञे धर्मज्ञस्य महात्मनः ।
ज्येष्ठोऽहमनुजश्चायं भ्राता मम कुशध्वजः ॥ १२ ॥
मां तु ज्येष्ठं ततो राज्येष्वभिषिच्य पिता मम ।
कुशध्वजं यौवराज्ये त्यक्त्वा राज्यं वनं गतः ॥ १३ ॥
वृद्धे पितरि स्वर्याते ततोऽहं रघुनन्दन ।
भ्रातरं देवसंकाशमपश्यं स्वशरीरवत् ॥ १४ ॥
कस्यचित् त्वथ कालस्य सांकाश्यादागतो नृपः ।
सुधन्वा बलवीर्याढ्यो मिथिलामवरोधकः ॥ १५ ॥
स च मे प्रेषयद्दूतं यदेतत् ते धनुर्गृहे ।
तिष्ठत्यभ्यर्चितं दिव्यमेतद्देहीति राघव ॥ १६ ॥
तस्याप्रदाने धनुषः सोऽयुध्यत मया सह ।
हतश्च स मया राजा सुधन्वा बलगर्वितः ॥ १७ ॥
निहत्य समरे चाहं सुधन्वानं महीपतिं ।
सांकाश्ये भ्रातरं शूरमभ्यषिञ्चं कुशध्वजं ॥ १८ ॥
कनीयानेष मे भ्राता सत्यसंधः कुशध्वजः ।
ददामि सहितोऽनेन वध्वौ तेऽहं सुते नृप ॥ १९ ॥

सीतां रामाय तनयामूर्मिलां लक्ष्मणाय च ।
वीर्यशुल्का मम सुता सीता सुरसुतोपमा ॥ २० ॥
अयोनिजा समुत्पन्ना वेदीमध्यात् सुमध्यमा ।
तां रामाय प्रयच्छामि पत्नीं वीर्यबलार्जितां ॥ २१ ॥
रामलक्ष्मणयो राजन् कुरु गोदानमङ्गलं ।
पितृश्राद्धं च भद्रं ते ततो वैवाहिकं कुरु ॥ २२ ॥
वर्तन्तेऽद्य मघा राजन् दिवसे तूत्तरे पुनः ।
फाल्गुण्यः प्रतिपत्स्यन्ते विवाहस्तत्र नोऽस्त्वयं ॥ २३ ॥

इत्यार्षे रामायणे आदिकाण्डे जनककुलाख्यानं नाम
त्रिसप्ततितमः सर्गः ॥

LXXIV.

उक्तवाक्ये तु जनके विश्वामित्रो महामुनिः ।
उवाच वचनं धीमान् वशिष्ठसहितस्तदा ॥ १ ॥
उभे महोदधिप्रख्ये उभयोरपि वां कुले ।
ख्यात इक्ष्वाकुवंशो हि जनकानां तथैव च ॥ २ ॥
सदृशोऽपत्यसंबन्धो युवयोरिति मे मतिः ।
सीताया उर्मिलायाश्च रामलक्ष्मणयोस्तथा ॥ ३ ॥
वक्तव्यमस्ति नः किंचिद्भूयोऽपि शृणु तन्नृप ।
भ्राता ते सदृशो योऽयं शूरो राजा कुशध्वजः ॥ ४ ॥
अस्यास्ति किल धर्मात्मन् रूपेणाप्रतिमं भुवि ।
कन्याद्वयं राघवार्थे तद्वयं वरयामहे ॥ ५ ॥
धर्मतो भरतस्यार्थे शत्रुघ्नस्य च धीमतः ।
तदिमे संप्रयच्छ त्वं यदि ते रुचिता वयं ॥ ६ ॥
पुत्रा दशरथस्यास्य चत्वारोऽमिततेजसः ।
लोकपालोपमा वीराः सर्वे सत्यपराक्रमाः ॥ ७ ॥
एषामर्थे वयं राजन् भवन्तं वरयामहे ।
सदृशोऽसि प्रभावेन राघवाणां महीपते ॥ ८ ॥
संबन्ध उभयोर्भ्रात्रोर्युवयोः सदृशस्त्वयं ।
इक्ष्वाकुभिर्धर्मशीलैर्विख्यातैराप्रजापतेः ॥ ९ ॥

इत्युदारवचः श्रुत्वा विश्वामित्रवशिष्ठयोः ।
जनकः प्राञ्जलिर्वाक्यमुवाच मुनिपुंगवौ ॥ १० ॥
सदृशः कुलसंबन्धो भवद्भ्यामुपवर्णितः ।
एवं भवत्विमे कन्ये कुशध्वजसुते उभे ॥ ११ ॥
ददामि भरतायैकां शत्रुघ्नाय तथापरां ।
इच्छाम्यहमपि प्रीतिं संबन्धं च पुनः पुनः ॥ १२ ॥
एकाह्नि राजपुत्रीणां चत्वारो रघुनन्दनाः ।
गृह्णन्त्वासां चतसृणां पाणीन् मन्त्रवदीप्सितान् ॥ १३ ॥
उत्तरे दिवसे ब्रह्मन् फाल्गुण्यो भगदेवताः ।
विवाहेषु प्रशंसन्ति नक्षत्रं वै विपश्चितः ॥ १४ ॥
एवमस्त्विति तं तत्र वशिष्ठः प्रत्यभाषत ।
तं चापि जनको राजा कृताञ्जलिरभाषत ॥ १५ ॥
वरधर्मीकृतो ब्रह्मन् शिष्योऽस्मि भवतां सदा ।
सामात्यः सबलश्चैव परवानस्मि चिन्त्यतां ॥ १६ ॥
प्रभुर्दशरथो राजा ममास्य विषयस्य च ।
भवन्तश्चापि सर्वे मे सर्वस्वे प्रभविष्णवः ॥ १७ ॥
विषयस्य च सर्वस्य राज्यस्य च ममेश्वराः ।
भवन्तः क्रियतां तस्माद्भवद्भिः प्रणयो मम ॥ १८ ॥
तथा वदति वैदेहे जनके प्रसृतं वचः ।
राजा दशरथो हृष्टः प्रत्युवाच हसन्निव ॥ १९ ॥

प्रियं संबन्धिनं स्निग्धं प्रीतियुक्तमिदं वचः ।
सर्वस्वस्यास्य ते राजन् प्रभुरस्मि यथात्थ मां ॥ २० ॥
अहं तव ममापि त्वं यत् तवास्ति ममैव तत् ।
विश्वामित्रादयश्चापि तवेमे मम चेश्वराः ॥ २१ ॥
सर्वतः प्रणयोऽस्माभिः कृतस्त्वयि महीपते ।
करिष्यामश्च भूयोऽपि नास्ति नः स्वे विचारणा ॥ २२ ॥
युवामसंख्येयगुणौ भ्रातरौ मिथिलेश्वरौ ।
प्रियसंबन्धिनौ लब्धौ लोकेऽस्मिन् पूजितौ मया ॥ २३ ॥
स्वस्ति प्राप्नुहि भद्रं ते गमिष्यामि स्वमालयं ।
गोदानादीनि कर्माणि कर्तुं कार्याण्यनन्तरं ॥ २४ ॥
धर्मार्थवृद्धिकामानां मा नः कालोऽत्यगादयं ।
सर्वेषामेव चास्माकमाज्ञां त्वं दातुमर्हसि ॥ २५ ॥
आपृच्छ्यैवं दशरथो राजानं मिथिलेश्वरं ।
पुरस्कृत्य वशिष्ठादीन् निर्जगाम मुनींस्ततः ॥ २६ ॥
स गत्वा निलयं राजा कृत्वा श्राद्धं महत् तदा ।
पुत्राणां प्रियपुत्रः स चक्रे गोदानमुत्तमं ॥ २७ ॥
गवां शतसहस्रं हि ब्राह्मणेभ्यो नरेश्वरः ।
एकैकशो ददौ पुत्रानुद्दिश्य तान् पृथक् पृथक् ॥ २८ ॥
पयस्विनीनां हि गवां सवत्सानां सुवर्चसां ।
ददौ शतसहस्राणि चत्वारि रघुनन्दनः ॥ २९ ॥

ततस्तैः कृतगोदानैर्वृतः पुत्रैर्महीपतिः ।
लोकपालैरिव बभौ वृतः साक्षात् प्रजापतिः ॥ ३० ॥

इत्यार्षे रामायणे आदिकाण्डे गोदानं नाम
चतुःसप्ततितमः सर्गः ॥

LXXV.

यमेव दिवसं राजा चक्रे गोदानं मङ्गलं ।
तमेव दिवसं तत्र युधाजित् प्रत्यदृश्यत ॥ १ ॥
पुत्रः केकयराजस्य शूरो भरतमातुलः ।
दृष्ट्वा पृष्ट्वा च कुशलं राजा तं परिषस्वजे ॥ २ ॥
युधाजिच्चापि संपूज्य पर्यपृच्छदनामयं ।
पृष्ट्वा चानामयं पश्चादिदं वचनमब्रवीत् ॥ ३ ॥
केकयाधिपती राजन् स्नेहात् कुशलमब्रवीत् ।
येषां कुशलकामोऽसि तेषां कुशलमुत्तमं ॥ ४ ॥
स्वस्रीयं द्रष्टुकामोऽहं त्वां च राजन् सबान्धवं ।
स्वपुरादागतः शीघ्रमयोध्यां रघुनन्दन ॥ ५ ॥
श्रुत्वा चाहमयोध्यायामिहस्थं त्वां सबान्धवं ।
त्वरावानुपयातोऽहं द्रष्टुं ते वृद्धिमीप्सितां ॥ ६ ॥
तं स राजा दशरथः प्रियातिथिमुपागतं ।
दृष्ट्वा परमसत्कारैः पूजार्हं प्रत्यपूजयत् ॥ ७ ॥
ततस्तामुषितो रात्रिं सह पुत्रैर्महीपतिः ।
पुरस्कृत्य वशिष्ठादिन् मुनीन् यज्ञमुपाययौ ॥ ८ ॥
युक्ते मुहूर्ते वैवाहे महार्हाम्बरभूषणैः ।
कृतकौतुकमङ्गलैः पुत्रैर्दशरथो वृतः ॥ ९ ॥

वशिष्ठं पुरतः कृत्वा तांश्चैवान्यान् महामुनीन् ।
यथान्यायमुपागम्य राजा वैदेहमब्रवीत् ॥ १० ॥
प्राप्ताः स्म राजन् भद्रं ते विवाहार्थं सदस्तव ।
तत् साधु चिन्तयित्वास्मान् प्रवेशयितुमर्हसि ॥ ११ ॥
स्थिता हि ते वशे सर्वे वयमद्य सबान्धवाः ।
स्ववंशधर्माभ्युचितं कुरु वैवाहिकं क्रमं ॥ १२ ॥
इत्युक्तः परमोदारं वाक्यं वाक्यविशारदः ।
प्रत्युवाच ततो राजा मैथिलस्तं नराधिपं ॥ १३ ॥
कः स्थितः प्रतिहारो मे कस्याज्ञा प्रतिपाल्यते ।
स्वगृहे को विचारस्ते विश्रम्भेण प्रविश्यतां ॥ १४ ॥
यज्ञभूमिमिमां प्राप्ताः कृतकौतुकमङ्गलाः ।
मम कन्याश्चतस्रो हि वह्नेर्दीप्ता इवार्चिषः ॥ १५ ॥
सज्जोऽहं त्वत्प्रतीक्षश्च वेद्यामस्यां स्थितो नृप ।
अविघ्नं कुरु राजेन्द्र किमर्थं त्वं विलम्बसे ॥ १६ ॥
श्रुत्वैतज्जनकेनोक्तं वाक्यं दशरथो नृपः ।
प्रवेशयामास तदा वशिष्ठादीन् द्विजर्षभान् ॥ १७ ॥
ततो राजा विदेहानामुवाच रघुनन्दनं ।
रामं कमलपत्राक्षं पूर्वं वेदीमुपानय ॥ १८ ॥
इयं सीता मम सुता सहधर्मचरी तव ।
गृहाण पाणिना पाणिं त्वमस्या रघुनन्दन ॥ १९ ॥

लक्ष्मणागच्छ पुत्रेममूर्मिलाया मयोद्यतं ।
गृहाणोपेत्य धर्मेण पाणिं राघव पाणिना ॥ २० ॥
तमेवमुक्त्वा जनको भरतं केकयीसुतं ।
चोदयामास धर्मात्मा माण्डव्याः पाणिसंग्रहे ॥ २१ ॥
शत्रुघ्नमपि चासीनं जनको वाक्यमब्रवीत् ।
श्रुतकीर्त्या गृहाण त्वं पाणिना पाणिमुद्यतं । ॥ २२ ॥
सर्वे भवन्तः सदृशैर्दारैर्युक्ता यतव्रताः ।
कुलोचितं शुभं धर्मं कुरुध्वं शिवमस्तु वः ॥ २३ ॥
जनकस्य वचः श्रुत्वा पाणींस्तान् जगृहुस्तदा ।
चत्वारस्ते चतसृणां शतानन्दानुमन्त्रिताः ॥ २४ ॥
अग्निं प्रदक्षिणं चक्रुस्ततः सर्वे यथाक्रमं ।
राज्ञा कृतस्वस्त्ययनास्तैश्च सर्वैर्महर्षिभिः ॥ २५ ॥
पपात पुष्पवृष्टिश्च लाजोन्मिश्रा नभश्च्युता ।
तेषामुपरि सर्वेषां विवाहे पुण्यकर्मणां ॥ २६ ॥
देवदुन्दुभयो नेदुरम्बरे मधुरस्वनाः ।
शुश्रुवे मधुरश्चैव वीणावेणुस्वनो महान् ॥ २७ ॥
जगुश्च देवगन्धर्वा ननृतुश्चाप्सरोगणाः ।
विवाहे रघुमुख्यानां तदद्भुतमिवाभवत् ॥ २८ ॥
ईदृशे वर्तमाने तु काले रतिकरे शुभे ।
त्रिरग्निं ते परिक्रम्य तत ऊहुर्वधूः पृथक् ॥ २९ ॥

स्वानि यानानि चारोप्य दारांस्ते प्रययुस्ततः ।
राजाप्यनुययौ पश्चात् सर्षिसंघः सबान्धवः ॥३०॥

इत्यार्षे रामायणे आदिकाण्डे दशरथपुत्राणां
विवाहो नाम पञ्चसप्ततितमः सर्गः ॥

LXXVI.

अथ रात्र्यां व्यतीतायां विश्वामित्रो महामुनिः ।
आमन्त्र्य तौ नरव्याघ्रौ जगामोत्तरपर्वतं ॥ १ ॥
विश्वामित्रे गते तस्मिन् जनकं मिथिलाधिपं ।
आपृच्छ्य प्रययौ चापि राजा दशरथः पुरं ॥ २ ॥
अथ राजा विदेहानां तत्र कन्याधनं ददौ ।
कम्बलाजिनरत्नानि दुकूलानि मृदूनि च ॥ ३ ॥
नानारागाणि वासांसि शुभान्याभरणानि च ।
रत्नानि च महार्हाणि यानानि विविधानि च ॥ ४ ॥
गवां शतसहस्राणि चत्वारि पृथगेव च ।
ददौ राजा महार्हाणि कन्याधनमभीप्सितं ॥ ५ ॥
चतुरङ्गबलं चान्यदनुयात्रं महद्ददौ ।
दासीनां निष्ककण्ठीनां सहस्रमपि चाददात् ॥ ६ ॥
सुवर्णस्यायुतं पूर्णं हिरण्यस्य च मैथिलः ।
ददौ प्रीतेन मनसा कन्याधनमनुत्तमं ॥ ७ ॥
एवं दत्वा बहुविधं तमनुज्ञाप्य पार्थिवं ।
प्रविवेश पुरीं रम्यां मिथिलां मिथिलेश्वरः ॥ ८ ॥
राजाप्ययोध्याधिपतिः सह पुत्रैर्महात्मभिः ।
पुरस्कृत्य वशिष्ठादीन् गुरूंस्तान् प्रययौ ततः ॥ ९ ॥

तं गच्छन्तं कृतोद्वाहं स्वपुरं सपदानुगं ।
अपसव्यं ततो जग्मुः पक्षिणो भयवेदिनः ॥ १० ॥
मृगाश्च शमयन्तस्तान् प्रतिजग्मुः प्रदक्षिणं ।
तान् दृष्ट्वा व्यथितो राजा वशिष्ठं पर्यपृच्छत ॥ ११ ॥
असौम्याः पक्षिणः कस्मान्मृगाश्चेमे प्रदक्षिणाः ।
अकस्माच्चैव सोत्कम्पं हृदयं केन मे मुने ॥ १२ ॥
राज्ञो दशरथस्येदं श्रुत्वा वाक्यं तदा मुनिः ।
वशिष्ठस्तमुवाचेदं श्रूयतामस्य यत् फलं ॥ १३ ॥
उपस्थितं भयं घोरं पक्षिणो वेदयन्ति ते ।
प्रदक्षिणा मृगाः सौम्यास्तदेते शमयन्ति ते ॥ १४ ॥
तयोः संवदतोरेवं वायुः प्रादुरभून्महान् ।
प्रचण्डः शर्कराकर्षी कम्पयन्निव मेदिनीं ॥ १५ ॥
दिशः सतिमिराश्चासन् न ततापं दिवाकरः ।
रजसा च जगत् कृत्स्नं भस्मनेवावकीर्यते ॥ १६ ॥
सर्वे चाप्यभवंस्तत्र सैनिका मूढचेतसः ।
वर्जयित्वा वशिष्ठादीनृषींस्तांश्चैव राघवान् ॥ १७ ॥
ततो रजसि संशान्ते सैनिका लब्धचेतसः ।
आयान्तं ददृशुस्तत्र जटामण्डलधारिणं ॥ १८ ॥
महेन्द्रमिव दुर्धर्षं कालान्तकयमोपमं ।
दुर्निरीक्ष्यं नरैरन्यैर्ज्वलितानलवर्चसं ॥ १९ ॥

स्कन्धे परशुमादाय धनुश्चेन्द्रायुधप्रभं ।
प्रगृह्यैकं शरं घोरं रुद्रं साक्षादिवागतं ॥ २० ॥
रोषामर्षसमाविष्टं सधूममिव पावकं ।
जामदग्निसुतं रामं दृष्ट्वाभ्यासं समागतं ॥ २१ ॥
वशिष्ठप्रमुखा विप्रा जेपुः शान्तिपरायणाः ।
संगताश्चर्षयः सर्वे संजजल्पुरथो मिथः ॥ २२ ॥
कच्चित् पितृबधामर्षात् पुनर्नोत्सादयिष्यति ।
क्षत्रं रामोऽयमागत्य शान्तमन्युरपि प्रभुः ॥ २३ ॥
सर्वक्षत्रबधं घोरमसकृत् कृतवान् पुरा ।
कच्चिदद्यापि सक्रोधः क्षत्रं नोत्सादयिष्यति ॥ २४ ॥
इति मत्वार्घ्यमुद्यम्य भार्गवं ते ततोऽब्रुवन् ।
वशिष्ठप्रमुखा विप्राः सामपूर्वमिदं वचः ॥ २५ ॥
राम सुस्वागतं तेऽस्तु गृह्णाणार्घ्यमिदं प्रभो ।
मुने भार्गव संशाम्य न क्रोद्धुं पुनरर्हसि ॥ २६ ॥
प्रतिगृह्य स तां पूजामप्रत्युक्त्वा च तानृषीन् ।
रामो दाशरथिं राममुवाचेदमनन्तरं ॥ २७ ॥

इत्यार्षे रामायणे आदिकाण्डे जामदग्न्यसमागमो
नाम षट्सप्ततितमः सर्गः ॥

LXXVII.

राम दाशरथे वीर वीर्यं ते श्रूयतेऽद्भुतं ।
धनुः किल त्वया भग्नं दिव्यं यत् तच्छ्रुतं मया ॥ १ ॥
अद्भुतं तत् कृतं राम धनुषो भेदनं त्वया ।
श्रुत्वैवाहमनुप्राप्त आदायेदं महद्धनुः ॥ २ ॥
अनेन धनुषा राम मया कृत्स्ना मही जिता ।
पूरयेदमपि क्षिप्रं बलं दर्शय राघव ॥ ३ ॥
विकर्ष चापि संधाय बाणेनानेन राघव ।
गृहाणेदं धनुर्दिव्यं शरं चैनं मयोद्यतं ॥ ४ ॥
यदि संधास्यसीदं त्वं बाणेनानेन कार्मुकं ।
ततो दास्यामि युद्धं ते वीर्यश्लाघ्यमनुत्तमं ॥ ५ ॥
तस्येदं वचनं श्रुत्वा राजा दशरथस्तदा ।
विषण्णवदनो भूत्वा प्राञ्जलिः प्रणतोऽब्रवीत् ॥ ६ ॥
राम रोषः प्रशान्तस्ते ब्राह्मणस्त्वं शमात्मकः ।
बालानां मम पुत्राणामभयं दातुमर्हसि ॥ ७ ॥
भृगूणां हि कुले जातः प्रशान्तानां महात्मनां ।
तपःस्वाध्यायशीलानां न क्रोद्धुं पुनरर्हसि ॥ ८ ॥
ऋचीकच्यवनादीनां पितॄणां संनिधौ पुरा ।
न योत्स्य इति संन्यस्य शस्त्रं न स्प्रष्टुमर्हसि ॥ ९ ॥

तपोदमरतो भूत्वा कश्यपाय वसुंधरां ।
दत्वा वनमुपागम्य संन्यासं कृतवान् कथं ॥ १० ॥
मम सर्वविनाशाय भूयो योद्धुमिहेच्छसि ।
न ह्येतस्मिन् हते रामे जीवामः सर्व एव हि ॥ ११ ॥
प्रसीद भृगुशार्दूल त्रायस्व शरणागतं ।
रामं पुत्रं न मे बालं राम संदग्धुमर्हसि ॥ १२ ॥
वदत्येवं दशरथे जामदग्न्यः प्रतापवान् ।
अनादृत्यैव तद्वाक्यं भूयो राममभाषत ॥ १३ ॥
इमे द्वे धनुषी राम दिव्ये लोकत्रये श्रुते ।
विश्वकर्मकृते सारे अल्पवीर्यदुरानमे ॥ १४ ॥
तयोरेकं त्र्यम्बकाय दत्तं राम युयुत्सवे ।
त्रिपुरं जघ्नुषे देवैर्भग्नं काकुत्स्थ यत् त्वया ॥ १५ ॥
इदं द्वितीयमपरं विष्णवे यद्ददुः सुराः ।
द्रव्यसारबलप्राणप्रमाणाकृतिभिः समं ॥ १६ ॥
ब्रह्माणं यत्र पप्रच्छुः सुराः कौतूहलान्विताः ।
शितिकण्ठस्य विष्णोश्च धनुषश्च बलाबलं ॥ १७ ॥
अभिप्रायं विदित्वा तु देवतानां पितामहः ।
विरोधयामास मिथो विष्णुं शङ्करमेव च ॥ १८ ॥
विरोधे च महायुद्धमभवत् तत्र देवयोः ।
शितिकण्ठस्य विष्णोश्च परस्परजिगीषया ॥ १९ ॥

तत्र तज्जृम्भितं शैवं धनुर्भीमपराक्रमं ।
हुंकारेण महादेवः स्तम्भितोऽथ त्रिलोचनः ॥ २० ॥
देवैस्तु समागम्य सर्षिसंघैः सचारणैः ।
याचितो न प्रहृतवान् विष्णुर्बलवतां वरः ॥ २१ ॥
विजृम्भितं तत्र दृष्ट्वा सर्वे विष्णुबलात् तदा ।
अधिकं मेनिरे विष्णुं विबुधा धनुषा सह ॥ २२ ॥
धनुस्तज्जृम्भितं रुद्रो विदेहेषु महायशाः ।
देवरातस्य राजर्षेर्ददौ न्यासमनुत्तमं ॥ २३ ॥
इदं च वैष्णवं राम धनुरभ्यधिकं ततः ।
ऋचीके भार्गवे न्यासं न्यदधाद्विष्णुर्जितं ॥ २४ ॥
ऋचीकोऽपि महातेजाः पुत्रायामिततेजसे ।
पित्रे मम ददौ दिव्यं कार्मुकं जमदग्नये ॥ २५ ॥
न्यस्तशस्त्रे तु पितरि मदीये शममास्थिते ।
अर्जुनो विदधे मृत्युं प्राकृतां बुद्धिमास्थितः ॥ २६ ॥
तं रामासदृशं श्रुत्वा पितुस्तत्र बधं मया ।
असकृत् सूदितं क्षत्रं जातं जातमनेन हि ॥ २७ ॥
पृथिवी चापि विजिता मयास्य धनुषो बलात् ।
दत्ता चेयं विनिर्जित्य कश्यपाय महात्मने ॥ २८ ॥
कश्यपाय च दत्त्वेमामखिलां सागराम्बरां ।
न्यस्तशस्त्रस्तपस्तप्तुं गतोऽहं मेरुपर्वतं ॥ २९ ॥

तत्र संन्यस्तशस्त्रोऽपि तपस्यभिरतोऽप्यहं ।
श्रुत्वैव धनुषो भङ्गं द्रष्टुं त्वां समुपागतः ॥ ३० ॥
तदिदं वैष्णवं राम पितृपैतामहं मम ।
क्षत्रधर्ममुपाश्रित्य गृह्णाण धनुरुत्तमं ॥ ३१ ॥
योजयस्व गृहीत्वा च शरेण रघुनन्दन ।
यदि शक्तोऽसि संधातुं युद्धं दास्यामि ते ततः ॥ ३२ ॥
तच्छ्रुत्वा जामदग्न्यस्य रामो रामस्य भाषितं ।
गौरवाच्छन्नितकथः पितुर्वचनमब्रवीत् ॥ ३३ ॥
श्रुतवानस्मि ते कर्म घोरं यत् तु त्वया कृतं ।
न तेऽभ्यसूये तत् कर्म पितुरानृण्यकारिणः ॥ ३४ ॥
वीर्यशक्तिपरिक्षीणं क्षत्रमुत्सादितं त्वया ।
नातिक्रूरेण तेन त्वं कर्मणा गर्वितो भव ॥ ३५ ॥
आनयेदं धनुर्दिव्यं पश्य मे बलपौरुषं ।
क्षत्रस्यापि महत् तेजः पश्याद्य भृगुनन्दन ॥ ३६ ॥
इत्युक्त्वा तद्धनुर्दिव्यं रामो जग्राह वीर्यवान् ।
रामस्य जामदग्न्यस्य हस्तादीषत् कृतस्मितः ॥ ३७ ॥
शरं च हस्तादादाय ततो लघुपराक्रमः ।
संधाय स शरं चापं विचकर्ष महायशाः ॥ ३८ ॥
विकृष्य बलवच्चापि तद्धनुः सशरं तदा ।
रामो दाशरथिर्वाक्यमुवाच प्रथितं पुनः ॥ ३९ ॥

ब्राह्मणोऽसीति पूज्यो मे विश्वामित्रकृतेन च ।
शक्तोऽपि न ते मोक्ष्येऽहमिमं प्राणहरं शरं ॥ ४० ॥
इमां तु ते गतिं दिव्यां निहन्मि तपसार्जितां ।
लोकान् वाप्रतिमान् पुण्यान् हन्मि ते शरतेजसा ॥ ४१ ॥
न ह्ययं वैष्णवो राम शक्यो दिव्यो महाशरः ।
मया मोघं समुत्स्रष्टुं बलदर्पविनाशनः ॥ ४२ ॥
ततो वरायुधधरं रामं दशरथात्मजं ।
द्रष्टुं ब्रह्मादयो देवाः समाजग्मुर्मनोजवाः ॥ ४३ ॥
देवानुपस्थितान् तत्र दृष्ट्वा दिव्येन चक्षुषा ।
बुद्ध्वा च ध्यानयोगेन रामं नारायणाङ्गजं ॥ ४४ ॥
रामाभिभूतवीर्योऽसौ जामदग्न्यस्ततोऽब्रवीत् ।
कृताञ्जलिरिदं वाक्यं रामं दशरथात्मजं ॥ ४५ ॥
कश्यपाय यदा राम मया दत्ता वसुंधरा ।
विषये मे न वस्तव्यमिति मे कश्यपोऽब्रवीत् ॥ ४६ ॥
सोऽहं ततःप्रभृत्यस्यां न वसामि क्षितौ क्वचित् ।
मिथ्याप्रतिज्ञः काकुत्स्थ मा भूवमिति निश्चितं ॥ ४७ ॥
ततो नार्हसि मे हन्तुं गतिं दिव्यां मनोजवां ।
लोकांस्तु जहि मे पुण्यान् शरेणानेन राघव ॥ ४८ ॥
अक्षयं मधुहन्तारं जानामि त्वां सनातनं ।
धनुषोऽस्य परामर्षादस्तु स्वस्ति प्रसीद मे ॥ ४९ ॥

एते सुरगणा राम पश्यन्ति त्वां समागताः ।
वरायुधधरं वीरं साक्षाद्विष्णुमिवापरं ॥५०॥
न चेयं मम काकुत्स्थ व्रीडा भवितुमर्हति ।
त्वया त्रैलोक्यनाथेन यदहं विमुखीकृतः ॥५१॥
इत्युक्तः स शरं रामो मुमोच रघुनन्दनः ।
लोकेषु जामदग्न्यस्य रामस्यामिततेजसः ॥५२॥
ततःप्रभृति रामोऽभूदलोकः शरतेजसा ।
मुक्ते तस्मिन् शरे देवाः प्राशंसन् राघवं तदा ॥५३॥
आकाशगा विमानेषु स्वेषु दिव्येष्ववस्थिताः ।
आसन् वितिमिराः सर्वाः दिशश्च विदिशस्तथा ॥५४॥
रामोऽपि जामदग्न्यस्तं रामं दशरथात्मजं ।
प्रदक्षिणमुपावृत्य जगामाथ स्वमाश्रमं ॥५५॥

इत्यार्षे रामायणे आदिकाण्डे जामदग्न्यलोकाभावो
नाम सप्तसप्ततितमः सर्गः ॥

LXXVIII.

जामदग्न्ये गते रामे रामो दाशरथिर्धनु ।
लब्ध्वा संदर्शयामास पितुः स्वबलनिर्जितं ॥ १ ॥
तांश्चाभिवादयां चक्रे वशिष्ठप्रभृतीनृषीन् ।
प्रोवाच पितरं चेदं रामागमनविह्वलं ॥ २ ॥
जामदग्न्यो गतो रामः प्रयातु चतुरङ्गिनी ।
अयोध्याभिमुखी सेना त्वया नाथेन नाथिनी ॥ ३ ॥
रामस्यैतद्वचः श्रुत्वा हृष्टः प्रमुदितो नृपः ।
बाहुभ्यां संपरिष्वज्य मूर्ध्नि चाघ्राय राघवं ॥ ४ ॥
गतो राम इति श्रुत्वा प्राप्य हर्षमनुत्तमं ।
योजयित्वा पुनः सैन्यं जगाम स्वपुरीं प्रति ॥ ५ ॥
समुच्छ्रितध्वजवतीं तूर्यस्वननिनादितां ।
सिक्तराजपथां रम्यां प्रकीर्णकुसुमोत्करां ॥ ६ ॥
राजप्रवेशाभिमुखैः पौरैर्मङ्गलवादिभिः ।
संकीर्णां प्राविशद्राजा पुरीं स्वं च निवेशनं ॥ ७ ॥
कौशल्या च सुमित्रा च कैकेयी च सुमध्यमा ।
वधूप्रतिग्रहे युक्ता याश्चान्या राजयोषितः ॥ ८ ॥
ततः सीतां श्रीप्रतिमामुर्मिलां च यशस्विनीं ।
कुशध्वजसुते चैव परिगृह्यानुगृह्य च ॥ ९ ॥

ततः प्रवेशयामासुर्नृपवेश्म स्वलंकृताः ।
मङ्गलालभनीयैश्च शोभिताः क्षौमवाससः ॥ १० ॥
उपनिन्युश्च ता एता देवतायतनान्यपि ।
अभिवाद्याभिवाद्यांस्तांस्तत्र पूज्यान् गुरूंस्तथा ॥ ११ ॥
रेमिरे मुदितास्तत्र भर्तृप्रियहिते रताः ।
तासां भूयो विशेषेण मैथिली जनकात्मजा ॥ १२ ॥
रमयामास भर्तारं विष्णुं श्रीरिव रूपिणी ।
प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः ॥ १३ ॥
प्रियभावः स तु तया स्वगुणैरभिवर्धितः ।
तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत् ॥ १४ ॥
हृदयं ह्येव जानाति प्रीतियोगं परस्परं ।
सीतया तु तया रामः प्रियया सह संगतः ।
प्रियोऽधिकतरं तस्या विजहारामरोपमः ॥ १५ ॥

तया स राजर्षिसुतोऽनुरूपया
समेयिवानुत्तमरूपकन्यया ।
अतीव रामः शुशुभे स कान्तया
युतः श्रिया विष्णुरिवापराजितः ॥ १६ ॥

इत्यार्षे रामायणे आदिकाण्डे अयोध्यासंप्रवेशो
नाम अष्टासप्ततितमः सर्गः ॥

LXXIX.

कस्यचित् त्वथ कालस्य राजा दशरथः सुतं ।
भरतं केकयीपुत्रं समाहूयेदमब्रवीत् ॥ १ ॥
अयं केकयराजस्य सुतो वसति पुत्रक ।
नेतुं त्वामागतो वीर युधाजिन्मातुलस्तव ॥ २ ॥
तस्मान्मातामहं द्रष्टुमितोऽनेन सह त्वया ।
गन्तव्यं पुत्र पश्य त्वं पुरं मातामहस्य तत् ॥ ३ ॥
श्रुत्वा दशरथस्यैतद्वचनं केकयीसुतः ।
गमनायोपचक्राम शत्रुघ्नसहितस्तदा ॥ ४ ॥
दृष्ट्वैव भ्रातरं तं वै केकयेभ्योऽभ्युपागतं ।
भरतं चाभ्यनुज्ञातं श्रुत्वा राजीवलोचनं ॥ ५ ॥
अभवत् केकयी तत्र मुदा परमया युता ।
चिन्तयामास च तदा गमनं भरतस्य सा ॥ ६ ॥
ततोऽभ्यनुज्ञाप्य नृपं सुतं सुरसुतोपमं ।
प्रेषयामास कैकेयी गृहात् पितृगृहं स्वकं ॥ ७ ॥
अमात्यैर्बलमुख्यैश्च रथैश्च बहुभिर्युतं ।
पदात्यश्वप्रयुक्तेन बलेन महता वृतं ॥ ८ ॥
सोऽभिवाद्य महात्मानं पितरं देववर्चसं ।
कृताञ्जलिरुवाचेदमनुज्ञा दीयतामिति ॥ ९ ॥

तं पिता मूर्ध्न्युपाघ्राय परिष्वज्य च पीडितं ।
सिंहखेलगतिं वाक्यमुवाच जनसंसदि ॥ १० ॥
गच्छ सौम्य शिवेन त्वं मातामहगृहं प्रति ।
संदेशं शृणु मे वत्स तं च कुर्याः समाहितः ॥ ११ ॥
इतो मातामहकुलं शत्रुघ्नसहितो व्रज ।
शत्रुघ्नो ह्यनुरक्तस्त्वां भक्तिमांश्चाप्यनुव्रतः ॥ १२ ॥
तवापि च प्रियतरः प्राणेभ्योऽपि परंतप ।
आत्मवत् स त्वया भ्राता द्रष्टव्यो रक्ष्य एव च ॥ १३ ॥
गुणपाशशतैर्बद्धस्त्वया हृदि परंतप ।
न जहाति यथा पुत्र शत्रुघ्नस्त्वां तथा कुरु ॥ १४ ॥
मातुलश्चाप्ययं पुत्र शुश्रूष्योऽहमिव त्वया ।
आर्यकं चापि मन्येथाः पूज्यं दैवतवत् सदा ॥ १५ ॥
विनीतः शीलवांश्चैव भवेः पुत्रानहंकृतः ।
ब्राह्मणान् श्रुतवृत्ताढ्यान् सेवेथाश्च प्रयत्नवान् ॥ १६ ॥
प्रसाद्य चैतान् यत्नेन पृच्छेस्त्वं हितमात्मनः ।
तच्चाप्यमृतवद्ग्राह्यं त्वया तेषां हितं वचः ॥ १७ ॥
ब्राह्मणा हि महात्मानः श्रियो मूलं भवस्य च ।
स्युश्च सर्वकार्येषु ब्राह्मणा ब्रह्मवादिनः ॥ १८ ॥
देवाः पुत्र भवार्थं हि प्रजानां विबुधोत्तमैः
प्रेषिता मानुषं लोकं भूमिदेवा द्विजातयः ॥ १९ ॥

तेषां सकाशाद्वेदांश्च धर्मशास्त्रं तथाव्ययं ।
नीतिशास्त्रं च विपुलं धनुर्वेदं च धारय ॥ २० ॥
अश्वपृष्ठे रथे नागे व्यायामं कुरु नित्यशः ।
गन्धर्वविद्यासु तथा पारगो भव पुत्रक ॥ २१ ॥
नानाशिल्पकलाज्ञश्च भवेरपि परंतप ।
क्षणमप्यासितं तात वृथैव न हितं तव ॥ २२ ॥
कुशलावेदिनो दूता नित्यं प्रेष्याश्च ते मम ।
ह्लादितं हि मनो मे स्यात् कुशलश्रवणात् तव ॥ २३ ॥
एवमुक्त्वा स नृपतिर्भरतं साश्रुलोचनः ।
वाष्पगद्गदया वाचा गच्छ पुत्रेत्यभाषत ॥ २४ ॥
आपृच्छ्यैवं स पितरं रामं चामिततेजसं ।
मातृश्चाभिप्रणम्यादौ शत्रुघ्नसहितो ययौ ॥ २५ ॥
बलेन महता वीरश्चतुरङ्गेन संवृतः ।
तथानुगम्यमानश्च सर्वैः पुरनिवासिभिः ॥ २६ ॥
भ्रातृस्नेहाच्च रामेण लक्ष्मणेन च वीर्यवान् ।
गत्वा पुरस्कृतो धीमांस्ततो गव्यूतिमात्रकं ॥ २७ ॥
अवरुह्य स्वकाद्यानाद्भरतः कैकयीसुतः ।
शत्रुघ्नसहितः पादौ रामस्य शिरसा ययौ ॥ २८ ॥
तौ पादयोर्निपतितौ शत्रुघ्नभरतावुभौ ।
दोर्भ्यामुत्थाप्य रामोऽपि परिष्वज्येदमब्रवीत् ॥ २९ ॥

कैकेयीमातरिह मां स्मरेस्त्वं सहलक्ष्मणं ।
शत्रुघ्नसहितं च त्वां स्मरिष्यामि सलक्ष्मणः ॥ ३० ॥
इत्युक्तो भरतो रामं प्रणिपत्याभिवाद्य च ।
लक्ष्मणं च परिष्वज्य शत्रुघ्नसहितो ययौ ॥ ३१ ॥
अनुगम्यमानो बहुभिः सुहृद्भिः प्रियवादिभिः ।
अनुरक्तैस्तथा चान्यैरपरित्यागिभिः प्रियैः ॥ ३२ ॥
निवर्त्य तु जनान् मान्यांस्ततः शीघ्रतरं ययौ ।
श्रीमान् मातामहपुरं द्रष्टुं त्वरितमानसः ॥ ३३ ॥
सुहृद्भिः सह मार्गेषु व्याहरन् प्रियवादिभिः ।
अहोभिर्गणितैः कैश्चिदश्रान्तबलवाहनः ॥ ३४ ॥
वनानि सरितः शैलानतीत्य सुमनोहरान् ।
आससाद पुरं राज्ञो रम्यं राजगृहं विभुः ॥ ३५ ॥
अभ्यासस्थस्ततो राज्ञे दूतं मातामहाय सः ।
प्रेषयामास भरतः प्राप्तोऽस्मीत्याप्तकारिणं ॥ ३६ ॥
श्रुत्वा च दूतवचनं स राजा भृशहर्षितः ।
प्रवेशयामास पुरं भरतं परमार्चितं ॥ ३७ ॥
आहार्यसिकताकीर्णं पुष्पोत्करविभूषितं ।
राजमार्गं कारयित्वा जलेन सुसमुक्षितं ॥ ३८ ॥
विन्यस्तपूर्णकलसं वनमालाविभूषितं ।
समुच्छ्रितपताकं च धूपगन्धाधिवासितं ॥ ३९ ॥

ततः प्रवेशयामासुर्भरतं पुरवासिनः ।
सर्वतूर्यस्वनैश्चाराद्वाद्यमानैश्च नन्दितं ॥ ४० ॥
वेश्याभिर्वारमुख्याभिर्वाद्यानुगतमुल्वणं ।
नृत्यन्तीभिः पुरस्तात् तु पुरं तत् प्रविवेश सः ॥ ४१ ॥
वृद्धं मातामहं तत्र ददर्शाभिननन्द च ।
राज्ञा तेन परिष्वक्तः पृष्टश्चानामयं ततः ॥ ४२ ॥
प्रविश्यान्तःपुरं तत्र प्राणमद्राजयोषितः ।
श्रीमद्राजगृहं प्राप्य तद्वृद्धजनसंकुलं ॥ ४३ ॥
स वै मातामहगृहे सर्वकामैः सुपूजितः ।
उवास सुसुखं तत्र भरतः श्रीमतां वरः ॥ ४४ ॥
गते तु भरते रामो लक्ष्मणेन सहायवान् ।
पितरं पूजयामास भक्त्या दैवतवत् सदा ॥ ४५ ॥
श्रुत्वा हि पितुराज्ञां स कृत्वा चैव सदोद्यतः ।
पौराणामपि कार्याणि चकार तदनन्तरं ॥ ४६ ॥
मातॄणां मातृकार्याणि चकार च महायशाः ।
गुरूणां चैव सर्वेषां गुरुकार्याणि यत्नवान् ॥ ४७ ॥
तस्य चाप्यभवत् प्रीतः स राजा गुरवस्तथा ।
शीलवृत्तेन रामस्य सर्वे च पुरवासिनः ॥ ४८ ॥

इत्यार्षे रामायणे आदिकाण्डे भरतस्य
मातामहगृहप्रवेशो नाम नवसप्ततितमः सर्गः ॥

LXXX.

कदाचिद्भरतः श्रीमान् वृद्धं मातामहं नृपं ।
अभिवाद्य महात्मानमिदं वचनमब्रवीत् ॥ १ ॥
आचार्यानुपसेवेयं प्रदिष्टान् भवता हितान् ।
धर्मार्थज्ञानकुशलान् लेख्यसंख्याविदस्तथा ॥ २ ॥
इष्वस्त्रकुशलांश्चैव नीतिशास्त्रविशारदान् ।
हस्त्यश्वरथयानेषु तथैव परिनिष्ठितान् ॥ ३ ॥
गन्धर्वविद्याकुशलान् नानाशिल्पविदस्तथा ।
तथान्यान् वेदवेदाङ्गन्यायशास्त्रार्थपारगान् ॥ ४ ॥
उपसेवितुमिच्छामि श्रेयोऽर्थी दृढमात्मनः ।
भवतानुमतो राजन् प्रदेष्टुं तान् ममार्हसि ॥ ५ ॥
श्रुत्वैव नृपतिर्वाक्यं केकयो भरतस्य सः ।
व्यादिदेश प्रहृष्टात्मा तस्याचार्यान् विपश्चितः ॥ ६ ॥
तानुपास्य च यत्नेन भरतः कैकेयीसुतः ।
वेदवेदाङ्गशास्त्राणां ग्रहणे तत्परोऽभवत् ॥ ७ ॥
निवेद्य शिष्यमात्मानं गुरूणां विनयान्वितः ।
जग्राह वेदवेदाङ्गशास्त्राणि गुणवृद्धये ॥ ८ ॥
आनुपूर्व्या हि शास्त्राणामागमे भृशमुद्यतः ।
विद्यानां च सशिल्पानां शत्रुघ्नसहितस्तदा ॥ ९ ॥

जगाम स महातेजा नानाचार्यपरम्परां ।
शिक्षमाणः प्रयत्नेन विनयाचारयन्त्रितः ॥ १० ॥
दानमानपुरस्कारैराचार्यान् प्रत्यपूजयत् ।
शुश्रूषापरमो भूत्वा विनयं परमाप सः ॥ ११ ॥
ज्ञानाभ्यासरतस्यैवं भरतस्य महात्मनः ।
जगाम सुमहान् कालो वसतस्तत्र धीमतः ॥ १२ ॥
विविधेषु यदा निष्ठां ज्ञानेषूपजगाम सः ।
तदास्य बुद्धिः संजज्ञे तत्त्वार्थाधिगमे पुनः ॥ १३ ॥
विद्याशीलवयोज्ञानवृद्धेभ्यो विदितात्मनः ।
अन्येभ्यश्चापि तत्त्वार्थवेदिभ्यः संनिकर्षतः ॥ १४ ॥
यो यो वेत्ति हि तत्त्वार्थं छिन्नधर्मार्थसंशयः ।
धर्मार्थकाममोक्षाणां सिषेवे तं तमेव हि ॥ १५ ॥
नानाज्ञानकथाभिर्हि रेमे स विजहार च ।
भरतो ज्ञानतत्त्वार्थवेदने स तथोद्यतः ॥ १६ ॥
स यदा ज्ञानविज्ञानविनयेषु कृतागमं ।
आत्मानं भरतो मेने छिन्नधर्मार्थसंशयः ॥ १७ ॥
तदास्य बुद्धिः संजज्ञे दूतं प्रेषयितुं पितुः ।
अथाहूयाब्रवीद्वृद्धं सुहृदं ब्रह्मवादिनं ॥ १८ ॥
अयोध्यां गच्छ भद्रं ते त्वरितो जवनैर्हयैः ।
पितरं तत्र कौशल्यां ब्रूयास्त्वं मातरं च मे ॥ १९ ॥

मातामहकुले चापि यथा वर्तामहे वयं ।
तथा पूर्वं भवान् शंसेत् पितुर्मातुश्च मेऽग्रतः ॥ २० ॥
रामश्चोपेत्य विज्ञाप्यो मामुद्दिश्य सगौरवं ।
भृत्यस्ते भरतः पादौ मूर्ध्नाभ्यर्च्य प्रसाद्य च ॥ २१ ॥
कुशलानामयं स्निग्धं पृच्छतीति समागमे ।
लक्ष्मणश्च परिष्वज्य प्रष्टव्यः कुशलं त्वया ॥ २२ ॥
ब्रूयाश्च मातरं मे त्वं कौशल्यामभिवादनं ।
सुमित्रामपि च ब्रूया वैदेहीं चाभिवादनं ॥ २३ ॥
स तेनैवं समादिष्टो भरतेन महात्मना ।
दूतः शीघ्रहयो भूत्वा प्रययौ यत्र सा पुरी ॥ २४ ॥
अयोध्या सुभृशं रम्या मनुराजर्षिनिर्मिता ।
यां स राजीवताम्राक्षो राजा दशरथोऽन्वशात् ॥ २५ ॥
प्राप्तवानचिरेणैव स तां भरतशासनात् ।
न्यवेदयत तद्राज्ञे मातृभ्योऽथ द्विजस्तथा ॥ २६ ॥
कृतकृत्योऽथ राजेन्द्र भरतः सत्यविक्रमः ।
धनुर्वेदे च वेदे च नीतिशास्त्रेषु पारगः ॥ २७ ॥
अर्थशास्त्रेषु कुशलो व्यायामेषु तथैव च ।
हस्तिशिक्षासु निष्णातो रथशिक्षासु निष्ठितः ॥ २८ ॥
आलेख्ये चैव लेख्ये च लङ्घने प्लवने तथा ।
ज्योतिर्गीतेषु निष्णातस्तव वाक्येन चोदितः ॥ २९ ॥

एवंविधानि कर्माणि कृतवान् सुबहून्यपि ।
ततो हि भरतो राजंस्त्वत्सकाशादुपागतः ॥ ३० ॥
श्रुत्वा राजा प्रहृष्टोऽभूद्दूतस्य वचनं प्रियं ।
कौशल्याद्याश्च देव्यस्तास्तथोभौ रामलक्ष्मणौ ॥ ३१ ॥
प्रतिसंदिश्य तं राजा दूतं सत्कृत्य चार्हतः ।
प्रेषयामास नृपतिर्भरतस्य पुनस्तदा ॥ ३२ ॥

इत्यार्षे रामायणे महर्षिवाल्मीकीये आदिकाव्ये
चतुर्विंशतिसाहस्र्यां संहितायाम् आदिकाण्डे
भरतदूतागमनं नाम अशीतितमः सर्गः ॥

आदिकाण्डं समाप्तं ॥

अयोध्याकाण्डं

विद्वानुदारो मेधावी पूर्वभाषी प्रियंवदः ।
वीर्यवान् न च वीर्येण महता स्वेन गर्वितः ॥ ७ ॥
अनावृतकथो धीमान् वृद्धानां प्रतिपूजकः ।
भक्तानुरक्तप्रकृतिः प्रजानामनुरञ्जकः ॥ ८ ॥
सानुक्रोशो जितक्रोधो ब्राह्मणप्रतिपूजकः ।
दीनानुकम्पको धीमान् प्रियवागनसूयकः ॥ ९ ॥
कुलक्रमागतायाश्च राज्यप्राप्तेर्गतस्पृहः ।
राज्यलाभादपि परं मेने विद्यागमं परं ॥ १० ॥
दयावान् सर्वभूतेषु शरण्यः शरणैषिणां ।
दाताभिगोप्ता साधूनां शरणागतवत्सलः ॥ ११ ॥
कृतप्रत्युपकारी च कृतज्ञः सत्यसंगरः ।
गुणज्ञो गुणवांश्चैव वश्यात्मा दृढनिश्चयः ॥ १२ ॥
अदीर्घसूत्रो दक्षश्च क्रियासु प्रतिपत्तिमान् ।
सुखाय सर्वसुहृदामर्थग्राही प्रियंवदः ॥ १३ ॥
प्राणान् जह्याच्छ्रियं चैव स्फीतामपि महायशाः ।
अपिवा दयितान् भोगान् न तु सत्यं कदाचन ॥ १४ ॥
ऋजुर्वदान्यः प्रियकृद्विनीतः शीलवान् मृदुः ।
महासत्त्वो महोत्साहो महात्मा गुणवत्तमः ॥ १५ ॥
तेजस्वी च क्षमावांश्च सोमवत् प्रियदर्शनः ।
दुर्धर्षः समरेऽरीणां शरद्भानुरिवामलः ॥ १६ ॥

एभिर्गुणगणैर्युक्तमन्यैश्चानुपमद्युतिं ।
दृष्ट्वा दशरथो रामं गुणाकरमरिंदमं ॥ १७ ॥
चिन्तयामास सततं तद्गतेनान्तरात्मना ।
यौवराज्ये सुतं राममभिषिञ्चेयमित्युत ॥ १८ ॥
एवं हृदि सदा तस्य बुद्धिर्विपरिवर्तते ।
अभिषिक्तं कदा रामं पश्येयमिति धीमतः ॥ १९ ॥
पात्रभूतोऽस्य राज्यस्य सर्वभूतानुरञ्जकः ।
मत्तः प्रियतरो रामः प्रजानां स्वगुणैर्विभुः ॥ २० ॥
पराक्रमे शक्रसमो बृहस्पतिसमो मतौ ।
महीधरसमः स्थैर्ये मत्तश्च गुणवत्तरः ॥ २१ ॥
महीमहमिमां कृत्स्नामधितिष्ठन् तमात्मजं ।
अनेन वयसा दृष्ट्वा सुखं स्वर्गमवाप्नुयां ॥ २२ ॥
तं तस्य भावं भावज्ञा विज्ञाय सुधियो जनाः ।
गुरवो मन्त्रिणश्चैव पौरजानपदास्तथा ॥ २३ ॥
समेत्य मन्त्रयामासुर्मन्त्रयित्वा च निश्चयं ।
ऊचैः समन्ततः सर्वे वृद्धं दशरथं नृपं ॥ २४ ॥
अनेकवर्षशतिको वृद्धोऽस्यद्य नरेश्वर ।
स रामं यौवराज्ये त्वमभिषेक्तुमिहार्हसि ॥ २५ ॥
इति तद्वचनं श्रुत्वा तेषां स्वहृदयेप्सितं ।
अनिच्छन्निव जिज्ञासुर्जनांस्तान् प्रत्युवाच सः ॥ २६ ॥

कथं नु मयि धर्मेण पृथिवीमनुशासति ।
भवन्तः कर्तुमिच्छन्ति युवराजं ममात्मजं ॥ २७ ॥
ते तमूचुर्महात्मानं पौरजानपदाः पुनः ।
बहवो नृप कल्याणा गुणाः पुत्रस्य सन्ति ते ॥ २८ ॥
मृदुश्च देवसत्त्वश्च साध्वाचारोऽनसूयकः ।
प्रियकृत् प्रियवादी च प्रजानां पितृमातृवत् ॥ २९ ॥
बहुश्रुतानां वृद्धानां ब्राह्मणानामुपासिता ।
नियन्ता दुर्विनीतानां विनीतप्रतिपूजकः ॥ ३० ॥
न ज्ञातिषु न पौरेषु न च जानपदेष्वपि ।
जनोऽस्त्यगुणवादी यो रामस्य भुवि भूपते ॥ ३१ ॥
सवृद्धबालाः पौरास्ते तथा जानपदा जनाः ।
गुणानुरक्ता रामस्य राममिच्छन्ति भूमिपं ॥ ३२ ॥
गुणकीर्त्या नरपते प्रजा रामेण रञ्जिताः ।
धर्मज्ञेन वदान्येन विनीतेन महात्मना ॥ ३३ ॥
कृती रामो धनुर्वेदे दिव्यास्त्रज्ञश्च संयुगे ।
अमोघास्त्रो दूरपाती चित्रयोधी दृढायुधः ॥ ३४ ॥
यं यं व्रजति संग्रामं राजन् रामस्तवाज्ञया ।
ततस्ततो विजित्यारीन् विजयी विनिवर्तते ॥ ३५ ॥
जित्वापि चारिसैन्यानि यदायं विनिवर्तते ।
तदापि प्रश्रिततरो भूत्वा नः पूजयत्युत ॥ ३६ ॥

प्रवासात् पुनरागत्य कुञ्जरेण रथेन वा ।
राजमार्गेऽपि दृष्ट्वा नः स्थित्वा पृच्छत्यनामयं ॥ ३७ ॥
अग्निहोत्रेषु दारेषु शिष्यप्रेष्यजनेषु च ।
सानुकम्पः सदा रामः पृच्छत्यस्माननामयं ॥ ३८ ॥
अभ्यन्तरे च वाह्ये च पौरजानपदे तथा ।
स्त्रियो वृद्धास्तरुण्यश्च देवान् राजन् गृहे गृहे ॥ ३९ ॥
रामस्यैवाभियाचन्ते यौवराज्येऽभिषेचनं ।
तासामायाचितं राजंस्त्वत्प्रसादात् प्रसिध्यतां ॥ ४० ॥
राममिन्दीवरश्यामं प्रजानामनुकम्पकं ।
पश्येम युवराजं तमभिषिक्तं त्वदाज्ञया ॥ ४१ ॥

स राजवर्यात्मजमात्मवन्तं
गुणाभिरामं नरलोककान्तं ।
रामं नृदेवार्हसि लोकनाथम्
इहाभिषेक्तुं युवराजमुर्व्यां ॥ ४२ ॥

इत्यार्षे रामायणे अयोध्याकाण्डे रामाभिषेकव्यवसायो
नाम प्रथमः सर्गः ॥

II.

तेषामञ्जलिमालास्ताः प्रतिगृह्य समन्ततः ।
हृष्टो दशरथो राजा प्रोवाचेदं वचस्तदा ॥ १ ॥
धन्योऽस्म्यनुगृहीतोऽस्मि भवद्भिः प्रियवादिभिः ।
यन्मे ज्येष्ठं प्रियं पुत्रं युवराजमिहेच्छथ ॥ २ ॥
इति राजानुभाष्यैतानेवं भूयोऽब्रवीद्वचः ।
वशिष्ठं वामदेवं च तेषामेवोपशृण्वतां ॥ ३ ॥
चैत्रः श्रीमानयं मासः पुण्यः पुष्पितकाननः ।
रामाय यौवराज्यं मे दातुमत्रैव रोचते ॥ ४ ॥
आभिषेचनिकं द्रव्यं भवन्तो ज्ञापयन्तु मां ।
यन्मया चोपहर्तव्यं रामराज्याभिपत्तये ॥ ५ ॥
तौ तथेति प्रतिज्ञाय नृपतेर्वचनात् तदा ।
लेख्यां चक्रतुर्द्रव्यं भूयश्चैव ननन्दतुः ॥ ६ ॥
कृतमित्येव चाब्रूतामभिगम्य नराधिपं ।
सुप्रीतमनसौ प्रीतं हर्षयन्तौ पुनर्नृपं ॥ ७ ॥
ततः सुमन्त्रमाहूय राजा दशरथोऽब्रवीत् ।
रामः कृतात्मा भवता शीघ्रमानीयतामिति ॥ ८ ॥
स तथेति प्रतिज्ञाय सुमन्त्रो राजशासनात् ।
रामं तत्रानिनायाथ रथेन रथिनां वरः ॥ ९ ॥

अथ तत्र समासीनास्तदा दशरथं नृपं ।
प्राच्योदीच्याः प्रतीच्याश्च दाक्षिणात्याश्च भूमिपाः ॥ १० ॥
म्लेच्छाश्च यवनाश्चैव शकाः शैलान्तवासिनः ।
उपासां चक्रिरे सर्वे ते देवा इव वासवं ॥ ११ ॥
तेषां मध्ये स राजर्षिर्मरुतामिव वासवः ।
प्रासादस्थो रथस्थं तं ददर्शायान्तमात्मजं ॥ १२ ॥
गन्धर्वराजप्रतिमं लोके विश्रुतपौरुषं ।
दीर्घबाहुं महासत्त्वं मत्तमातङ्गगामिनं ॥ १३ ॥
चन्द्रकान्ताननं राममतीव प्रियदर्शनं ।
रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणं ॥ १४ ॥
घर्माभितप्ताः पर्जन्यं ह्लादयन्तमिव प्रजाः ।
नातृप्यत तमायान्तमीक्षमाणो नराधिपः ॥ १५ ॥
अवतार्य सुमन्त्रस्तु राघवं स्यन्दनोत्तमात् ।
पितुः समीपं गच्छन्तं प्राञ्जलिः पृष्ठतोऽन्वगात् ॥ १६ ॥
स तु कैलासशृङ्गाभं प्रासादं नरपुंगवः ।
आरुरोह नृपं द्रष्टुं सह सूतेन राघवः ॥ १७ ॥
स प्राञ्जलिरभिप्रेत्य प्रणतः पितुरन्तिकं ।
नाम संश्रावयन् रामो ववन्दे चरणौ पितुः ॥ १८ ॥
तं दृष्ट्वा प्रणतं पार्श्वे कृताञ्जलिपुटं नृपः ।
गृहीत्वाञ्जलिमाकृष्य सस्वजे प्रियमात्मजं ॥ १९ ॥

तस्मै चात्युचितं श्रीमन्मणिकाञ्चनभूषितं ।
दिदेश राजा रुचिरं रामायानुपमासनं ॥ २० ॥
तदासनवरं प्राप्य व्यदीपयत राघवः ।
स्वयैव प्रभया मेरुमुदये विमलो रविः ॥ २१ ॥
तेन विभ्राजता तत्र सा साभातिव्यराजत ।
विमलग्रहनक्षत्रा शारदी द्यौरिवेन्दुना ॥ २२ ॥
तं स पश्यन् नरपतिस्तुतोष प्रियमात्मजं ।
अलंकृतमिवात्मानमादर्शतलमास्थितं ॥ २३ ॥
स तं सस्मितमाभाष्य पुत्रं पुत्रवतां वरः ।
उवाचेदं वचो राजा देवेन्द्रमिव कश्यपः ॥ २४ ॥
ज्येष्ठायामसि मे पत्न्यां सदृश्यां सदृशः सुतः ।
उत्पन्नस्त्वं गुणश्रेष्ठो मम रामात्मजः प्रियः ॥ २५ ॥
त्वयायत्ताः प्रजाश्चेमाः स्वगुणैरनुरञ्जिताः ।
तस्मात् त्वं पुष्ययोगेन यौवराज्यमवाप्नुहि ॥ २६ ॥
कामं च त्वं प्रकृत्यैव विनीतो गुणवानपि ।
गुणवत् त्वयि च स्नेहात् पुत्र वक्ष्यामि ते हितं ॥ २७ ॥
भूयो विनयमास्थाय भव नित्यं जितेन्द्रियः ।
कामक्रोधसमुत्थानि त्यजेथा व्यसनानि च ॥ २८ ॥
परोक्षयानिशं बुद्ध्या राम प्रत्यक्षया तथा ।
परां च प्रकृतिं दृष्ट्वा परिपाल्याः प्रजास्त्वया ॥ २९ ॥

सत्परो निरहंकारो भूत्वा राम गुणान्वितः ।
ततः पालय पुत्रेमाः प्रजाः पुत्रानिवौरसान् ॥ ३० ॥
योधानमात्यान् हस्त्यश्वं कोषं चावेक्ष्य यत्नवान् ।
मित्राण्यमित्रान् मध्यस्थानुदासीनांश्च राघव ॥ ३१ ॥
तुष्टानुरक्तप्रकृतिर्यः पालयति मेदिनीं ।
तस्य नन्दन्ति मित्राणि लब्धामृतमिवामराः ॥ ३२ ॥
तस्मात् पुत्र त्वमात्मानं नियम्यैवं समाचर ।
इति राज्ञो वचः श्रुत्वा नराः प्रियनिवेदिनः ॥ ३३ ॥
त्वरिताः शीघ्रमभ्येत्य कौशल्यायै न्यवेदयन् ।
सा हिरण्यं च गाश्चैव रत्नानि विविधानि च ॥ ३४ ॥
व्यादिदेश प्रियाख्येभ्यः कौशल्या प्रमदोत्तमा ।
अथाभिवाद्य राजानं रथमारुह्य राघवः ।
ययौ स्वं द्युतिमान् वेश्म जनौघैः परिवारितः ॥ ३५ ॥

ते चापि पौरा नृपतेर्वचस्तच्
श्रुत्वा ततो लाभमिवेष्टमाप्य ।
नरेन्द्रमामन्त्र्य गृहाणि गत्वा
देवान् समानर्चुरतीवहृष्टाः ॥ ३६ ॥

इत्यार्षे रामायणे अयोध्याकाण्डे दशरथानुशासनं
नाम द्वितीयः सर्गः ॥

III.

गतेष्वथ नृपो भूयः पौरेषु सह मन्त्रिभिः ।
मन्त्रयित्वा ततश्चक्रे निश्चयज्ञः स निश्चयं ॥ १ ॥
श्व एव पुष्यो भविता श्वो ऽभिषिच्यतां सुतो मे ।
रामो राजीवताम्राक्षो यौवराज्य इति प्रभुः ॥ २ ॥
अथान्तर्गृहमाविश्य राजा दशरथस्तदा ।
सूतमाज्ञापयामास रामं पुनरिहानय ॥ ३ ॥
प्रतिगृह्य स तद्वाक्यं सूतः पुनरुपाययौ ।
रामस्य भवनं शीघ्रं राममानयितुं पुनः ॥ ४ ॥
द्वास्थेनावेदितं तस्य रामायागमनं पुनः ।
श्रुत्वैव चापि भूयस्तं रामः शङ्कान्वितो ऽभवत् ॥ ५ ॥
प्रवेश्य चैनं त्वरितो रामो वचनमब्रवीत् ।
यदागमनकृत्यं ते भूयस्तद्ब्रूह्यशेषतः ॥ ६ ॥
तेन चावेदितं तस्य रामस्यागमनं पुनः ।
द्रष्टुमिच्छति राजा त्वां शीघ्रमागन्तुमर्हसि ॥ ७ ॥
इति सूतवचः श्रुत्वा रामो ऽपि त्वरयान्वितः ।
प्रययौ राजभवनं पुनर्द्रष्टुं नरर्षभं ॥ ८ ॥
स श्रुत्वा समनुप्राप्तं रामं दशरथो नृपः ।
तूर्णं प्रावेशयामास विवक्षुः प्रियमुत्तमं ॥ ९ ॥

प्रविशन्नेव च श्रीमान् राघवो भवनं पितुः ।
ददर्श पितरं दूरात् प्रणिपत्य कृताञ्जलिः ॥१०॥
प्रणमानं तमुत्थाप्य तं परिष्वज्य भूमिपः ।
आदिश्य चास्मै रुचिरमासनं पुनरब्रवीत् ॥११॥
राम वृद्धोऽस्मि दीर्घायुर्भुक्ता भोगा यथेप्सिताः ।
अन्नवद्भिः क्रतुशतैस्तथेष्टं भूरिदक्षिणैः ॥१२॥
जातमिष्टमपत्यं मे त्वमप्यनुपमं भुवि ।
दत्तमिष्टमधीतं च मया पुरुषसत्तम ॥१३॥
अनुभूतानि सर्वाणि चिरं राज्यसुखानि च ।
देवर्षिपितृविप्राणामनृणोऽस्मि तथात्मनः ॥१४॥
न किञ्चिन्मम कर्तव्यं तवान्यत्राभिषेचनात् ।
अतस्त्वां यदहं ब्रूयां तन्मे त्वं कर्तुमर्हसि ॥१५॥
अद्य प्रकृतयः सर्वास्त्वामिच्छन्ति नराधिपं ।
अतस्त्वां यौवराज्येऽहमभिषेक्ष्यामि पुत्रक ॥१६॥
रात्र्यन्ते च तथा राम स्वप्नान् पश्यामि दारुणान् ।
सनिर्घाता महोल्काश्च पतिता हि महास्वनाः ॥१७॥
उपसृष्टं च मे राम नक्षत्रं दारुणैर्ग्रहैः ।
आवेदयन्ति दैवज्ञाः सूर्याङ्गारकराहुभिः ॥१८॥
प्रायशो हि निमित्तानामीदृशानां समुद्भवे ।
राजा वा मृत्युमाप्नोति राष्ट्रं वा नाशमृच्छति ॥१९॥

तद्यावदेव मे चेतो न विमुह्यति राघव ।
तावदेवाभिषिञ्चस्व त्वां चला हि प्राणिनां गतिः ॥ २० ॥
अद्य चन्द्रोऽभ्युपगतः पुष्यात् पूर्वं पुनर्वसुं ।
श्वः पुष्ययोगं नियतं वक्ष्यन्ते दैवचिन्तकाः ॥ २१ ॥
तत्र त्वमभिषिच्यस्व मनस्त्वरयतीव मां ।
श्वस्त्वाहमभिषेक्तास्मि यौवराज्ये परंतप ॥ २२ ॥
तस्मात् त्वयाद्य व्रतिना निशेयं नियतात्मना ।
सह वध्वोपवस्तव्या दर्भसंस्तरशायिना ॥ २३ ॥
सुहृदस्त्वप्रमत्तास्त्वां रक्षन्त्वद्य प्रयत्नतः ।
भवन्ति बहुविघ्नानि कार्याण्येवंविधानि हि ॥ २४ ॥
निर्वासितश्च भरतो यावदेव पुरादितः ।
तावदेवाभिषेकस्ते प्राप्तकालो मतो मम ॥ २५ ॥
कामं खलु सतां वृत्ते भ्राता ते भरतः स्थितः ।
ज्येष्ठानुवर्ती धर्मात्मा सानुक्रोशो जितेन्द्रियः ॥ २६ ॥
किंतु चित्तं मनुष्याणां जानाम्येव यथा चलं ।
सतां च धर्मकृत्यानि कृतशोभानि राघव ॥ २७ ॥
इत्युक्ता सोऽभ्यनुज्ञातः श्वो भाविन्यभिषेचने ।
व्रजेति रामः पितरमभिवाद्याभ्ययाद्गृहं ॥ २८ ॥
प्रविश्य चात्मनो वेश्म राज्ञादिष्टेऽभिषेचने ।
तस्मिन् क्षणे विनिर्गत्य मातुरन्तःपुरं ययौ ॥ २९ ॥

तत्र तां प्रणतामेव मातरं क्षौमवाससं ।
ददर्श याचमानां तु देवतावेश्मनि श्रियं ॥ ३० ॥
प्रागेव चागता तत्र सुमित्रा लक्ष्मणस्तथा ।
सीता च नन्दिता श्रुत्वा प्रियं रामाभिषेचनं ॥ ३१ ॥
तस्मिन् काले तु कौशल्या तस्थावामीलितेक्षणा ।
सुमित्रयोपास्यमाना सीतया लक्ष्मणेन च ॥ ३२ ॥
श्रुत्वा पुष्येण पुत्रस्य यौवराज्याभिषेचनं ।
प्राणायामेन पुरुषं ध्यायन्ती सा जनार्दनं ॥ ३३ ॥
तथा संयमितामेव सोऽभिगम्याभिवाद्य च ।
उवाच मातरं रामो हर्षयिष्यन्निदं वचः ॥ ३४ ॥
अम्ब पित्रा नियुक्तोऽस्मि प्रजापालनकर्मणि ।
भविता श्वोऽभिषेको मे यथा वै शासनं पितुः ॥ ३५ ॥
सीतया चोपवस्तव्या रजनीयं मया सह ।
एवमृत्विगुपाध्यायैः सह मामुक्तवान् नृपः ॥ ३६ ॥
यानि चात्यन्तयोग्यानि श्वो भाविन्यभिषेचने ।
तानि मे मङ्गलान्यद्य वैदेह्याश्चापि कारय ॥ ३७ ॥
एतच्छ्रुत्वा तु कौशल्या चिरकालाभिकाङ्क्षितं ।
हर्षवाष्पाकुलं वाक्यमिदं राममभाषत ॥ ३८ ॥
वत्स राम चिरं जीव हतास्ते परिपन्थिनः ।
ज्ञातीन् मे त्वं श्रिया युक्तः सुमित्रायाश्च नन्दय ॥ ३९ ॥

कल्याणे वरनक्षत्रे मयि जातोऽसि पुत्रक ।
येन त्वया दशरथो गुणैराराधितः पिता ॥ ४० ॥
अमोघा वत मे भक्तिः पुरुषे पुष्करेक्षणे ।
सेयमिक्ष्वाकुराजर्षेः श्रीस्त्वामद्य श्रयिष्यति ॥ ४१ ॥
इत्येवमुक्तो मात्रेदं रामो लक्ष्मणमब्रवीत् ।
प्राञ्जलिं प्रह्वमासीनमभिवीक्ष्य स्मितान्वितः ॥ ४२ ॥
लक्ष्मणेमां मया सार्धं प्रशाधि त्वं वसुंधरां ।
द्वितीयो मेऽन्तरात्मा त्वं त्वामियं श्रीरुपस्थिता ॥ ४३ ॥
सौमित्रे भुङ्क्ष्व भोगांस्त्वमिष्टान् राज्यफलानि च ।
जीवितं च हि राज्यं च त्वदर्थमभिकामये ॥ ४४ ॥
इत्युक्त्वा लक्ष्मणं रामो मातरावभिवाद्य च ।
अभ्यनुज्ञाप्य सीतां च जगाम स्वं निवेशनं ॥ ४५ ॥

इत्यार्षे रामायणे अयोध्याकाण्डे रामराज्योपनिमन्त्रणं
नाम तृतीयः सर्गः ॥

IV.

स चिन्तयानो नृपतिः श्वो भाविन्यभिषेचने ।
पुरोहितं समाहूय वशिष्ठमिदमब्रवीत् ॥ १ ॥
गच्छोपवासं काकुत्स्थं कारयाद्य तपोधन ।
श्रीयशोराज्यलाभाय वध्वा सह यतव्रतं ॥ २ ॥
तथेति च स राजानमुक्त्वा वेदविदां वरः ।
स्वयं वशिष्ठो भगवान् ययौ रामनिवेशनं ॥ ३ ॥
उपवासयितुं रामं मन्त्रविन्मन्त्रपारगः ।
ब्राह्मं रथवरं युक्तमास्थाय सुधृतव्रतः ॥ ४ ॥
स रामभवनं प्राप्य पाण्डुराभ्रचयोपमं ।
तिस्रः कक्ष्या रथेनैव विवेश मुनिसत्तमः ॥ ५ ॥
तमागतमृषिं रामस्त्वरमाणः ससंभ्रमः ।
मानयिष्यन् स मानार्हं निश्चक्राम निवेशनात् ॥ ६ ॥
अभ्येत्य त्वरमाणश्च रथाभ्यासं मनीषिणः ।
ततोऽवतारयामास परिगृह्य रथात् स्वयं ॥ ७ ॥
स चैनं प्रसृतं दृष्ट्वा प्रसंभाष्य प्रशस्य च ।
प्रियार्हं हर्षयन् राममित्युवाच पुरोहितः ॥ ८ ॥
प्रसन्नस्ते पिता राम यौवराज्यमवाप्स्यसि ।
उपवासं भवानद्य करोतु सह सीतया ॥ ९ ॥

प्रातस्त्वामभिषेक्ता हि यौवराज्ये नराधिपः ।
पिता दशरथः प्रीत्या ययातिं नहुषो यथा ॥ १० ॥
इत्युक्ता स तदा राममुपवासं यतव्रतं ।
मन्त्रवित् कारयामास वैदेह्या सहितं मुनिः ॥ ११ ॥
ततो यथावद्रामेण स राजगुरुरर्चितः ।
अभ्यनुज्ञाप्य काकुत्स्थं ययौ राजनिवेशनं ॥ १२ ॥
सुहृद्भिस्तत्र रामोऽपि सहासीनैः प्रियंवदैः ।
सभाजितो विवेशान्तस्ताननुज्ञाप्य सर्वशः ॥ १३ ॥
हृष्टनारीनरयुतं राजवेश्म तदा बभौ ।
यथा मत्तद्विजगणं प्रफुल्लनलिनं सरः ॥ १४ ॥
स रामभवनान्निर्यान्मुनिः कैलाससंनिभात् ।
सर्वतो ददृशे मार्गं वशिष्ठो जनसंकुलं ॥ १५ ॥
वृन्दवृन्दैरयोध्यायां राजमार्गः समन्ततः ।
बभूव चातिसंबाधो जनैर्जातकुतूहलैः ॥ १६ ॥
तदा हि नृत्यमानस्य हर्षोद्भूतोर्मिभिर्जलैः ।
बभूव राजमार्गस्य सागरस्येव निस्वनः ॥ १७ ॥
सिक्तसंमृष्टरथ्या हि सा राजपथमालिनी ।
आसीदयोध्या नगरी समुच्छ्रितवृहद्ध्वजा ॥ १८ ॥
तदा ह्ययोध्यानिलयः सस्त्रीबालजनो जनः ।
रामाभिषेकमाकाङ्क्षन्नाकाङ्क्षदुदयं रवेः ॥ १९ ॥

प्रजालंकारभूतं हि जनस्यानन्दवर्धनं ।
उत्सुकोऽभूज्जनो द्रष्टुं तमयोध्यामहोत्सवं ॥ २० ॥
एवं तु जनसंबाधं राजमार्गं पुरोहितः ।
गाहन्निव जनौघं तं तदा राजकुलं ययौ ॥ २१ ॥
सिताभ्रशिखरप्रख्यं प्रासादमधिरुह्य सः ।
समियाय नरेन्द्रेण शक्रेणेव बृहस्पतिः ॥ २२ ॥
तमागतमभिप्रेक्ष्य हित्वा राजासनं नृपः ।
पप्रच्छ स च तस्मै तत् कृतमित्यभ्यवेदयत् ॥ २३ ॥
तेन चैव तदा तुल्याः सहासीनाः सभासदः ।
आसनेभ्यः समुत्तस्थुः पूजयन्तः पुरोहितं ॥ २४ ॥
गुरुणा सोऽभ्यनुज्ञातो मनुजौघं विसृज्य तं ।
विवेशान्तःपुरं राजा सिंहो गिरिगुहामिव ॥ २५ ॥

तदत्युदग्रं प्रमदाजनाकुलं
महेन्द्रवेश्मप्रतिमं निवेशनं ।
स शोभयंश्चारु विवेश पार्थिवः
शशीव तारागणसंकुलं नभः ॥ २६ ॥

इत्यार्षे रामायणे अयोध्याकाण्डे
रामाभिषेकोपवासविधानं नाम चतुर्थः सर्गः ॥

V.

गते पुरोहिते रामः स्नातः प्रयतमानसः ।
सह पत्न्या विवेशाथ लक्ष्म्या नारायणो यथा ॥ १ ॥
प्रगृह्य शिरसा पात्रीं हविषो विधिवत् तदा ।
महते दैवतायाज्यं जुहाव ज्वलितेऽनले ॥ २ ॥
शेषं च हविषस्तस्य प्राश्याशास्यात्मनो हितं ।
ध्यायन् नारायणं देवं स्वास्तीर्णे कुशसंस्तरे ॥ ३ ॥
वाग्यतः सह वैदेह्या भूत्वा नियतमैथुनः ।
श्रीमत्यायतने विष्णोः शिश्ये नरवरात्मजः ॥ ४ ॥
एकयामावशिष्टायां रात्र्यां तु प्रतिबुध्य सः ।
अलंकारविधिं कृत्स्नं कारयामास वेश्मनः ॥ ५ ॥
ततः शृण्वन् शुभा वाचः सूतमागधवन्दिनां ।
पूर्वां संध्यामुपासीनो जजाप यतमानसः ॥ ६ ॥
तुष्टाव प्रयतश्चैव प्रणम्य मधुसूदनं ।
विमलक्षौमसंवीतो वाचयामास च द्विजान् ॥ ७ ॥
तेषां पुण्याहघोषोऽथ गम्भीरमधुरस्तदा ।
अयोध्यां पूरयामास तूर्यघोषविमिश्रितः ॥ ८ ॥

कृतोपवासं तु तदा वैदेह्या सह राघवं ।
अयोध्यानिलयः श्रुत्वा सर्वः प्रमुमुदे जनः ॥ ९ ॥
ततः पौरजनः सर्वः श्रुत्वा रामाभिषेचनं ।
प्रभातां रजनीं वीक्ष्य चक्रे शोभां परां पुनः ॥ १० ॥
सिताभ्रशिखराभेषु देवतायतनेषु च ।
चतुष्पथेषु रथ्यासु चैत्येष्वट्टालकेषु च ॥ ११ ॥
नानापण्यसमृद्धेषु बणिजामापणेषु च ।
कुटुम्बिनां समृद्धानां श्रीमत्सु भवनेषु च ॥ १२ ॥
सभासु चैव सर्वासु वृक्षेष्वालक्षितेषु च ।
ध्वजाः समुच्छ्रिताश्चित्राः पताकाश्चाभवंस्तथा ॥ १३ ॥
नटनर्तकसंघानां गायनानां च गायतां ।
मनःकर्णसुखा वाचः श्रूयन्तेऽथ समन्ततः ॥ १४ ॥
रामाभिष्टवसंयुक्ताः कथाश्चक्रुर्मिथो जनाः ।
रामाभिषेके संप्राप्ते चत्वरेषु गृहेषु च ॥ १५ ॥
बालाश्चापि क्रीडमाना गृहद्वारेषु सर्वशः ।
रामाभिष्टवसंयुक्ताश्चक्रिरे ते मिथः कथाः ॥ १६ ॥
कृतपुष्पोपहारश्च धूपगन्धाधिवासितः ।
राजमार्गः कृतः श्रीमान् पौरै रामाभिषेचने ॥ १७ ॥
प्रकाशीकरणार्थं च निशागमनशङ्कया ।
दीपवृक्षांस्तथा चक्रुरनुरथ्यासु सर्वशः ॥ १८ ॥

अलंकारं पुरस्यैवं कृत्वा च पुरवासिनः ।
आकाङ्क्षन्तो हि रामस्य यौवराज्याभिषेचनं ॥ १९ ॥
समेत्य संघशः सर्वे चत्वरेषु सभासु च ।
कथयन्तो मिथस्तत्र प्रशशंसुर्नराधिपं ॥ २० ॥
अहो महानयं राजा इक्ष्वाकुकुलनन्दनः ।
ज्ञात्वा यो वृद्धमात्मानं रामं राज्येऽभिषेक्ष्यति ॥ २१ ॥
सर्वे ह्यनुगृहीताः स्म यन्नो रामो महीपतिः ।
चिराय भविता गोप्ता दृष्टतत्त्वपरावरः ॥ २२ ॥
अनुद्धतमना विद्वान् धर्मात्मा भ्रातृवत्सलः ।
यथा च भ्रातृषु स्निग्धस्तथास्मास्वपि राघवः ॥ २३ ॥
चिरं जीवतु धर्मात्मा राजा दशरथोऽनघः ।
यत्प्रसादादभिषिक्तं द्रक्ष्यामो राघवं वयं ॥ २४ ॥
मिथः कथयतामेवं पौराणां शुश्रुवे तदा ।
दिग्भ्योऽपि श्रुतवृत्तान्तः प्राप्तो जानपदो जनः ॥ २५ ॥
स तु दिग्भ्यः पुरीं प्राप्तो द्रष्टुकामोऽभिषेचनं ।
रामस्य पूरयामास पुरीं जानपदो जनः ॥ २६ ॥
जनौघैस्तैर्विसर्पद्भिः शुश्रुवे तत्र निस्वनः ।
पर्वसूदीर्णवेगस्य सागरस्येव भिद्यतः ॥ २७ ॥

ततस्तदिन्द्रक्षयसंनिभं पुरं
दिदृक्षुभिर्जानपदैरुपागतैः ।

समन्ततः सस्वनमाकुलं बभाव्
अनेकयादोभिरिवार्णवे पयः ॥ २८ ॥

इत्यार्षे रामायणे अयोध्याकाण्डे पुरशोभाभिवर्णनं
नाम पञ्चमः सर्गः ॥

VI.

ज्ञातिदास्यथ कैकेय्याः सञ्जाता परिचारिका ।
प्रासादाग्रमुपारूढा तस्मिन् काले यदृच्छया ॥ १ ॥
ददर्श साथ तत्रस्था श्रीमद्राजपथां पुरीं ।
समुच्छ्रितध्वजवतीं हृष्टपुष्टजनाकुलां ॥ २ ॥
तां च दृष्ट्वा पुरीं रम्यामलंकृतजनाकुलां ।
अदूरस्थां समासाद्य धात्रीं काञ्चिदपृच्छत ॥ ३ ॥
कस्मात् पौरजनस्यायमतिहर्षोऽद्य शंस मे ।
चिकीर्षितं किं नृपतेः कार्यं पौरजनप्रियं ॥ ४ ॥
उत्तमेन च हर्षेण हर्षिताद्य विशेषतः ।
राममाता धनोत्सर्गं कुरुते केन हेतुना ॥ ५ ॥
इति पृष्टा तया धात्री कुब्जया भृशहर्षिता ।
आचचक्षे यथावृत्तं यौवराज्याभिषेचनं ॥ ६ ॥
श्वः पुष्ययोगेन किल यौवराज्ये स्वमात्मजं ।
अभिषेचयिता रामं राजा गुणगणाकरं ॥ ७ ॥
तेनायं हर्षितः सर्वो जनो रामाभिषेचने ।
पुरी चालंकृता पौरै राममाता च हर्षिता ॥ ८ ॥
इति श्रुत्वाप्रियं वाक्यं कुब्जा क्षिप्रममर्षिता ।
तस्मात् प्रासादशिखरादवतीर्य त्वरान्विता ॥ ९ ॥

संरक्तनयना कोपान्मन्थरा पापनिश्चया ।
शयानामेव कैकेयीमिदं वचनमब्रवीत् ॥ १० ॥
उत्तिष्ठ मूढे किं शेषे भयं ते घोरमागतं ।
समुपप्लुतमात्मानं दुर्भगे नावबुध्यसे ॥ ११ ॥
वृथा सौभाग्यमानेन दुर्भगे त्वं विदह्यसे ।
गिरिनद्या इव स्रोतस्तव सौभाग्यमस्थिरं ॥ १२ ॥
तयैवमुक्ता कैकेयी संरम्भात् परुषं वचः ।
कुब्जया पापदर्शिन्या प्रष्टुं समुपचक्रमे ॥ १३ ॥
मन्थरे किमसि क्रुद्धा किं तेऽनेमं निवेदय ।
विषण्णवदनां हि त्वां लक्षयामि सुदुःखितां ॥ १४ ॥
मन्थरा तद्वचः श्रुत्वा कैकेय्याः पुनरब्रवीत् ।
संरम्भामर्षताम्राक्षी वाक्यं वाक्यविशारदा ॥ १५ ॥
भूयो विषादयिष्यन्ती कैकेयीं पापनिश्चया ।
रामाद्भिभेदयिष्यन्ती किल तस्याहितैषिणी ॥ १६ ॥
अनेमं सुमहद्देवि तवेदं समुपस्थितं ।
रामं दशरथो राजा यौवराज्येऽभिषेक्ष्यति ॥ १७ ॥
सास्म्यपारे भृशं मग्ना दुःखशोकमहार्णवे ।
प्रतप्तास्म्यनलेनेव त्वद्धितार्थमुपागता ॥ १८ ॥
तव दुःखेन कैकेयि मम दुःखतरं भवेत् ।
तव वृद्धौ हि मे वृद्धिरिति मे निश्चिता मतिः ॥ १९ ॥

शत्रुः प्रतिप्रवादेन मात्रेव हितकाम्यया ।
आशीविषस्त्वयाङ्केन बाले परिहृतस्त्वया ॥ २० ॥
यथा तु कुर्यात् सर्पो वा शत्रुर्वाप्रत्युपेक्षितः ।
राज्ञा दशरथेनाद्य सपुत्रा त्वं तथा कृता ॥ २१ ॥
पापेनानृतवाक्येन बालप्रज्ञे सुखप्रिया ।
रामं स्थापयिता राज्ये सानुबन्धा हता ह्यसि ॥ २२ ॥
नराधिपकुले जाता महिषी पृथिवीपतेः ।
गतिं त्वं राजधर्माणां कथं देवि न बुध्यसे ॥ २३ ॥
धर्मवादि शठो भर्ता श्लक्ष्णवादी च दारुणः ।
शुद्धभावे न जानीषे तेनैवमतिसंधिता ॥ २४ ॥
उपस्थितः प्रयुञ्जानस्त्वयि सान्त्वमनर्थकं ।
अर्थेनैवाद्य ते भर्ता कौशल्यां योजयिष्यति ॥ २५ ॥
अपवाह्य हि दुष्टात्मा भरतं तव बन्धुषु ।
काल्ये स्थापयिता रामं राज्ये निहतकण्टके ॥ २६ ॥
तत् प्राप्तकालं कैकेयि कर्तुमर्हसि मे वचः ।
रक्ष पुत्रं तथात्मानं मां चैवामित्रकर्षिणि ॥ २७ ॥
तथा कुरु यथा रामं नाभिषिञ्चति ते पतिः ।
सकामां कुरु कौशल्यां मा सपत्नीमनिन्दिते ॥ २८ ॥
मन्थराया वचः श्रुत्वा कैकेयी हर्षिता ततः ।
एकमाभरणं मुक्त्वा कुब्जायै प्रददौ शुभं ॥ २९ ॥

दत्वा चाभरणं श्रीमत् प्रीतिदायं प्रहर्षिता ।
कैकेयी मन्थरां वाक्यमिदं तत्राब्रवीत् पुनः ॥ ३० ॥
मन्थरे यत् त्वया मेऽद्य प्रियमाख्यातमीप्सितं ।
तदिदं प्रीतिदायं ते प्रीत्या भूयो ददामि ते ॥ ३१ ॥
रामे वा भरते वापि विशेषो नास्ति कश्चन ।
तस्मात् प्रियं मे यद्रामं राजा राज्येऽभिषेक्ष्यति ॥ ३२ ॥

न मे प्रियं किञ्चिदतः परं भवेद्
यदद्य राजा सुतमिष्टमात्मजं ।
गुणाकरं राममुदारविक्रमं
स यौवराज्ये प्रतिपादयिष्यति ॥ ३३ ॥

इत्यार्षे रामायणे अयोध्याकाण्डे मन्थरापरिदेवनं
नाम षष्ठः सर्गः ॥

VII.

इत्युक्ता तत्र कैकेय्या तत् परिक्षिप्य भूषणं ।
सासूयं मन्थरा वाक्यमिदं भूयोऽभ्यभाषत ॥ १ ॥
भयस्थाने किमबले हर्षिता त्वमपण्डिते ।
शोकसागरसंमग्नमात्मानं नावबुध्यसे ॥ २ ॥
आशीविषस्त्वां दशतु मूढे मन्दितमानिनि ।
दुर्भगे चाकृतप्रज्ञे विपरीतार्थदर्शिनि ॥ ३ ॥
कौशल्यां सुभगां मन्ये यस्याः पुत्रोऽभिषिच्यते ।
यौवराज्ये पैतृकेऽस्मिन् पुष्येण कृतलक्षणः ॥ ४ ॥
प्राप्तां सुमहदैश्वर्यमृद्धामृद्धिविवर्जिता ।
उपस्थास्यसि कौशल्यां दासीव त्वमपण्डिते ॥ ५ ॥
ऋद्धियुक्ता श्रिया जुष्टा रामपत्नी भविष्यति ।
अश्रीमती त्वसमृद्धा स्नुषा ते च भविष्यति ॥ ६ ॥
तां तथा भृशमप्रीतां ब्रुवतीं प्रेक्ष्य मन्थरां ।
प्रीता रामगुणानेव कैकेयी प्रशशंस वै ॥ ७ ॥
धर्मात्मा गुरुवर्ती च कृतज्ञः सत्यवाक् शुचिः ।
रामो राज्ञः सुतो ज्येष्ठो युवराजत्वमर्हति ॥ ८ ॥
भ्रातॄन् सर्वान् स दीर्घायुः पितृवत् पालयिष्यति ।
मातॄणां च स सर्वासां प्रियाण्युपचरिष्यति ॥ ९ ॥

विशेषतः पूजयति कौशल्यामप्यतीत्य मां ।
रामो राजीवपत्राक्षः सर्वत्र समदर्शनः ॥ १० ॥
अकल्याणं नास्ति रामे न द्वेषश्च महात्मनि ।
संतापं मा कृथास्तस्माच्छ्रुत्वा रामाभिषेचनं ॥ ११ ॥
भरतश्चापि रामस्य ध्रुवं वर्षशतात् परं ।
पितृपैतामहं राज्यं क्रमप्राप्तमवाप्स्यति ॥ १२ ॥
सा त्वमभ्युदये प्राप्ते ममानन्दे च मन्थरे ।
भविष्यति च कल्याणे कथं नु परितप्यसे ॥ १३ ॥
इत्येतद्वचनं श्रुत्वा मन्थरा भृशदुःखिता ।
दीर्घमुष्णं च निःश्वस्य कैकेयीं पुनरब्रवीत् ॥ १४ ॥
अनर्थदर्शिन्यप्रज्ञे नात्मानमवबुध्यसे ।
अगाधे दुःखपाताले मज्जन्ती त्वमनन्तके ॥ १५ ॥
रामश्चेद्भविता राजा रामस्य च सुतस्ततः ।
तस्यान्यस्तस्य चाप्यन्यो वंशे राजा भविष्यति ॥ १६ ॥
राजवंशात् तु कैकेयि भरतः परिहास्यते ।
न हि राज्ञः सुताः सर्वे राज्ये तिष्ठन्ति भाविनि ॥ १७ ॥
बहूनामपि पुत्राणामेको राज्येऽभिषिच्यते ।
स्थाप्यमानेषु सर्वेषु सुमहाननयो भवेत् ॥ १८ ॥
तस्माज्ज्येष्ठेषु पुत्रेषु राज्यतन्त्राणि पार्थिवाः ।
आसजन्त्यनवद्याङ्गि गुणवत्स्वितरेषु वा ॥ १९ ॥

तेऽपि ज्येष्ठाः स्वपुत्रेषु ज्येष्ठेष्वेव न संशयः ।
आसन्नन्त्यखिलं राज्यं न भ्रातृषु कथञ्चन ॥ २० ॥
अतोऽत्यन्तमपूजार्हस्तव पुत्रो भविष्यति ।
अनाथवत् सुखाद्धीनो राजवंशाच्च शाश्वतात् ॥ २१ ॥
साहं त्वदर्थे संप्राप्ता त्वं च मां नावबुध्यसे ।
सपत्नवृद्धौ यन्मे त्वं प्रदेयं दातुमिच्छसि ॥ २२ ॥
ध्रुवं तु भरतं रामः प्राप्य राज्यमकण्टकं ।
देशान्तरं च नयिता देहान्तरमथापि वा ॥ २३ ॥
बाल एव हि मातुल्यं भरतो नायितस्त्वया ।
संनिकर्षाच्चानुरागो देवि सर्वस्य जायते ॥ २४ ॥
भक्तो हि रामः सौमित्रिं लक्ष्मणश्चापि राघवं ।
अश्विनोरिव सौभ्रात्रमनयोर्लोकविश्रुतं ॥ २५ ॥
तस्मान्न लक्ष्मणे किञ्चित् पापं रामः करिष्यति ।
रामस्तु भरते पापं कुर्यादिति न संशयः ॥ २६ ॥
मातामहगृहादेव तस्माद्गच्छतु ते सुतः ।
वनमाश्रयितुं शीघ्रमेतद्धास्य क्षमं भवेत् ॥ २७ ॥
एवं ते ज्ञातिपक्षस्य श्रेयः स्यादिति मे मतिः ।
यदिवा भरतो राज्यं पित्र्यं धर्म्यमवाप्स्यति ॥ २८ ॥
स तु सुखोचितो बालो रामस्य सहजो रिपुः ।
समृद्धार्थस्य हीनार्थः कथं जीवेत् तवात्मजः ॥ २९ ॥

अभिद्रुतमिवारण्ये सिंहेन गजयूथपं ।
उच्छिद्यमानं रामेण भरतं त्रातुमर्हसि ॥ ३० ॥
दर्पाद्धि नित्यं निकृता त्वया सौभाग्यमत्तया ।
राममाता सपत्नी ते कथं वैरं न पातयेत् ॥ ३१ ॥

कृते हि रामेऽद्य महीपतौ क्षितौ
गमिष्यसि त्वं ससुता पराभवं ।
अतोऽनुसंचिन्तय राज्यमात्मजे
परस्य चैवाद्य विवासकारणं ॥ ३२ ॥

इत्यार्षे रामायणे अयोध्याकाण्डे मन्थरावाक्यं नाम
सप्तमः सर्गः ॥

VIII.

एवमुक्ता तु कैकेयी विनिःश्वस्याब्रवीद्वचः ।
सत्यं वदसि मे कुब्जे जाने ते भक्तिमुत्तमां ॥ १ ॥
न तु पश्याम्युपायं तं येन शक्नोत मे सुतः ।
इदं प्रापयितुं राज्यं पितृपैतामहं बलात् ॥ २ ॥
अनुरक्तो नृपश्चायं रामं गुणगणान्वितं ।
स कथं राममुत्सृज्य प्राणेभ्योऽपि प्रियं सुतं ॥ ३ ॥
भरतं नाम मे पुत्रमभिषिञ्चेदकारणं ।
प्रव्राजयेद्वापि नृपः कथं राममकारणे ॥ ४ ॥
इत्येतद्वचनं श्रुत्वा कैकेय्या मन्थरा ततः ।
उवाचेदं विनिश्चित्य बुद्ध्या पापविनिश्चया ॥ ५ ॥
इमं राममहं क्षिप्रं वनं प्रस्थापयामि ते ।
भरतस्याभिषेकं च कारयामि यदीच्छसि ॥ ६ ॥
श्रुत्वैतन्मन्थरावाक्यं कैकेयी हृष्टमानसा ।
किञ्चिदुत्थाय शयनात् स्वास्तीर्णादिदमब्रवीत् ॥ ७ ॥
कथय त्वं महाप्रज्ञे केनोपायेन मन्थरे ।
भरतः प्राप्नुयाद्राज्यं रामश्चैव वनं व्रजेत् ॥ ८ ॥
एवमुक्ता तया देव्या मन्थरा पापनिश्चया ।
वाक्यं दुःखाय रामस्य कैकेयीमिदमब्रवीत् ॥ ९ ॥

श्रूयतामभिधास्यामि श्रुत्वा चैव विमृश्यतां ।
यथा ते भरतः पुत्रो राज्यं प्राप्स्यत्यसंशयं ॥ १० ॥
पुरा देवासुरे युद्धे युद्धसख्यः पतिस्तव ।
याचितो देवराजेन युद्धं कर्तुमितो गतः ॥ ११ ॥
दिशमास्थाय कैकेयि दक्षिणां दण्डकां प्रति ।
वैजयन्तमिति ख्यातं पुरं यत्र तिमिध्वजः ॥ १२ ॥
स शम्बर इति ख्यातो बहुमायो महासुरः ।
ददौ शक्राय संग्रामं देवसंघैरनिर्जितः ॥ १३ ॥
तस्मिन् महति संग्रामे राजा शस्त्रपरिक्षतः ।
विजित्याभ्यागतो देवि त्वयोपचरितः स्वयं ॥ १४ ॥
व्रणसंरोहणं चास्य तत्र देवि त्वया कृतं ।
परितुष्टेन ते दत्तौ वरौ द्वौ तत्र भाविनि ॥ १५ ॥
स त्वयोक्तः पतिस्तत्र यदेच्छेयं तदा वरौ ।
गृह्णीयामिति तच्चैव तथेत्युक्तं महात्मना ॥ १६ ॥
अनभिज्ञा ह्यहं देवि त्वयैतत् कथितं पुरा ।
तौ वरौ याच भर्तारं भरतस्याभिषेचनं ॥ १७ ॥
प्रव्राजनं च रामस्य वर्षाणि हि चतुर्दश ।
क्रोधागारं प्रविश्याद्य क्रुद्धा भूत्वा नृपात्मजे ॥ १८ ॥
शेष्वानन्तर्हितायां त्वं भूमौ मलिनवासिनी ।
राजानं मा निरीक्षिष्ठा मा भाषिष्ठाश्च किञ्चन ॥ १९ ॥

सुप्ता भूमावनाथेव दुःखिता नाम भाविनी ।
तत्र त्वां शयितां राज्ञा स्वयं दुःखसमन्वितः ॥ २० ॥
प्रसादयिष्यति क्षिप्रं प्रदत्यत्यपि च निर्णयं ।
दयिता त्वं भृशं भर्तुरत्र मे नास्ति संशयः ॥ २१ ॥
त्वदर्थे हि महाराजः श्रियं दीप्तामपि त्यजेत् ।
मणिमुक्तासुवर्णानि रत्नानि विविधानि च ॥ २२ ॥
यदि दद्याच्च ते भर्ता मा स्म तेषु मनः कृथाः ।
यदा तु तौ वरौ दित्सन् स्वयमुत्थापयेत् पतिः ॥ २३ ॥
सत्येन परिगृह्यैनं याचेथास्त्वं तदा वरौ ।
रामप्रव्राजनायैकं नव वर्षाणि पञ्च च ॥ २४ ॥
द्वितीयं यौवराज्याय भरतस्य वरं शुभे ।
यौ तु देवासुरे युद्धे वरौ दशरथो ददौ ॥ २५ ॥
तौ स्मारयित्वा याचेथाः पश्चादेतद्वरद्वयं ।
रामप्रव्राजनं देवि राज्यप्राप्तिं सुतस्य च ॥ २६ ॥
याचेथा भुवि कल्याणं ध्रुवं प्राप्स्यति ते सुतः ।
ध्रुवं प्रव्राजितश्चैव रामो भद्रे भविष्यति ॥ २७ ॥
भोक्ष्यते चापि पुत्रस्ते ध्रुवं राज्यमकण्टकं ।
येन कालेन काकुत्स्थो वनात् प्रत्यागमिष्यति ॥ २८ ॥
भरतोऽनेन कालेन बद्धमूलो भविष्यति ।
संगृहीतमनुष्यश्च कोषवांश्च श्रिया युतः ॥ २९ ॥

ऋजुस्वभावे बुध्यस्व सौभाग्यबलमात्मनः ।
न त्वां क्रोधयितुं शक्तो न च क्रुद्धामुपेक्षितुं ॥ ३० ॥
तव प्रियार्थे राजा हि प्राणानपि परित्यजेत् ।
न व्यतिक्रमितुं शक्तस्तव वाक्यं महीपतिः ॥ ३१ ॥
प्राप्तकालं तु ते मन्ये राजानं जितसाध्वसा ।
रामाभिषेकसंकल्पान्निगृह्य विनिवर्तय ॥ ३२ ॥
अनर्थमर्थरूपेण सा ददर्श तयोदिता ।
न हि तद्बुबुधे पापं शापदोषेण मोहिता ॥ ३३ ॥
केकयेषु हि सा बाल्ये ब्राह्मणं मूर्खरूपिणं ।
असूयितवती बाला तेन शप्ता महात्मना ॥ ३४ ॥
यस्मादसूयसे विप्रं त्वं रूपमददर्पिता ।
तस्मादसूयां त्वमपि लोके प्राप्स्यसि कुत्सितां ॥ ३५ ॥
इति शापसमाच्छन्ना मन्थरावशमागता ।
अतीव हृष्टा कैकेयी मन्थरां परिषस्वजे ॥ ३६ ॥
परिष्वज्य ततो गाढं कैकेयी हर्षविह्वला ।
उवाच वचनं धीरा तां कुब्जां पापदर्शिनीं ॥ ३७ ॥
प्रज्ञां ते नावजानामि श्रेष्ठां श्रेष्ठाभिधायिनि ।
अस्यां पृथिव्यां कुब्जेऽन्या बुद्ध्या नास्ति समा त्वया ॥ ३८ ॥
त्वमेव चापि भक्ता मे नित्ययुक्ता हितैषिणी ।
नाहं जानामि कुटिलं कुब्जे रामचिकीर्षितं ॥ ३९ ॥

सन्ति दुःसंस्थिताः कुब्जा विरूपा विकृताननाः ।
त्वं पद्म इव वातेन संनतः प्रियदर्शना ॥४०॥
उरस्ते नातिनिर्भग्नमाकण्ठान्मुखमुत्तमं ।
अधस्ताच्चोदरं शातं विलग्नं च स्तनद्वयं ॥४१॥
जघनं ते सुनिर्मांसं रसनादामशोभितं ।
जङ्घे दीर्घे तनू चैव पदौ चाप्यायतौ कृशौ ॥४२॥
त्वमायताभ्यां शक्थिभ्यां मन्थरे लीनवासिनी ।
अग्रतो मम गच्छन्ती टिट्टिभीव विराजसे ॥४३॥
यच्चेदं ककुदाकारं कुब्जं चारु शुभानने ।
मतयः क्षत्रविद्याश्च मायाश्चात्र वसन्ति ते ॥४४॥
अत्र ते प्रतिमोक्ष्यामि कुब्जे मालां हिरण्मयीं ।
अभिषिक्ते तु भरते रामे चैव वनं गते ॥४५॥
जात्येन ते सुवर्णेन सुनिष्टप्तेन सुन्दरि ।
समृद्धार्था प्रतीताहं भूषयिष्यामि ते तनुं ॥४६॥
मुखे च तिलकं चित्रं काञ्चनं कनकप्रभे ।
कारयिष्यामि ते कुब्जे शुभान्याभरणानि च ॥४७॥
यावदग्रनखं लिप्ता चन्दनेन सुगन्धिना ।
परिधाय शुभे वस्त्रे देवीव विचरिष्यसि ॥४८॥
चन्द्रं विस्पर्धमानेन मुखेन च शुभानने ।
गमिष्यस्यनवद्याङ्गि गर्वयन्ती सुहृज्जनं ॥४९॥

तवापि कुब्जे दास्योऽन्याः सर्वाभरणभूषिताः ।
पादौ परिचरिष्यन्ति यथैव मम भाविनि ॥ ५० ॥
एवं प्रशस्ता कैकेय्या कुब्जा भूयोऽब्रवीदिदं ।
शयानां शयने देवीं कैकेयीं त्वरयन्त्युत ॥ ५१ ॥
गतोदके सेतुबन्धो न कल्याणि प्रशस्यते ।
उत्तिष्ठ कुरु कल्याणं राजानं परिमोक्ष्य ॥ ५२ ॥
तथेत्यथ प्रतिज्ञाय मन्थरावचनात् तदा ।
भरतस्याभिषेकाय कैकेयी कृतनिश्चया ॥ ५३ ॥
महार्हमणिरत्नाढ्यं मुक्ताहारं वराङ्गना ।
अवमुच्य तथान्यानि सर्वाण्याभरणानि सा ॥ ५४ ॥
भृशं विभेदिता देवी तया मन्थरया तदा ।
क्रोधागारं प्रविश्यैका सौभाग्यबलदर्पिता ॥ ५५ ॥
तप्तहेमोपमतनुः कुब्जावाक्यवशानुगा ।
संविश्य भूमौ कैकेयी मन्थरामिदमब्रवीत् ॥ ५६ ॥
इह वा मां मृतां कुब्जे भर्तुरावेदयिष्यसि ।
वनं वा राघवे याते भरतः प्राप्स्यति श्रियं ॥ ५७ ॥
न धनानि न वस्त्राणि नालंकारान् न भोजनं ।
आसेविष्ये ह्यहं तावद्यावद्रामो वनं व्रजेत् ॥ ५८ ॥

इतीदमुक्त्वा वचनं सुदारुणं
निधाय सर्वाभरणानि भाविनी ।

असंवृतां संस्तरणेन मेदिनीम्
अथाधिशिश्ये पतितेव किन्नरी ॥५९॥
उदीर्णसंरम्भतमोवृतानना
तदा विमुक्तोत्तमदामभूषणा ।
नरेन्द्रपत्नी विमला बभूव सा
तमोवृता द्यौरिव नष्टभास्करा ॥६०॥

इत्यार्षे रामायणे अयोध्याकाण्डे रामप्रवासनोपायचिन्ता
नाम अष्टमः सर्गः ॥

IX.

आज्ञाप्य तु महाराजो राघवस्याभिषेचनं ।
कैकेय्याः प्रियमाख्यातुं विवेशान्तःपुरं नृपः ॥ १ ॥
तां तत्र पतितां भूमौ शयानामतथोचितां ।
प्रतप्त इव दुःखेन शुश्राव जगतीपतिः ॥ २ ॥
स वृद्धस्तरुणीं भार्यां प्राणेभ्योऽपि गरीयसीं ।
अपापः पापसंकल्पामुपचक्रमे दुःखितः ॥ ३ ॥
सर्वलोकाप्रियं मूढामनर्थं लोकगर्हितं ।
आकाङ्क्षमाणां संप्राप्तो ददर्श पतितां भुवि ॥ ४ ॥
करेणुमिव दिग्धेन विद्धां वाणेन दुःखितां ।
महागज इवासाद्य स्नेहात् परिममर्श तां ॥ ५ ॥
स तां विमृज्य पाणिभ्यामभिसंत्रस्तचेतनः ।
उवाच राजा कैकेयीं श्वसन्तीमुरगीमिव ॥ ६ ॥
न तेऽहमभिजानामि क्रोधमात्मनि संश्रुतं ।
देवि केनाभिशस्तासि केन वासि विमानिता ॥ ७ ॥
यदिदं मम दुःखाय शेषे कल्याणि दुःखिता ।
भूमौ पांसुष्वनाथेव मयि कल्याणचेतसि ॥ ८ ॥

भूतोपहतचित्तेव मम चित्तप्रमाथिनी ।
सन्ति मे कुशला वैद्याः संविभक्ताश्च वृत्तिभिः ॥ ९ ॥
अगदं ते करिष्यन्ति व्यक्तमाख्याहि भाविनि ।
कस्य वा तेऽप्रियं कार्यं केन वा तेऽप्रियं कृतं ॥ १० ॥
कः प्रियं लभतामद्य को वा सुमहदप्रियं ।
अबध्यो बध्यतां कोऽद्य बध्यः को वा विमुच्यतां ॥ ११ ॥
दरिद्रः को भवेदाढ्यो धनवान् कोऽस्त्वकिञ्चनः ।
यदस्ति मे धनं किञ्चित् तस्य देवि त्वमीश्वरी ॥ १२ ॥
यावत् प्रवर्तते चक्रं तावदेषा वसुंधरा ।
पृथिव्यां राजराजोऽस्मि सम्राट् सर्वमहीक्षितां ॥ १३ ॥
पृथिव्यां वररत्नानां प्रभुरस्मि शुचिस्मिते ।
ददामि यत् तेऽभिमतं कोपं मा च कृथाः प्रिये ॥ १४ ॥
न ते किञ्चिदभिप्रेतं न कर्तुमहमुत्सहे ।
आत्मनो जीवितेनापि करिष्ये ते प्रियं प्रिये ॥ १५ ॥
एवमुक्ता समुत्थाय विवक्षुर्भृशमप्रियं ।
परिपीडयितुं भूयो भर्तारं साभ्यभाषत ॥ १६ ॥
नास्मि विप्रकृता देव केनचिन्न विमानिता ।
अभीप्सितं तु मे किञ्चित् प्रियं कर्तुमिहार्हसि ॥ १७ ॥
प्रतिजानीहि तावत् त्वं यदि तत् कर्तुमिच्छसि ।
प्रतिज्ञाते ततोऽहं त्वां वरयिष्यामि काङ्क्षितं ॥ १८ ॥

एवमुक्तस्तया राजा प्रियया स्त्रीवशं गतः ।
प्रविवेश विनाशाय मृगः पाशमिवाबुधः ॥ १९ ॥
प्रियां प्रियहिते युक्तां भार्यां नित्यमनुव्रतां ।
स तां विज्ञाय संतप्तां कैकेयीं पार्थिवोऽब्रवीत् ॥ २० ॥
अवलिप्ते न जानासि त्वत्तः प्रियतरो मम ।
राममेकं वर्जयित्वा लोकेष्वन्यो न विद्यते ॥ २१ ॥
दद्यां ते परिहृत्येदं प्रिये हृदयमप्यहं ।
ततः समीक्ष्य कैकेयि ब्रूहि यत् साधु मन्यसे ॥ २२ ॥
बलमात्मनि पश्यन्ती न विशङ्कितुमर्हसि ।
करिष्यामि तव प्रीतिं सुकृतेनात्मनः शपे ॥ २३ ॥
तुष्टा तेनाथ वाक्येन हृष्टाभिप्रायमात्मनः ।
व्याजहार महाघोरं कैकेयी भृशमप्रियं ॥ २४ ॥
यथा धर्मेण शपसे वरं मह्यं ददासि च ।
तच्छृण्वन्तु समागम्य देवाः शक्रपुरोगमाः ॥ २५ ॥
चन्द्रादित्यौ ग्रहाश्चैव नभो रात्र्यहनी दिशः ।
जगच्च पृथिवी चैव सह गन्धर्वराक्षसैः ॥ २६ ॥
निशाचराणि भूतानि गृहेषु गृहदेवताः ।
यानि चान्यानि सत्त्वानि जानीयुर्भाषितं वचः ॥ २७ ॥
सत्यसंधो महाराजा धर्मज्ञः सुसमाहितः ।
वरं मह्यं ददात्येष तन्मे शृणुत देवताः ॥ २८ ॥

इति देवी महेष्वासं परिगृह्याभिशाप्य च ।
ततो वच उवाचेदं वरदं काममोहितं ॥ २१ ॥
पुरा देवासुरे युद्धे वरौ दत्तौ त्वया नृप ।
परितुष्टेन चेदानीं तौ वरौ त्वं प्रयच्छ मे ॥ ३० ॥
यस्त्वयायं समारम्भो रामं प्रति समाहितः ।
अनेनाप्नोतु भरतो यौवराज्येऽभिषेचनं ॥ ३१ ॥
वनं गच्छतु रामश्च चीराजिनजटाधरः ।
नव पञ्च च वर्षाणि वरावेतौ वृणोम्यहं ॥ ३२ ॥
यदि सत्यप्रतिज्ञोऽसि वनं रामं विसर्जय ।
भरतं चापि मे पुत्रं यौवराज्येऽभिषेचय ॥ ३३ ॥
एभिर्वचोभिः कैकेय्या हृदि विद्धो नराधिपः ।
भयेन हृष्टरोमाभूद्व्याघ्रीं दृष्ट्वा यथा मृगः ॥ ३४ ॥
सीदन् दुःखेन महता स तेनाभिहतो नृपः ।
असंवृतायां विमना भूमावुपविवेश ह ॥ ३५ ॥
अहो धिगिति चाप्युक्त्वा शोकार्तः पतितः क्षितौ ।
मोहमभ्यगमत् सद्यो वाक्शल्याभिहतो हृदि ॥ ३६ ॥
चिरेण तु पुनः संज्ञां प्रतिलभ्यार्तमानसः ।
कैकेयीमब्रवीत् क्रुद्धो दुःखशोकसमन्वितः ॥ ३७ ॥
नृशंसे दुष्टचारित्रे कुलस्यास्य विनाशिनि ।
किं कृतं तव रामेण मया वा पापदर्शने ॥ ३८ ॥

यद्तीत्यापि कौशल्यां रामस्त्वामनुवर्तते ।
तस्यैव त्वमनर्थाय किमर्थं चैवमुद्यता ॥ ३९ ॥
त्वं मयात्मविनाशाय भवनं स्वं प्रवेशिता ।
राजपुत्रीति विज्ञाय व्याली तीक्ष्णमहाविषा ॥ ४० ॥
जीवलोको यदा सर्वो रक्तो रामगुणैरयं ।
अपराधं कमुद्दिश्य त्यक्ष्यामीष्टमहं सुतं ॥ ४१ ॥
कौशल्यां वा सुमित्रां वा त्यजेयमपि वा श्रियं ।
जीवितं चात्मनो रामं न त्वेनं पितृवत्सलं ॥ ४२ ॥
नन्दामि हि प्रियं पुत्रं दृष्ट्वा राममहं सदा ।
अपश्यतः क्षणं तं मे न भवेदिह चेतना ॥ ४३ ॥
तिष्ठेल्लोको विना भूमिं शस्यं वा सलिलं विना ।
न तु रामं विना देहे तिष्ठेयुरसवो मम ॥ ४४ ॥
तदलं त्यज्यतामेष निश्चयः पापनिश्चये ।
अपि ते चरणौ मूर्ध्ना स्पृशाम्येष प्रसीद मे ॥ ४५ ॥

स तेन वाक्येन महाप्रियेण
घोरेण राज्ञा हृदयेऽतिविद्धः ।
आकृष्टरूपो विमना बभूव
व्याघ्राभिपन्नो बलवानिवोक्षा ॥ ४६ ॥
लोकस्य नाथोऽपि विपन्ननाथो
भृशं गृहीतो हृदये तथैवं ।

पपात भूमौ चरणौ परिस्पृशन्
प्रसीद देवीति वचोऽभ्युदीरयन् ॥ ४७ ॥

इत्यार्षे रामायणे अयोध्याकाण्डे वरयाचनं
नाम नवमः सर्गः ॥

ANNOTAZIONI

AL TESTO DEL LIBRO PRIMO[1]

Capitolo III, sloco 44, verso 2; sloco 45, verso 1. — Commento di Locanâtha : प्रमाणैस्त्रिभिरन्वितं। अनुमानोपमानशब्दैरिति सर्वज्ञः। उदात्तानुदात्तस्वरितैरिति विमलबोधः। प्रमाणैः सत्यवादिभिर्दशरथरामभरतैरित्यपरं। तन्त्री वीणागुणास् तया गीतैः। सप्तभिर्निषादादिस्वरैरन्वितं। स्वरभेदात् सप्तजातयो भवन्ति ताभिरिति सर्वज्ञः। गाथावीणामूर्छनाद्या जातयः।

Capitolo IV. — Variano i codici nel numero degli slochi, onde si compone l'*Anucramanica*. Il manoscritto G ne ha 146; il manoscritto M, 131; il manoscritto J, 151, più un verso dispajato; il manoscritto W, 150; nel qual numero consente l'edizione di Serampore. La nostra impressione ha 149 slochi. I due versi del codice W, che ho lasciato fuori, appoggiato per altro all' autorità del codice G, che non li ha, sono i seguenti. L'uno si trova dopo il verso secondo dello sloco 72;

[1] Sporrò quì brevemente alcuni passi del commento di Locanâtha, e indicherò insieme alcune pochissime varianti lezioni, le quali possono avere qualche attenenza coll' Introduzione. Notare tutte le principali varietà di lezioni dei codici manoscritti che ho adoperati, indicare a mano a mano quale io abbia preferito in questo od in quel luogo della presente impressione, e dichiarare occorrendo le ragioni della preferenza, acciocchè altri possa conoscere e giudicare il mio procedere critico nella pubblicazione di questo testo, tutto ciò è lavoro che non può aver luogo ancora quì, e che eseguirò, ove il creda necessario, sul finire dell' opera.

ed è questo : निवेदनं च लङ्कया गृध्रराजेन धीमता।. L'altro vien dopo il verso secondo dello sloco 77; ed è il seguente : दर्शनं पुष्पकस्येह आपानस्य च वर्णनं।. La ragione, per cui ho omesso quest' ultimo verso, si è l'incongruenza che ne risulta. Si dichiara in questo verso essere stato veduto da Hanuman in Lancâ il carro Puspaco (il florido) : poi due versi dopo si parla della ricerca che fa del carro stesso il medesimo Hanuman : विचयः पुष्पकस्येह, ecc. Gli editori di Serampore, per evitare l'incongruenza, tradussero grossamente il secondo पुष्पकस्य non più nel senso del carro Puspaco, ma d'un giardino di fiori : *the flower garden* (vol. I, pag. 55); ma tale versione è affatto arbitraria ed insussistente. Avendo io omesso per la ragione indicata questo secondo verso, ho creduto conveniente lasciar fuori anche il primo, che non si trova nel codice G, affinchè non rimanesse contro ogni verosimiglianza un verso dispajato nell'*Anacramanica*.

Capitolo XI, sloco 19, verso 1. — Commento di Locanâtha : सुमन्त्राधिष्ठितश्चाग्न्यः। अग्न्युमोक्षणाकाले सुमन्त्रस्य उपाध्यायस्य च गमनं न तु तयोरग्निना सह गमनमित्यर्थः।

Ivi, sloco 20, verso 1. — Commento di Locanâtha : शान्तयश्चैव। शान्तयो ग्रहपूजादिकाः।

Capitolo XIII, sloco 22, verso 2, pado 2. — यज्ञे तस्मिन् समाहृताः così il manoscritto G.

Ivi, sloco 27, verso 1, pado 1. — मन्त्रयूपोच्छ्रयैस्तैस्तु così il manoscritto W.

Ivi, sloco 28, verso 1, pado 1. — विचित्राश्चाभवन् मोघाः così il manoscritto J.

Ivi, sloco 28, verso 2, pado 1. — Commento di Locanâtha :

अश्रुदघ्नः। अश्रुप्रमाणः (*sic*) (अश्रुप्रमाणः ?) अग्निबन्ध इति पाठे अग्नौ तत्समीपे बध्यते स्थाप्यते।

Capitolo XXXI, sloco 4, verso 1, pado 1. — उल्कासंहारम्, ecc. così il manoscritto w. E Locanâtha chiosa in questo modo: उल्काः संहारमस्त्राणां। संहतयः इति संहारम्। अस्त्राणां शस्त्रादीनां च संहतिः। उल्कां चोद्दीपनीं।

Capitolo LVI, sloco 16, verso 2. — Commento di Locanâtha: साङ्गोपाङ्गः प्रयोगोपसंहारसहितः। सोपनिषत् मन्त्रसहितः। सरहस्यः अन्यो यो विशेषः।

Capitolo LXII, sloco 31, verso 2. — Commento di Locanâtha: अयोगानि चन्द्रयोगरहितानि। वैश्वानरपथाद्बहिः सर्वदक्षिणवीथ्या बहिरिति सर्वज्ञः।

Capitolo LXXII, sloco 17, verso 1. — Commento di Locanâtha: आकाशप्रभवो ब्रह्मा। आकाशो महाविष्णुस् तत्प्रभवो ब्रह्मा।. È notevole questa chiosa, che pone l'identità dell' etere o dello spazio e del gran Visnu, e fa Brahmâ originato da quest' ultimo. La recensione boreale invece di आकाशप्रभवो ब्रह्मा ha: अव्यक्तप्रभवो ब्रह्मा *ex insensili prodiit Brachman;* così traduce il Sig. di Schlegel.

Variano sovente i manoscritti nello scrivere i nomi proprj di persone. Al capitolo IV, sloco 39, verso 1, i manoscritti G M hanno यावानेर; tutti gli altri codici e le impressioni di Serampore e del Sig. di Schlegel scrivono जावालेर. Ivi, sl. 107, verso 2, i manoscritti G J hanno सत्रघ्न, tutti gli altri सुयज्ञ. Al capitolo VII, sloco 3, verso 1, il manoscritto J ha वृष्टिर् e राष्ट्रसाधकः, tutti gli altri hanno धृष्टिर् e अर्थसाधकः. Al capitolo XXIV, sloco 13, verso 1, il manoscritto J ha कुशाश्व; tutti gli altri leggono कृशाश्व. Al capitolo XXVIII, sloco 7, verso 2, i ma-

noscritti W J hanno धुन्धु; le impressioni di Serampore e del Sig. di Schlegel जम्भ, il manoscritto G धन्धु. Ivi, sl. 18, verso 2, i manoscritti G, W, J, M hanno दीर्घजिह्वा; l'impressione Schlegeliana ha मन्थरा. Al capitolo XLVIII, sloco 19, verso 2, tutti i manoscritti Gaudani hanno प्रमतिर्; l'impressione Schlegeliana porta सुमतिर्. Altre somiglianti differenze nei nomi proprj di persone o di luoghi si ritrovano quà e là nei varj codici del Ramayana.

FINE DEL VOLUME PRIMO.

सर्गसंग्रहपत्रं

आदिकाण्डं

अयोध्याकाण्डं

शुद्धिपत्र

पत्र	पङ्क्तिः	दूषितं	शुद्ध
१२	१	सृग्रीवः	सुग्रीवः
३५	५	प्रयोपवेशनं	प्रायोपवेशनं
६३	१३	भहीपतेः	महीपतेः
१३०	३	धोररूपा	घोररूपा
१४५	७	नीलाश्वन	नीलाञ्जन
१६०	१२	ऽभवन्	ऽभवत्
२००	२	मव	भव
२०७	९	सहाभागां	महाभागां
२१६	२	तमतो	तमथो
२३८	८	तन्मुनि *ecc.*	तन्मुनि *ecc.*
२४६	१	दिद्धि	विद्धि
२५०	८	त	तं
२५८	१०	दमो दमो	दमो
Idem.	११	ब्रह्यविदो	ब्रह्मविदो
२५९	२	धमं	धर्म
२६४	६	स	॥
२८५	१३	स्थिती	स्थितो